Digitization by Arya Samaj Charitable Foundation, Chennai

सरस्वतीसेवा

४१

मनुस्मृतौ जीवनमूल्यम्

हिन्दीमूलम्

न्यायमूर्तिः डा० एम्. रामा जोयिस

संस्कृतानुवादः

श्री गङ्गाधर बोडे

संस्कृतभारती

नवदेहली

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

'सरस्वतीसेवा'योजना - ४१

मनुस्मृतौ
जीवनमूल्यम्

हिन्दीमूलम्
न्यायमूर्तिः डा० एम्. रामा जोयिस
संस्कृतानुवादः
श्री गङ्गाधर बोडे

BVB Sri Sankaracharya Sanskrit Mahavidyalaya
266

संस्कृतभारती
नवदेहली

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रकाशनम् -
संस्कृतभारती
माता मन्दिर गली, झण्डेवाला
नई दिल्ली - ११० ०५५

© प्रकाशकस्य

प्रथमं मुद्रणम् - २०११, १,०००

मूल्यं - रू० ३५/-

मुद्रणम् -
वागर्थ
एन्.आर्. कालोनी, बेङ्गलूरु - १९

ISBN 978-81-87276-74-6

Bharatiya Vidya Bhavan, Sankaracharya ...

MANUSMRUTAU JEEVANA MULYAM - A Translation of 'Shashvat Jeevan Mulya - Manusmruti' written by Justice **Dr. Rama Jois.** Translated by **Shri Gangadhara Bode.** *Publisher* - **Samskrita Bharati,** Mata Mandir Gali, Jhandewalan, New Delhi - 110 055

Pages - viii + 101 Price - Rs.- 35.00 First print - January - 2011

Printed at - **VAGARTHA** N. R. Colony, Bangalore - 19

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रायोजनम् -

श्री रमेश भुताडः

स्टार् पैप् प्राडक्ट्स्

४०१८, वेस्ट् हालो पार्क् वे

ह्यूस्टन्, टेक्सास् - ७७०८२

(यु.एस्.ए.)

Bharatiya Vidya Bhavan's Sri Sankaracharya Sanskrit Mahavidyalaya

२६०

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रस्तावना

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ।।

इति स्मृतिसम्राजः मनोः वचनात् ज्ञायते यत् अस्मिन् देशे सर्वेऽपि संस्काराः वेदोक्तकर्मणः फलमेव इति । वेदविहितानां सर्वासाम् अपि स्मृतीनाम् उद्घोषः एतादृशः एव वर्तते ।

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ।। (२-६)

समेषां धर्माणां वेदाः एव मूलम् । स्मृतयः च वेदोक्तविषयाणाम् उपजृम्भकाः स्तम्भाः । तत्र च साधूनाम् आचारः उपवर्णितः विद्यते । तादृशानाम् आचाराणाम् अनुसरणेन एव आत्मतृप्तिः । कैवल्यप्राप्तिः अपि ततः एव ।

वेदाः हि यज्ञार्थम् अभिप्रवृत्ताः इति आर्षवचनात् ज्ञायते । वेदानां सर्वोत्कृष्टं लक्ष्यमस्ति - जनानां सत्कर्मणि एव प्रवर्तनम् । वेदविहिताः धर्म्याः व्यवहाराः स्मृतिषु सरलया शैल्या विध्यनुसारम् उपदिश्यन्ते । वेदास्तु अपौरुषेयाः । ऋषीणां दिव्यज्ञानस्य फलस्वरूपेण सन्दृष्टाः वेदाः, पश्चात् लिखितरूपेण लोकोपकाराय अन्यैः विद्वद्भिः सङ्गृह्य संशोध्य प्रकटिताः । तेषां वेदानां सारसर्वस्वभूताः भवन्ति उपनिषदः । उभयोरपि सरससङ्गमरूपम् अस्ति स्मृतिशास्त्रम्, यत्र च नित्यनैमित्तिकविषयैः सह राजधर्मः, प्रजाधर्मः, मन्त्रिसेवकादि-सम्बद्धाः विविधाः नियमाश्च प्रतिपाद्यन्ते । भरतभूखण्डे बह्व्यः स्मृतयः प्रसिद्धाः वर्तन्ते । तादृशीषु अनेकासु स्मृतिषु प्रधाना, उत्कृष्टा, भारतीयप्राचीनराज्याङ्गस्य परिचायिका, सर्वमान्या, अतिप्राचीना च वर्तते मनुस्मृतिः, या च द्वादशभिः अध्यायैः २५८८ श्लोकैश्च उपेता वर्तते । अस्याः च कर्ता मनुः विधिशास्त्रस्य शासनस्य च निर्मातृषु सर्वप्रथमः इति प्रथितः ।

महर्षयः भगवन्तं मनुमेवं प्रार्थयन्त -

भगवन्सर्ववर्णानां यथावदनुपूर्वशः ।
अन्तरप्रभवाणां च धर्मान्नो वक्तुमर्हसि ।। (१ - २) इति ।

तेषां वचनम् आकर्ण्य भगवता मनुना विरचितत्वात् ग्रन्थस्यास्य नाम मनुस्मृतिः इति अभवत् । अग्रे च याः स्मृतयः समागताः ताः सर्वाः प्रायः मनुस्मृतिमेव आधाररूपेण स्वीकुर्वन्ति । अस्यां च स्मृतौ द्वादशसु अध्यायेषु जगतः सृष्टिः,

Digitization by Arya Samaj Charitable Foundation, Chennai

धर्मस्य परिभाषा, ब्रह्मचर्याद्याश्रमव्यवस्था, जीवनव्यवस्था, भोजननियमाः, संन्यासिनां नियमाः, राजधर्मः, राज्ञः न्यायः, प्रशासनस्य कर्तव्यं, दम्पत्योः कर्तव्यं, पुत्राधिकारः, महापराधः, दण्डः, आचारसंहिता, जीविकोपार्जनपद्धतयः, कर्म, आत्मज्ञानम् इत्यादयः विषयाः व्याख्याताः विद्यन्ते। अस्याः स्मृतेः दृश्यन्ते बहूनि व्याख्यानानि। तेषु मनुभाष्यम्, मन्वर्थटीका, मन्वर्थवृत्तिः, मनुटीका, मन्वर्थमुक्तावलिः इत्यादीनि प्रमुखाणि। तेषु व्याख्यानेषु कुल्लूकविरचिता मन्वर्थमुक्तावलिः सर्वोत्कृष्टा इति विद्वांसः अभिप्रयन्ति। मनुस्मृतौ तादृशानि बहूनि प्रकरणानि सन्ति यानि दृष्ट्वा अनेकत्र केचन विरोधं प्रकटयन्ति। परन्तु अस्यामेव स्मृतौ केचन ईदृशाः सिद्धान्ताः अपि वर्तन्ते ये च समग्रमानवसमाजम् उद्दिश्य मानवताधर्मम् उपदिशन्ति, ये च उपदेशाः आचन्द्रार्कं स्थातुम् अर्हाः।

एतदेव पुष्टीकुर्वन् मनुः वदति –

यथा सर्वाणि भूतानि धरा धारयते समम्।
तथा सर्वाणि भूतानि बिभ्रतः पार्थिवं व्रतम्॥

एवं मनुस्मृतौ अनेकानि तत्त्वानि लभ्यन्ते, यानि च विश्वमङ्गलं गायन्ति। तानि भारतवर्षं विश्वगुरुस्थाने स्थापयितुम् अर्हन्ति। अतः मनुस्मृतिः सार्वकालिकी सार्वभौमस्वरूपयुक्ता च विद्यते इत्यास्तां तावत्।

Digitization by Arya Samaj Charitable Foundation, Chennai

अनुवादकवचनम्

नवेम्बरमासस्य प्रथमः सप्ताहः इति मन्ये । वयं केचन संस्कृताध्यापकाः अन्यविषयान् अधिकृत्य चर्चार्थं रामजोयिसमहोदयस्य गृहम् अगच्छाम । यदा सम्भाषणं प्रचलत् आसीत् तदा संस्कृतभाषाविषये विश्वपुस्तकमेलाविषये च वदन् रामाजोयिसवर्यः एकं ग्रन्थम् अस्माकं पुरतः गृहीत्वा – 'मम बहवो ग्रन्थाः विविधभाषाभिः अनूदिताः सन्ति । परन्तु एकोऽपि ग्रन्थः संस्कृतभाषया अनूदितः न वर्तते । अतः अस्मिन् शुभावसरे अयं ग्रन्थः यदि संस्कृतभाषया अनूदितः स्यात् तर्हि सन्तोषः' इति वदन् तत् पुस्तकं मत्पुरतः स्थापितवान् ।

तदा अहम् अवदम् – 'कालावकाशः अतिन्यूनः । लघ्ववकाशे अनुवादः कष्टकरः ।'

सः अवदत् – 'अहं न जानामि । एतत् कार्यं भवता एव करणीयम्' इति । अनन्यगतिकः अहं भीत्या एव एतत् कार्यं स्वीकृतवान् । महता कष्टेन कथमपि अनुवादं परिमितज्ञानेन सीमितावधौ पूरयित्वा संस्कृतभारत्याः ज्येष्ठकार्यकर्तॄन् प्रार्थितवान् – 'एतत् कार्यमहं कथमपि सम्पादितवान् । मुद्रणार्थं भवन्तः साहाय्यं कुर्वन्तु' इति । ते हस्तलिपिं दृष्ट्वा अन्यकार्यबाहुल्ये सत्यपि महता प्रयत्नेन मुद्रणकार्ये साहाय्यं कृतवन्तः । तेभ्यः अहं विनीतः भूत्वा कृतज्ञतां समर्पयामि । इदं मम अनुवादविषये प्रथमं प्रसूनं वर्तते । तस्मात् अहं मूललेखकस्य भावं ज्ञातवान् वा न वा इति न जानामि । मम धीशक्त्यनुसारम् अनुवादम् अकरवम् । यदि गुणाः स्युः तर्हि स्वीकुर्वन्तु, दोषाः स्युः चेत् क्षमां कुर्वन्तु इति प्रार्थये ।

श्री गङ्गाधर बोडे

संस्कृतशिक्षकः, केन्द्रीयविद्यालयः,

मल्लेश्वरम्, बेङ्गलूरु – ५६० ०५५

grbkashika@gmail.com

Digitization by Arya Samaj Charitable Foundation, Chennai

विषयानुक्रमणिका

प्रथमः अध्यायः	भारतभूमिवर्णनम्	१
द्वितीयः अध्यायः	मानवीय-क्रियाकलापानां प्रेरिका कामना	५
तृतीयः अध्यायः	मानवीयव्यवहाराः	१०
चतुर्थः अध्यायः	तृप्तिः एव सुखस्य मूलम्	१४
पञ्चमः अध्यायः	आधारभूतः सिद्धान्तः	१६
षष्ठः अध्यायः	त्रिवर्गसिद्धान्तः	२०
सप्तमः अध्यायः	महिलाः प्रति सम्मानः	२४
अष्टमः अध्यायः	पतिः पत्नी पारिवारिकजीवनधर्मः च	३२
नवमः अध्यायः	गृहस्थाश्रमस्य आधारः गृहस्थः	३७
दशमः अध्यायः	धर्मस्य पालनं कुरु, अधर्मे लिप्तो मा भव	४१
एकादशः अध्यायः	मातरं-पितरम् उपाध्यायमतिथिं च प्रति	४५
द्वादशः अध्यायः	सारभूता प्रक्रियात्मिका शासनव्यवस्था आदरः कर्तव्यं च	५२
त्रयोदशः अध्यायः	जनहितव्यवस्थायाः विहङ्गमविलोकः	६९
चतुर्दशः अध्यायः	राजधर्मः शासकानाम् आचारसंहिता	८१
पञ्चदशः अध्यायः	युद्धसमये तत्पश्चाच्च पालनीयाः नियमाः	९८
षोडशः अध्यायः	केवलं धर्मः एव शाश्वतः	१००

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रथमः अध्यायः

भारतभूमिवर्णनम्

एतदतिमहत्त्वं भवति यत् अस्य राष्ट्रस्य विशालता, सञ्चारव्यवस्थायाः अभावः, शीघ्रगतिपरिवहणस्य अभावः, जीवनपद्धतौ भिन्नताः, असङ्ख्याः सम्प्रदायाः, प्रत्येकमपि क्षेत्रस्य पृथग्भाषा इत्यादिषु विभिन्नतासु सतीषु अपि सर्वे भारतवासिनः मन्यन्ते यत् इदं राष्ट्रम् अखण्डम् इति, अस्य एकैकः प्रदेशः अपि पवित्रतमः इति च । भारतस्य एकतायाः अखण्डतायाः च सद्भावः मनुस्मृतेः कतिपयेषु श्लोकेषु प्रमाणितम् अस्ति । तेषु केचन अत्र उद्ध्रियन्ते -

सरस्वती दृषद्वत्योर्देवनद्योर्यदन्तरम् ।
तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ।। २-१७ ।।

सरस्वतीदृषद्वत्योः देवनद्योः मध्यवर्तिनि भूभागे स्थितः, देवताभिः एव स्वयं निर्मितः देशः ब्रह्मावर्तः इति कथ्यते ।

कुरुक्षेत्रं च मत्स्याश्च, पञ्चालाः शूरसेनकाः ।
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्तादनन्तरः ।। २-१९ ।।

कुरुभिः शासितं स्थानं 'कुरुक्षेत्रम्' इति उच्यते । पञ्चालैः शासिता भूमिः 'पञ्चाल'देशत्वेन निर्दिश्यते । एताभ्यां देशाभ्यां, शूरसेनकस्थानेन च युक्तः प्रदेशः 'ब्रह्मर्षिदेशः' इति उच्यते । अत्र ब्रह्मर्षयः निवासम् अकुर्वन् । एषः प्रदेशः ब्रह्मावर्तस्य आरात् तिष्ठति ।

हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विनशनादपि ।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः ।। २-२१ ।।

हिमालयविन्ध्याचलयोः मध्ये स्थितः, सरस्वतीनदीतीरस्य पूर्वभागे प्रयागात् पश्चिमदिग्भागे च यः देशः वर्तते तस्य नाम 'मध्यदेशः' इति । (देशस्य मध्ये वर्तमानं स्थलम् इत्यर्थः ।)

आ समुद्रात्तु वै पूर्वादा समुद्रात्तु पश्चिमात् ।
तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः ।। २-२२ ।।

Digitization by Arya Samaj Charitable Foundation, Chennai

पूर्वपश्चिमसमुद्रयोः मध्ये वर्तमानः प्रदेश 'आर्यावर्त' इति कथ्यते ।

इत्थं समग्रोऽयं देशः उत्तरतः हिमालयस्य गिरिश्रेणिभिः, दक्षिणतः समुद्रेण व्याप्तः अस्ति । इयमेव अस्माकं 'मातृभूमिः' इति उपवर्णिता । एवं च उपर्युक्तैः श्लोकैः भारतस्य भौगोलिकाखण्डतायाः निर्दुष्टं प्रमाणं प्रदर्शितम् अस्ति । अयमेव विषयः विष्णुपुराणे अपि वर्णितः भगवता व्यासेन । अस्य समग्रः अध्यायः भारतवर्षस्य विभिन्नानां प्रदेशानां, नदीपर्वतानदीनाम्, अस्य जीवनदर्शनस्य मूल्यानां च वर्णनार्थम् एव उपनिबद्धम् अस्ति । तदत्र प्रासङ्गिकरूपेण उद्धरामः ।

उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः ।। ३-१।।

समुद्रस्य उत्तरे भागे, हिमालयस्य दक्षिणे भागे च यत् वर्षं (राष्ट्रं) वर्तते तदेव 'भारतं' नाम । अत्र भारतमातुः सन्ततिः निवसति ।

अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने ।
यतो हि कर्मभूरेषा ततोऽन्या भोगभूमयः ।। (३-२२)

जगति भारतमेव श्रेष्ठतमम् । यतः अत्र विद्यमानाः कर्मणि एव भगवन्तं पश्यन्ति, यतः ते सन्ति कर्मयोगिनः । अन्ये च देशाः भोगभूमित्वेन निर्दिश्यते । यतः तेषु निवसन्तः जनाः भोगस्य एव प्राधान्यं भावयन्ति । भारतभूमिः तु 'कर्मभूमिः' इति प्रथिता ।

अस्मिन् श्लोके तु न केवलं भारतस्य भौगोलिकी स्थितिः वर्णिता, अपि तु भारतमेकं 'कर्माधारितं (कर्तव्याश्रितं) राष्ट्रम्' इति कथितम् अस्ति । भारते न तादृशी सभ्यता दृश्यते, या हि अधिकारभोगाश्रिता स्यात् । अत्र प्रत्येकं व्यक्तेः अधिकारस्य अस्मितायाः च रक्षा भवति । प्रायः लोके अधिकारः स्वार्थभावनया व्याप्तः भवति । परन्तु अत्र तु कर्तव्यं निस्स्वार्थतया भवति । एषा भावना भारते उत्पन्नानां विकसितसांस्कृतिकमूल्यानाम् अनुपमम् उदाहरणम् अस्ति । अत्र एकं श्लोकम् अवलोकयन्तु -

गायन्ति देवाः किल गीतकानि धन्यास्तु ते भारतभूमिभागे ।
स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात् ।। ३-२४।।

देवाः अपि भारतस्य स्तुतिं कुर्वन्ति । भाग्यशालिनः भारतवासिनः सत्यमेव धन्याः । अस्यां भूमौ समुत्पन्ना आचारसंहिता, इहलोके तु सुखदायिनी सती

Digitization by Arya Samaj Charitable Foundation, Chennai

पारलौकिकविषयेऽपि शाश्वतानन्ददायिनी अस्ति ।

येन सर्वाणि मानवजीवनमूल्यानि आत्मसात्कृतानि सः महात्मा गान्धी भारतस्य विषये एवं वदति -

(भारत मूलतः कर्मभूमि है न कि भोगभूमि) भारतं प्रथमतः कर्मभूमिः न तु भोगभूमिः)

(माई पिक्चर आफ फ्री इण्डिया)

अयं च संमानास्पदः विषयः वर्तते यत् अस्माकं पूर्वजाः न केवलं भारतस्य भौगोलिकपरिचयं प्रतिष्ठापितवन्तः, अपि तु अस्य भावनात्मकरूपेणापि संयोजितवन्तः । यथा पुत्रः स्वमातरं प्रति श्रद्धाम् आदरं च दर्शयेत् । अयमेव विचारः अस्मिन् श्लोके स्फुटतया दृश्यते ।

न मे वाञ्छास्ति यशसि विद्वत्त्वे न च वा सुखे ।
प्रभुत्वे नैव वा स्वर्गे मोक्षेऽप्यानन्ददायके ।।
परन्तु भारते जन्म मानवस्य च वा पशोः ।
विहङ्गस्य च वा जन्तोर्वृक्षपाषाणयोरपि ।।

अहं लोकप्रियतां मोक्षकामनां वा न करोमि । किन्तु ईश्वरम् अहं प्रार्थये, यत् मे भारतस्य पावनभूमौ एव पुनर्जन्म स्यात् इति । कामं मनुष्यजन्मनि वा पशु-पक्षि-कीट-वृक्ष-लता-पाषाणरूपेषु वा, किन्तु तज्जन्म भारतवर्षे एव स्यात् ।

यद्यपि एतत् न केवलं घोषवाक्यम्, अपि तु प्राचीनकालात् आरभ्य भारतस्य सामान्यः अपि जनः ईदृशीं भावनां धरति स्म । तैः इयं भारतभूमिः केवलम् एकः भूभागः इति भावनया न दृष्टा । किन्तु मातरम् इव भावयन्तः अस्याः उपासनां कुर्वन्ति स्म अस्माकं पूर्वजाः ।

भारतभूमिः तथा भारतवासिनां मध्ये कश्चन भावनात्मकः सम्बन्ध आसीत् । एतत्सत्यमेव यत् क्रिस्तशक १००० तथा तत्पश्चात् भारतीयेतिहासस्य अन्धकार-युगम् इति यदुक्तम् , तदा अपि भारतं मातरम् इव भावयित्वा पूजयितॄणां सङ्ख्या अधिका एव आसीत् । भारतीयेतिहासस्य निर्णायकाः राणाप्रतापः, छत्रपतिः शिवाजी, तेगबहादूर, गुरुगोविन्दः रानीलक्ष्मीप्रभृतयः विदेशीसत्तां विरुद्ध्य सङ्घर्षं कृतवन्तः । स्वतन्त्रतान्दोलनस्य सन्दर्भे स्वतन्त्रताप्राप्त्यै नैकैः देशभक्तैः स्वबलिदानं कृतम् । ''भारतमाता जयतु'' इति एकः जयघोषः आसीत् येन

Digitization by Arya Samaj Charitable Foundation, Chennai

सर्वे उत्प्रेरिताः आसन् । 'वन्दे मातरम्' इति उद्घोषः समग्रे भारते वन्द्यः अस्ति । अद्यत्वे अपि विभिन्नजात्युपजाति-भाषा-सम्प्रदायवादिनः, येषामुपयोगः विभिन्नैः दलैः स्वस्वार्थसम्पूर्त्यै क्रियते तत्रापि भारतमातुः जयकारः सर्वत्र गुञ्जितः भवति । अयम् एव विषयः भारतम् अखण्डतया एकसूत्रेण निबन्द्धुं समर्थो विद्यते ।

* * *

Digitization by Arya Samaj Charitable Foundation, Chennai

द्वितीयोऽध्यायः

मानवीय-क्रियाकलापानां (चेष्टानां) प्रेरिका कामना

मनुस्मृतेः द्वितीयाध्याये कामना एव मानवस्य सर्वविधचेष्टानाम् आधारभूता इति उक्तम् । एवम् अपि निर्दिष्टम् अस्ति यत् प्रत्येकम् अपि मानवीयकार्यकलापानां पृष्ठतः इच्छा एव प्रधाना भवति इति ।

अकामस्य क्रिया काचिद्दृश्यते नेह कर्हिचित् ।
यद्यद्धि कुरुते किञ्चित् तत्तत्कामस्य चेष्टितम् ।। (२-४)

अस्मिन् जगति न काचित् अपि क्रिया तादृशी वर्तते यस्याः पृष्ठतः कामना कार्यं न कुर्यात् । मानवः यत्किमपि आचरति तत्कामनापरिणामः एव ।

मनुष्यस्य अन्तस्थाम् इमां प्रवृत्तिं मनसिकृत्वा मनुस्मृतौ एतत् उक्तम् - मानवकामनायाः नियमनं नियमानां साहाय्येन विनियतं स्यात् । यं समग्रतो धर्मः इति निगदन्ति । यतः मानवचेष्टा सदा एव तस्य, तथा मानवजातेः हितम् अभिलक्ष्य वर्तते इति न विस्मर्तव्यम् ।

इच्छापूर्तिः एव अधिकाम् इच्छाम् अभिवर्धयति ।

न जातुकामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ।। (२-९४)

इच्छानाम् उपभोगैः इच्छा शान्ता न भवति, अपि तु ताः इतोऽपि वर्धन्ते एव । यथा घृतेन अग्नेः ज्वाला अधिकतया अभिवर्धते एव । उद्धृतश्लोकः समस्तमानवजातीनां कृते मूल्ययुतम् अस्ति । कामनानां नियन्त्रणं न सुलभसाध्यम् ।

एषा कामना तु प्रयत्नेन अभ्यासेन च नियन्तुं शक्यते । एतदर्थं बाल्यादारभ्य एव मनसः नियन्त्रणं तथा प्रशिक्षणस्य आवश्यकता भवति । अयं साधुः अयम् असाधुः इति सम्यक् अवगमनाय धर्मस्य मननम् एव आधारः स्यात् । अनेन एव मार्गेण दुरभिलाषाणां नियन्त्रणं स्यात् । मानवमनसि षट् अन्तर्निहिताः

Digitization by Arya Samaj Charitable Foundation, Chennai

रिपवः भवन्ति । ते अकार्यं कर्तुं तम् उत्सहन्ते । येन कारणेन च सः मानवः अकार्यरतः सन् अन्येषाम् अपि हानिं कर्तुं बाध्यः स्यात् । परिणामतः सः अपि कदाचित् सङ्कष्टे समापतेत् च । स्मृतिः घृतम् अग्नेः च दृष्टान्तेन संयमः नियन्त्रणं च प्रधानमिति आग्रहं करोति, चौर्यलुण्ठनादीनां द्वारा धनोपार्जनम् अनैतिकः स्त्रीसम्बन्धः मदिरापानं द्यूत-क्रीडादयः अपेक्षितकामनानाम् एव परिणामाः । कदाचित् कश्चित् अनैतिककार्येषु विलीनः भवति तस्य कामना एव तम् अकार्यं कर्तुम् उत्प्रेरयति । यदि कश्चन एवम् अपि परिचिन्तयेत् यत् एकवारं द्विवारम् अनुभूय च पश्चात् परित्यजामि परन्तु तत् तथा न भवति । यतः तस्य दुष्कामनाः एव तादृशम् कार्यं कर्तुं प्रेरयन्ति । फलस्वरूपेण कामनाः प्रत्यहं वर्धेरन् तथा व्यक्तिः कामनावशवर्ती स्यात् ।

भगवद्गीता अपि कामनानां नियन्त्रणाभावे ये च दुष्परिणामाः भवेयुः इति एवं जागरयति -

ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ।।
क्रोधाद्भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ।।

विषयान् (इन्द्रियसुखं) वा इच्छति मानवे काचित्कामना उत्पद्यते । कामनानाम् परिपूर्त्या क्रोधः, क्रोधात् सत्यासत्ययोः भेदाज्ञानम् एषा भावना अन्ततः मानवं पूर्णरूपेण विनष्टं कुर्यात् । कियत् सत्यमेतत् ? वयं प्रतिदिनम् अवलोकयामः, मानवः स्वस्वार्थपरिपूरणाय अपराधैः अत्याचारैः, भ्रष्टाचारादिदुर्गुणैः च विलिप्तः भवति । अन्ते इयमेव दुर्भावना कुटुम्बमेव नाशयेत् । एवमेव समाजस्य उपरि विपरीतपरिणामम् अपि कुर्यात् । एतस्मात् एव कारणात् मनुस्मृतिः इमम् उपदेशं यच्छति । स्वान्तकामनानाम् उपरि नियमनं स्यात्, एवमेव तत् न वर्धयेत् । स्वाचारम् अपि पालयेदिति ।

इन्द्रियनिग्रहः

पत्येकस्मिन् अपि पुरुषे षट् प्राकृतिकगुणाः भवन्ति । एते अरिषड्वर्गाः अन्तर्निहिताः षट् शत्रवः । कामः क्रोधः लोभः मोहः मदः मात्सर्यम् इति रूपेण । एताः प्रवृत्तयः स्वस्मिन् यथा परिणामं जनयन्ति तथा अन्येषु अपि विनाशकारकं परिणामं प्रददति । इन्द्रियाणाम् आग्रहेण कार्ये प्रवर्तमानानि इन्द्रियाणि यदि निगृहीतानि न भवन्ति तानि अहितपरिणामदायीनि भवन्ति । अतः इन्द्रियनिग्रहः प्रधानः गुणः भवति । एषः एव धर्मस्य मूलः सिद्धान्तः इति

Digitization by Arya Samaj Charitable Foundation, Chennai

वदन्ति । मनुस्मृतेः द्वितीयाध्याये एवम् उल्लेखः दृश्यते –

इन्द्रियाणां विचरतां विषयेष्वपहारिषु ।
संयमे यत्नमातिष्ठेद्विद्वान्यन्तेव वाजिनाम् ।। (२-८८)

एकः निपुणः सारथिः यथा अश्वानाम् उपरि नियन्त्रणं साधयति तथैव विद्वानपि चित्ताकर्षकाणि इन्द्रियाणि वशे कुर्यात् । २-८८।

अश्वसारथीनाम् उदाहरणेन प्रयत्नः तथा प्रशिक्षणस्य महत्त्वम् अत्र प्रदर्शितं वर्तते । एतदभावे एव मानवः अनैतिक-असामाजिककृत्येषु संलग्नो भवति । इन्द्रियनिग्रहस्य एकादशाङ्गानि मनुस्मृतौ उपवर्णितानि ।

एकादशेन्द्रियेषु कर्णः, त्वक्, चक्षुः, रसना, नासिका, उपस्थं, गुह्यं, हस्तः, पादः, वाणी – एतानि दश इन्द्रियाणि सन्ति ।

एतेषु प्रथमं पञ्च ज्ञानेन्द्रियाणि तथा अन्यानि पञ्च कर्मेन्द्रियाणि इति प्रसिद्धिः । मनः एकादशमिन्द्रियम् अस्ति । यत् तु स्वविशेषगुणानां कारणेन ज्ञानेन्द्रियमपि । अतः एतत् अन्येषाम् इन्द्रियाणां स्वामी ।

यस्य वाङ्मनसी शुद्धे सम्यग्गुप्ते च सर्वदा ।
सर्वे सर्वमवाप्नोति वेदान्तोपगतं फलम् ।।२-१६०।।

यदि मनः नियन्त्रितं स्यात् तदा ज्ञानेन्द्रिय-कर्मेन्द्रियाणि च नियमितानि भवन्ति । कश्चित् स्वस्य इन्द्रियाणाम् उपरि नियन्त्रणं कर्तुं न पारयेत् तदा अनेकान् अपराधान् कुर्यात् । यदि सः इन्द्रियाणां निग्रहं कुर्यात् अवश्यमेव जीवने सफलतां पाप्नुयात् । कस्यचन मानवस्य वचनम् आचरणं शुद्धं निश्चयेन जीवने सः सफलो भवति ।

मनुस्मृतौ कृतमेतत् विश्लेषणम् अति प्रसिद्धमस्ति । अस्य शिक्षायां(शिक्षणे) चरित्रनिर्माणार्थं पाठ्यविषये संयोजनीयमस्ति । ज्ञानेन सह मनसः अपि सन्मार्गे प्रवर्तितुं प्रशिक्षणम् आवश्यकं स्यात् ।

याश्च क्रियाः मनसा प्रेरणां सम्प्राप्य वाक् तथा शरीरद्वारा प्रकटिताः भवन्ति ताः उत्तमानुत्तमपरिणामं प्रयच्छन्ति । क्रियया एव मानवस्य बह्वयः प्रवृत्तयः पुरः समायास्यन्ति । मनः सर्वासां क्रियाणाम् उत्प्रेरकं यच्च शरीरात् न्निष्पन्नम् अस्ति । एतत् त्रिविधमस्ति । दशशिरस्सु व्यक्तीभूतं भवति ।

१. पापपूर्णाः तिस्रः मानसिकीक्रियाः ।

(क) अन्येषां सम्पत्तेः अपहरणम् ।
(ख) पापपूर्णविषयाणां चिन्तनम् ।
(ग) हानिकारकसिद्धान्तानाम् अनुपालनम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

एतैः त्रिभिः पापपूर्णविचारैः चतस्त्रः अहिताः वाचः चेष्टाः तथा तिसृणां शारीरकदुष्क्रियाणां सर्जनं भवति ।

२) वाचः चतस्त्रः अहितक्रियाः।

क) असत्यकथनम्

ख) अन्यानुद्दिश्य अहित-अपमानजनकभाषायाः प्रयोगः ।

ग) अन्यान् विरुध्य असत्यवचनानां प्रसारः ।

घ) अपरानुद्दिश्याहितवाग्व्यवहारः ।

३) तिस्त्रः अहितशारीरकक्रियाः ।

१) अदेयप्राप्तिः ।

२) अन्यजीविभ्यः शारीरकहिंसा ।

३) अनैतिक-दैहिकसम्बन्धः ।

मानसिक-शारीरकरूपेण अन्यान् प्रति यावत् कुकर्म आचरितं तस्य आर्थिकं तथा अपराधिकी हानिः उपर्युक्तविश्लेषणैः संयोजयितुं शक्यते । अहितं कार्यं कर्तुं सदा एव मनः प्रेरकं भवति । उत्पन्नात् इयं भावना वचः तथा शरीरावयवमाध्यमेन प्रकटिता भवति । परिणामतः व्यक्तिः अन्यथा आर्थिकीं शारीरकीं पीडां दातुम् आरभते । यश्च शारीरकार्थिकहानिभिः अन्यान् पीडयति तस्य उदाहरणं यथा - अन्येषां सम्पदां हरणम् अन्येभ्यः लभ्यमाने धने बाधा, मानहानिः, प्रताडनं, चौर्यं, लुण्ठनमित्यादि-शारीरकमाध्यमेन क्रियमाणानि कार्याणि अपि मनुस्मृतेः अन्तर्गतानि सन्ति । एतादृशानां नियमानाम् अनुसरणम् अधुनातनशासनेषु अपि द्रष्टुं शक्यते । न कश्चित् जनः एतेषां कुकृत्यानाम् आचरणं कुर्यात् यदि ज्ञात्वाऽपि करोति अवश्यमेव शासनेन दण्डितः भवति ।

एतत् कथनात् पूर्वं सर्वान् मनुस्मृतिः जागरयति -

मनः पापं कर्म कर्तुं न प्रेरितं स्यात् येन कारणेन नरः अन्यान्नापराध्येत् ।

वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च ।
यस्यैते निहिता बुद्धौ त्रिदण्डीति स उच्यते ।।१२-१०।।

शास्त्रं तं नरं त्रिदण्डीति कथयति यः मनः, वाणी, शरीरमिति त्रिष्वपि नियन्त्रणं धत्ते । यश्च सवैः अपि जीविभिः सह व्यवहारावसरे त्रयाणाम् एतेषां विषयाणां वैशिष्ट्यम् अनुपालयति स एव जीवने यशस्वी भवति ।

सर्वविधानाम् आर्थिकापराधानाम् आचरणे कारणं मनुस्मृतौ इत्थं कथितमस्ति - यदि एषु त्रिषु निग्रहं नरः कुर्यात् सः सर्वथा समाजस्य समाजाधारभूतानां

Digitization by Arya Samaj Charitable Foundation, Chennai

जीविनां रक्षणे सक्षमः स्यात् ।

गीतायां द्वितीयाध्याय एवम् उल्लेखः लभ्यते -

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैः विधेयात्मा प्रसादमधिगच्छति ।।

यः नूनं मनः नियन्त्रयितुं शक्तः स अवाञ्छनीयकर्मभिः तथा द्वेषासूयादिभिः मुक्तः भवति । यावज्जीवम् इन्द्रियाणि निगृह्य मनःशान्तिं सुखं च लभते ।

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ।।

किन्तु यः तु मनः इन्द्रियाणि च वशे न कुर्यात् तस्य मनसि न कदापि शुद्धा भावना भवितुम् अर्हति । परिणामतः अशान्तमनस्कः सुखं कथं वा लभेत ?

अतः शान्तेः सुखस्य च प्राप्त्यै इन्द्रियजयः आवश्यकः ।

* * *

Digitization by Arya Samaj Charitable Foundation, Chennai

तृतीयः अध्यायः

मानवीयव्यवहाराः

मनुस्मृतेः द्वादशे अध्याये मानवीयव्यवहाराणां चर्चा विहिता अस्ति । सर्वः अपि जनः आत्मनि उत्तमगुणानां विकासं दुर्गुणानां दूरीकरणाय च यत्नं कुर्यात् ।

सत्त्वं रजस्तमश्चैव त्रीन्विद्यादात्मनो गुणान् ।
यैर्व्याप्येमान्स्थितो, भावान्महान्सर्वानशेषतः ।।१२-२४।।

एकैकस्य अपि मानवस्य त्रयः विशिष्टाः गुणाः भवन्ति । सत् तथा कोमलस्वभावः अर्थात् सात्विकः गुणः । कार्यसिध्यर्थं दृढसङ्कल्पः । क्रोधः तथा आशा एतैः गुणैः प्रेरितः भूत्वा कार्ये संलग्नः स्यात् । एतेषु कश्चिदपि स्वभावः आधिक्येन दृश्यते सः तेन गुणेन सङ्क्रान्तो भवति ।

यो यदैषां गुणो देहे साकल्येनातिरिच्यते ।
स तदा तद्गुणप्रायं तं करोति शरीरिणम् ।।१२-२५।।

एतेषु एकोऽपि स्वभावः कस्मिन्नपि पुरुषे प्रबलः भवति तस्य परिचयः तेन एव गुणेन भवति । यः स्वभावः अन्यगुणवद्भिः पुरुषैः पृथक् करोति ।

सत्वं ज्ञानं तमोऽज्ञानं रागद्वेषौ रजः स्मृतम् ।
एतद्व्याप्तिमदेतेषां सर्वभूताश्रितं वपुः ।।१२-२६।।

सत्त्वगुण एव सुज्ञानस्य प्रतीकम् । कार्यकरणस्य दृढसङ्कल्पः इच्छया उत्पन्नो भवति । अज्ञानतया शत्रुता तथा अन्धकारः उत्पद्यते ।

वेदाभ्यासस्तपो ज्ञानं शौचमिन्द्रियनिग्रहः ।
धर्मक्रियात्मचिन्ता च सात्त्विकं गुणलक्षणम् ।।१२-३१।।

वेदाध्ययनं मानवं कठिनाभ्यासिनं ज्ञानिनं करोति । विचारे वाण्याम् अपि शुद्धताम् आददाति । अतः वेदज्ञानं शौचम् च इन्द्रियादिनिग्रहेषु अपि शक्तिं यच्छति । धर्माचरणम् आत्मचिन्तनं च सात्त्विकः गुणः इति कथयन्ति ।

तत्र यत् प्रीतिसंयुक्तं किञ्चिदात्मनि लक्षयेत् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रशान्तमिव शुद्धाभं सत्वं तदुपधारयेत् ।।१२-२३।।

कोऽपि पुरुषः स्वान्ते परमसुखम् अनुभवति सः नूनम् एव चिन्तयेत् यत् सुखानुभवः सात्विकः सत्वगुणोत्कर्षस्य एव सङ्केतं करोति इति ।

आरम्भरुचिताऽधैर्यमसत्कार्यपरिग्रहः ।
विषयोपसेवा चाजस्त्रं राजसं गुणलक्षणम् ।।१२-३२।।

यश्च पुरुषः अधार्मिकः अचञ्चलमनाः तथा वासनायाम् आनन्दानुभवं करोति व्यभिचारी च तत् राजसगुणं दर्शयति ।

लोभः स्वप्नोऽधृतिः क्रौर्यं नास्तिक्यं भिन्नवृत्तिता ।
याचिष्णुता प्रमादश्च तामसं गुणलक्षणम् ।।१२-३३।।

लोभः, निद्रा, भीरुत्वम्, निर्दयता च नास्तिक्यगुणाः । एते नरं राक्षस-जीवनाभिमुखं करोति । अनेन च गुणेन तामसगुणस्य एव विकासः भवति ।

यत्कर्म कृत्वा कुर्वंश्च करिष्यंश्चैव लज्जति ।
तज्ज्ञेयं विदुषा सर्वं तामसं गुणलक्षणम् ।। (१२-३५)

यश्च पुरुषः किमपि कार्यं कर्तुम् ईहते कार्यकरणसन्दर्भे तत्पश्चाद्वा लज्जाम् अनुभवेत् । एतादृशी प्रवृत्तिः तच्चेतनायाः सन्तुष्टिः न भवति अवश्यमेव तां तामसिकीप्रवृत्तिः इति वदन्ति ।

मनुस्मृतेः उपर्युक्तश्लोके मानवे निहिताः ताः प्रवृत्तयः याः सात्विक-गुणाभिवर्धनाय प्रेरणां ददति । सहैव तामसिकगुणानाम् अपि कारणानि उद्धृतानि सन्ति । अन्तिमः श्लोकः अनुचिताचरणं प्रति सूचनां प्रददाति । यदि बाह्यतः कोऽपि एतादृशगुणान् दर्शयेत् प्रायः सः दोषी न । निश्चयेन मनसि सः पुरुषः स्वदोषाय अशोभनीयव्यवहारं प्रति आत्मानं दोषिणं मनुते । आत्मोद्धारार्थम् अवश्यमेव एतद्दक्षतां जनयति । मनस्मृतिः स्पष्टं क़रोति यत् धर्मस्य अथवा अधर्मस्य अश्रये अन्तःकरणं कं पन्थानमनुसरत् इति ।

आन्तरिकसुखप्राप्तिविधिः

वेदाभ्यासस्तपोज्ञानमिन्द्रियाणाञ्च संयमः ।
अहिंसा गुरुसेवा च निःश्रेयसकरं परम् ।।१२-८३।।

वेदानाम् अध्ययनं वैदिककर्मणां परिज्ञानं तथा प्रतिदिनं क्रियमाणेषु व्यवहारेषु तेषाम् अनुसरणम् इन्द्रियनिग्रहः अन्येषां विषये अहिंसाभावः, गुरुशुश्रूषा - एते उत्तमसुखप्राप्त्यर्थम् उत्तमाः उपायाः ।

कर्मणः प्राधान्यम्

सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

तदध्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः ।। १२-८५

आत्मज्ञानमेव सर्वश्रेष्ठम् ।

षण्णाम् एषां तु सर्वेषां कर्मणां प्रेत्य चेह च ।

श्रेयस्करतरं ज्ञेयं सर्वदा कर्म वैदिकम् ।।१२-८६।।

सर्वासाम् अपि उत्तमचेष्टानां वेधाध्ययनम् एव सर्वोत्तमम् इति वदन्ति ।

वैदिके कर्मयोगे तु सर्वाण्येतान्यशेषतः ।

अन्तर्भवन्ति क्रमशस्तस्मिंस्तस्मिन्क्रियाविधौ ।।१२-८७।

सात्त्विकगुणान् जागरयितुं यावन्तः उपयुक्तसिद्धान्ताः (मार्गाः) सन्ति सर्वेऽपि तत्तत् क्रियाविधौ अन्तर्भवन्ति एव ।

सर्वेषामपि चैतेषां शुभानामिह कर्मणाम् ।

किञ्चिच्छ्रेयस्करतरं कर्मोक्तं पुरुषं प्रति ।। (१२-८४) ।

वेदोपनिषत्सु उपदिष्टानाम् एतेषां सर्वेषां विधीनां शुभकर्मणाम् अनुसारेण मानवं प्रति निश्चितम् एव श्रेयः स्यात् ।

सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।

समं पश्यन्नात्मयाजी स्वराज्यमधिगच्छति ।।(१२-९१)

यो हि अन्येषां सर्वेषाम् अपि प्राणिनाम् आत्मानं स्वात्मनि पश्यति सः पुरुषः स्वच्छः एव प्रकाशमान् जायते । अयं तु धर्मस्य अन्यतमः नियमः यः आज्ञां प्रदास्यति । सर्वेषाम् अपि प्राणिनाम् आत्मा एक एव । अयं सम्यक् शिक्षितस्य पुरुषस्य परिचायकः अस्ति । एकं सुभाषितं सुशिक्षितस्य स्वभावं विमृशति -

मातृवत् परदारेषु परद्रव्येषु लोष्ठवत् ।

आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः।।५।।

यः नरः स्वभार्यां विना सर्वाः स्त्रियः मातृवत् पश्यन् अपरेषां सम्पदं मृत्पिण्डवदवगच्छति सर्वान् प्राणिनः स्वसमा इति चिन्तयेत् सः निश्चयेन पण्डितः कथ्यते ।

वेदस्य श्रेष्ठता - वेदातिरुक्तनियमानां बहिष्कारः स्यात् ।

पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम् ।

अशक्यं चाप्रमेयं च वेदशास्त्रमिति स्थितिः ।।१२-९४।।

वेदः दैवीसाधनादिभिः संवलित-अन्तःस्थितानां मौलिकविषयाणाम् एकीभावः। निस्सन्देहम् अयम् एव धर्मस्य स्त्रोतः ।

या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्ट्यः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

सर्वास्ताः निष्फलाः प्रेत्य तमो निष्ठा हि ताः स्मृताः ।।१२-९५।।

सर्वाः स्मृतयः परम्पराः रीतयः पद्धतयः वा कुत्सितदृष्टिः ये च विषयाः वेदाधारिताः न स्युः सर्वे ते अयुक्ताः एवं निष्फलाः इति कथयन्ति ।

उत्पद्यन्ते च्यवन्ते च यान्यतोऽन्यानि कानिचित् ।
तान्यर्वाक्कालिकतया निष्फलान्यनृतानि च ।।

तादृशाः सर्वेऽपि सिद्धान्ता निष्फलाः प्रोक्ताः ये वेदोक्तविचारान् न परिपालयन्ति ।

बिभर्ति सर्वभूतानि वेदशास्त्रं सनातनम् ।
तस्मादेतत् परं मन्ये यज्जन्तोरस्य साधनम् ।।१२-९९।।

सनातनोऽयं सर्वान् प्राणिनः पोषयति । सर्वेषाम् अपि आश्रयभूमिः । अतः वेदः सर्वश्रेष्ठः ।

मनुस्मृतेः अनुसारं वेदः धर्मस्य प्रथमः स्त्रोतः इति पूर्वमेव उद्धृतम् अस्ति । ऋगथर्वयोः समानता अवश्यमेव लभ्यते । अतः स्मृतौ पुराणादिषु ये नियमाः समाहिताः सन्ति यदि ते वेदप्रामाण्यविरुद्धाः वर्तन्ते ते सर्वे अधर्माः स्मृताः । तेषाम् अनुकरणं न कदापि कार्यम् ।

***

Digitization by Arya Samaj Charitable Foundation, Chennai

चतुर्थः अध्यायः

तृप्तिः एव सुखस्य मूलम्

सन्तोषं परमास्थाय सुखार्थी संयतो भवेत् ।
संतोषमूलं हि सुखं दुःखमूलं विपर्ययः ।। ४-१२ ।।

तृप्तेः अधिकं सुखं नास्ति । कश्चित् पुरुषः सुखेच्छुः यदि स्यात् अवश्यम् एव स्वात्मनियमनार्थं सङ्घर्षरतः स्यात् । सुखस्य आधारः तृप्तिः अतृप्तिः दुःखस्य मूलम् ।

नेहेतार्थान्प्रसङ्गेन न विरुद्धेन कर्मणा ।
न विद्यमानेष्वर्थेषु नार्त्यामपि यतस्ततः ।।४-१५ ।।

मानवः न कदापि अनैतिकरूपेण धनसङ्ग्रहं कुर्यात् । सम्पदः अपि कुमार्गेण सङ्ग्रहः अन्यायाय ।

इन्द्रियार्थेषु सर्वेषु न प्रसज्येत कामतः ।
अतिप्रसक्तिं चैतेषां मनसा संनिवर्तयेत् ।।४-१६ ।।

स्वेच्छावाप्त्यर्थं मानवः न कदापि कामप्रवृत्तौ विलीनः स्यात् । इच्छाशक्त्या अभीप्सानां नियन्त्रणमेव वरम् ।

सर्वान्परित्यजेदर्थान् स्वाध्यायस्य विरोधिनः।
यथातथाध्यापयंस्तु सा ह्यस्य कृतकृत्यता ।।४-१७।।

मानवः तादृशानां सर्वेषाम् अपि पथाम् आरात् एव तिष्ठेत् ये च पन्थानः वेदोक्तज्ञानसम्पादनार्थं तम् अवरुन्ध्यात् । केवलं ज्ञानप्राप्तिः एव तस्य सल्लक्ष्यं स्यात् ।

वयसः कर्मणोऽर्थस्य श्रुतस्याभिजनस्य च ।
...षवाग्बुद्धिसारूप्यमाचरन्विचरेदिह ।।४-१८।।

पुरुषस्य स्व-आयुः व्यवसायः सम्पत् तथा कौटुम्बिकस्थित्यनुसारम् एव तस्य वासः, वाणी, विचारः च स्यात् ।

यथा यथा हि पुरुषः शास्त्रं समधिगच्छति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

तथा तथा विजानाति विज्ञानं चास्य रोचते ।।४-२०।

पुरुषः स्वाध्ययनं पूरयित्वा शास्त्रं समधिगच्छति सः सात्विकं ज्ञानं विकासयन्नेव तदधिकं प्रकाशमानं कुर्यात् ।

उपरि उक्तेषु श्लोकेषु मानवसुखार्थम् आवश्यकानि अपराणि महत्त्वानि मूल्यानि प्रोक्तानि सन्ति ।

तेषु प्रथमं तृप्तिः - सर्वे जनाः स्वेच्छानुसारं धनं सङ्गृहीतुं न शक्नुवन्ति । एषा तु जीवनस्य वास्तविकी स्थितिः अस्ति । केचन समाजे अति धनिनः भवन्ति, अपरे च बहुधा निर्धनाः । केचन तु भाग्यवन्तः भवन्ति, उत्तमायान् सम्प्राप्य सुखिनः सन्ति । अन्येषाम् एतदसाध्यमेव । जीवने सर्वेषामपि अयमधिकारः भवति यत् - अधिकं धनार्जनम्, उत्तमज्ञानप्राप्तिः, तथा च समाजे श्रेष्ठं स्थानं च । परन्तु तदवाप्त्यै सर्वेषां शक्तिः समाना न भवति । अवसरः यद्यपि समानः न स्यात् । केचन जनाः, स्वभावतः, कलासङ्गीतविज्ञानादिविषयेषु चतुराः भवन्ति, अन्ये तथा नैव स्युः । तेन कारणेन एव मनुस्मृतिः मार्गं दर्शयति - प्रकृत्या, भगवता अपि यद् भवते दत्तं तेन सन्तुष्टः स्यात्, असन्तोषः अशान्तिपथं दर्शयेत् । यश्च परस्परं कलहस्य ईर्ष्यायाः कारणं भूत्वा अशास्त्रीयम् अनुचितं च आचरेत्, केवलं स्वेच्छापूर्त्यै अन्यायकूपेषु पतेत् । प्राप्तसम्पदा सन्तोषानुभवं विना अधिकं मूल्यवत् वस्तु न किञ्चित् विद्यते । अयमेव सुखीजीवनं जीवितुं सुनिश्चितः मार्गः ।

* * *

Digitization by Arya Samaj Charitable Foundation, Chennai

पञ्चमः अध्यायः

आधारभूतः सिद्धान्तः

धर्मः सदाचारः वा मानवस्य अधिकाभिलाषां नियन्त्र्य आनन्दमार्गं प्रददाति । पुरातनकालात् आचरितः, समयानुसारं विकसितः च नियमः व्यक्तेः समाजस्य शान्तेः सुखस्य च प्राप्त्यै आधारः आसीत् । ये च नियमाः मानवचर्यायाः प्रत्येकं क्षणमपि प्रोत्सहन्ते स्म । सङ्क्षेपतः यदि वदामः तर्हि – स एव धर्मः इति कथ्यते ।

यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः ।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ।। २-७ ।।

मनुना मानवेन आचर्यमाणानां समेषाम् आचारणनां व्यवहाराणाम् आधारभूतनियमानां पालनाय ये च मार्गाः उक्ताः ते सर्वेऽपि वेदेषु पूर्वमेव निर्दिष्टाः एव वर्तन्ते ।

सर्वं तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा ।
श्रुतिप्रामाण्यतो विद्वान्स्वधर्मे निविशेत वै ।।२-८।।

सत्यमेव शिक्षितः पुरुषः विधेः प्रत्येकं स्त्रोतस्य सूक्ष्मं ज्ञानदृष्ट्या अवश्यमेव परिवीक्षेत । आत्मनः कर्तव्यपालनम् अपि वेदोक्तनिर्देशानुसारं च कुर्यात् ।

श्रुति स्मृत्युदितं धर्ममनुतिष्ठन् हि मानवः ।
इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ।।२-९ ।।

यो हि पुरुषः स्वदैनिकजीवने धर्ममार्गम् अनुपालयेत् । सः जगति प्रसिद्धिं प्राप्नुयात् । मृत्योः परं शाश्वतं सुखमपि लभेत ।

वेदःस्मृतिःसदाचारःस्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुःसाक्षाद्धर्मस्य लक्षणम् ।। २-१२।।

वेदाः स्मृतयः सदाचाराः ते च विषयाः ये आत्मनः प्रियाः एते चत्वारः विषयाः साक्षाद्धर्मस्य लक्षणमिति वदन्ति ।

वेदाः स्मृतयः लिखिताः । तैः सर्वैः अपि पुरुषः धार्मिकं सिद्धान्तं ज्ञातुं

Digitization by Arya Samaj Charitable Foundation, Chennai

शक्नुयात् । कस्यामपि परिस्थितौ यत् आचरणं धर्मानुरूपं स्थापितं विद्यते सः नियमः अपि स्वीकार्य एव । परन्तु मनुस्मृतौ धर्मस्य महत्त्वं तथा उद्देशः च अन्तिमलक्ष्यरूपेण दर्शितः विद्यते । एतत् अन्तःकरणस्य निर्णयः भवति यत् आत्मना किं स्वीकर्तव्यं किं न स्वीकार्यं, कृत्वाऽपि स आत्मनि अनुचिन्तयेत् सः उचितमार्गे सञ्चलन्नस्ति वा उत न इति । परन्तु सः अन्तःकरणं न वञ्चयितुं शक्नोति। तस्मात् कः धर्मः कश्च अधर्मः इति विषयं निर्णेतुम् अयं मानदण्डः निश्चितः अस्ति । –

दशकं धर्मलक्षणम्

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ।। ६-९२ ।।

तृप्तिः, संयमः, धैर्यं, भौतिकसुखविषये अनपेक्षा, शौचम्, इन्द्रियवशगत्वं, बुद्धिः, ज्ञानं, सत्यकथनं क्रोधशून्यता एतानि धर्मस्य दश लक्षणानि ।

धर्मस्य सरलाः पञ्च सिद्धान्ताः ।

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।
एतं सामसिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः ।। १०-६३।

हिंसाभावः, सत्यकथनम्, अन्यायमार्गेण सम्पदसञ्चयः, अन्तर्बाह्यशुद्धिः, इन्द्रियाणां वशीकरणम् - एते पञ्च सर्वैः वर्णीयैः अनुसरणयोग्याः इति मनुः अगदत् -

धर्मानुसरणेन सुखं शान्तिः च लब्धुं शक्येते । तेन अन्यैः च अहिताचारैः आत्मानं रक्षेत् ।

सर्व प्रथमः अयं नियमः - मानवः अन्यजीविषु हिंसां न आचरेत् ।

द्वितीयः नियमः - सर्वोऽपि जनः दैनिकजीवने प्रामाणिकः स्यात् ।

तृतीयः नियमः - अस्तेयम् - अधर्ममार्गेण धनस्य संग्रहं न कुर्यात् । यदि स्तेयगुणः स्यात् अवश्यमेव सः चौर्यभ्रष्टाचारादि अनाचारगुणेषु उपलिप्तः स्यात् । अतः नरः इदमपि सदा चिन्तयेत् नाहम् अन्याय-अनैतिकमार्गेण धनम् अर्जयेयम् इति । तद्विरुद्धमेव स्तेयं नाम ।

चतुर्थः नियमः - शौचम् - प्रत्येकमपि पुरुषः कायेन मनसा वाचा, शुद्धतां परिपालयेत् । एतदेव अ न्तरङ्गशुद्धिः । (मनसः वचनस्य च शुद्धिः) कार्यशुद्धिः बहिरङ्गशुद्धिः । तस्य परिपालनमेव चतुर्थः नियमः ।

अस्य अयमर्थः - मनसि, वचसि, कर्मसु, सभ्यता, एवं पूर्णतया निष्क पटता स्यात् । मनसि वचसि काये पुण्यपीयूषपूर्णाः* इति हरेः वचनम् अपि

Digitization by Arya Samaj Charitable Foundation, Chennai

सङ्गच्छते । विचारः विभिन्नः आचारस्त्वपरः अयम् अधर्मः । तस्मात् विचार - व्यवहारे आचरणेषु सभ्यत्वं धर्मस्य सङ्केतः ।

इन्द्रियनिग्रहः - इन्द्रियाणां वशीकरणं नाम पञ्चमः नियमः बहुप्रधानः । मानवैः क्रियमाणाः सर्वेऽपि अपराधाः अरिषड्वर्गैः प्रेरिताः । तथा अबलेन्द्रियाणां कारणेनैव । अस्मात् हेतोः पुरुषः स्वम् अपरं च असन्तोषिणम् अशान्तमस्थिरं च करोति ।

साररूपेण यदि वदामः मानवचेष्टायाः प्रत्येकमपि क्षणः सदाचारयुक्तः स्यात् । यस्याः उद्देशः सम्पूर्णमानवानां शान्तिः, सद्भावः सुखप्रदानं च । धर्मः -न कोऽपि पन्थाः, यथा आंग्लभाषायां अनूदितम् । ये च ईश्वरम् आराधयन्ति तेषां तु पन्थाः । ईश्वरपूजा पद्धतिमात्रं भवति । असङ्ख्याः रीतयः । पन्थाः स्वीयाऽन्यतमा पद्धतिः भवति । पन्थाः मानवेषु भेदं जनयति । सः विभिन्नसम्प्रदायेषु विभिनक्ति । परन्तु धर्मः मानवानाम् ऐक्यं साधयति । धर्मः सर्वेषु मानवकुलेषु समानरूपेण संलग्नो भवति । कामं नरः कमपि सम्प्रदायं मन्येत ईश्वरे विश्वसिति वा न वा न कोऽपि सबन्धः अनेन । धर्मपदात् पूर्वं न कदापि हिन्दू इति पदं संयुक्तमासीत् । अयं शब्दः पश्चात् योजितः यदा विदेशी आक्रमणकारिभिः सिन्धूनदी प्रान्ते निवसतां जनानानां नाम हिन्दू इति कृतम् । एवं तेनैव कारणेन अयं देशः हिन्दूस्तानमिति नाम प्राप्नोत् । हिन्दु शब्दस्य इतिहासं विमृशामः तदा भारतम् उद्दिश्य हिन्दूस्तानम् इति कथितम् इव भाति ।

पण्डितेन नारायणेन स्वविख्यातकृत्यां हितोपदेशे अनुकरणीयशैल्यां मानवपश्वोः मध्ये किमन्तरमिति परिचर्चितम् विद्यते -

आहारनिद्रा भयमैथुनं च सामान्यमेतत्पशुभिर्नराणाम् ।
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः।। हितोपदेशः

आहारः निद्रा भयम् मैथुनम् इत्यादयः विषयाः पशुमानवयोः समानाः । केवलं धर्मः एव मनुष्यस्य विशिष्टः गुणः । धर्माचरणं विना मनुष्यः पशुभिः समानः ।

महानारायणोपनिषदि धर्मस्य विषये उल्लिखितमस्ति । धर्मः कुतो वा सर्वोच्चः इत्यपि चर्चितः ।

धर्मः पापमपनुदति, तस्माद्धर्मं परमं वदन्ति ।।

धर्मः विरुद्धविचारान् मनसि एव नाशयति, धर्मेण पापं विनश्यति अतः धर्मः सर्वोच्चः कथितः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

अस्य अयं स्पष्टार्थः - नरे बाल्यादेव यदि धार्मिकमूल्यं बोधितं स्यात् अस्य प्रभावः आजीवनं तिष्ठेत् । काम-क्रोध-लोभ-मद-मत्सरादीन् शत्रून् प्रतिरोद्धुम् अन्यतः एव बलं प्रवर्धितं स्यात् । धार्मिकाः विचाराः चलानाम् इन्द्रियाणां नियन्त्रणे क्षमताम् आवहति ये सर्वदाऽपि मनः प्रेरयति । धर्मप्रेरिताः विषयाः चलानि इन्द्रियाणि अपि संयम्य दुर्मार्गगमनात् नियन्त्रयन्ति ।

प्रत्येकमपि मानवे अन्तर्निहिताः दुष्प्रवृत्तयः यासां कारणेन दुर्मार्गगमनस्यापि शङ्का अधिका भवति । कस्यचन नरस्य अन्येन सह सद्भावस्थापनाय धर्मः गुणात्मकरूपेण साहाय्यं करोति । अस्मात् एव कारणात् मनुस्मृतिः वदति यत् धर्मस्य रक्षा एव स्वस्य रक्षा भवति । धर्मे नष्टे स्वस्य नाशः एव निश्चितः । प्रायः सुखप्राप्त्यर्थं मानवानाम् एतेन विना नान्यः प्रशस्तः पन्थाः स्यात् । स्मृतेः कथनस्य इदं तात्पर्यम् अस्ति यदि समाजे धर्मपरायणजनानां सङ्ख्या समधिका भवेत् तत्र सुखशान्तेः मनोहरं वातावरणं भवति । केचन एव जनाः भवन्ति ये नीतिविरुद्धं व्यवहारं करिष्यन्ति । ते प्राशासनिकपथा दण्डयितुं शक्यन्ते । यदि अधर्मे संलिप्तानां जनानां संख्या अधिका भवेत् तर्हि मानवसमाजः पीडितः स्यात् । साम्प्रतं वयं तादृशीमेव स्थितिं सर्वत्र पश्यामः । तेन कारणेन सम्प्रति परिवर्तनस्य एकः एव उपायः भवति धर्मभीरूणां नागरिकाणां निर्माणम्। न्यायाधीशः के रामस्वामी ए.आय.आर - १९९६ (९) एस.सी.सी. १७६५ खण्डः ६२ इत्यत्र सर्वोच्चन्यायालये ए एस् नारायणन् दीक्षितलु इत्यस्य आन्ध्रप्रदेशसर्वकारस्य विषये धर्मस्य व्यापकता मानवतायाः उपयुक्तसाहाय्यस्य सम्बन्धे च एवं वर्णितमस्ति ।

धर्मशब्दः तादृशः निर्देशः अस्ति यः आश्रयः, समर्थनम्, एवं सेवा रूपमर्थं च परिभाषते । यः समाजकल्याणं व्यवस्था तथा सामान्यजनानामपि मङ्गलं मानवोन्नतेः मार्गं प्रशास्ति । एष एव हिन्दूधर्मः अतः धार्मिकसिद्धान्तः छात्राणां मनसि विकासनीयः । यतः धार्मिकमार्गे चलन् मानवः जीवने आनन्दम् अनुभवेत् ।

***

Digitization by Arya Samaj Charitable Foundation, Chennai

षष्ठः अध्यायः

त्रिवर्गसिद्धान्तः

प्राचीनकालात् मध्ययुगं यावत्, तावदेव किम् अद्यापि अस्मिन् विषये अतिभाषणं चर्चा प्रचलति यत् मानवसमाजः केन वा विषयेण शान्तिं तथा सुखमवाप्नुयात् इति। तदर्थं किम् अतीवप्रधानं साधनम् ? मानवसमाजस्य सुखार्थं नियमितरूपेण धनव्ययः उचितः मार्गः भवेत् । उत वा समाजवादः साम्यवादो वा इति । दार्शनिकानां मनसि सर्वदापि अयं प्रश्नः उदेत् । अनेन समाजवादः साम्यवादस्य नाम्नि सर्वं विश्वं विभक्तम् अभवत् । अयं च विवादः मानवेषु सङ्घर्षम् उत्पाद्य तान् सर्वान् विभज्य अस्थापयत् ।

अस्य परिणामः अयम् अभवत् मानवान् दरिद्र-धनिक-भेदेन वर्गद्वये विभक्तम् अकरोत् । तस्मात् हेतोः सङ्घर्षः तथा दुःखं वर्धमानमस्ति । मनुस्मृतौ अयं विषयः द्वयोः श्लोकयोः वर्णितः - तत्समाधानमपि प्रदत्तम् ।

धर्मार्थावुच्यते श्रेयः कामार्थौ धर्म एव च ।
अर्थ एवेह वा श्रेयस्त्रिवर्ग इति तु स्थितिः ।। २-२२४ ।।
परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ ।
धर्मं चाप्यसुखोदर्कं लोकविक्रुष्टमेव च ।। ४-१७६ ।।

केचन जनाः एवं चिन्तयन्ति सुखप्राप्त्यर्थं धर्मः तथा धनमेव इच्छापरिपूर्त्यर्थं धनप्राप्तिः एव अभीष्टकामनालाभाय धर्मादीनां का आवश्यकता इति । अपरे आलोचयंन्ति केवलं धर्म एव अलम् यश्च धार्मिकः नूनमेव धनोपार्जनाय समर्थः इति । किन्तु परिपूर्णा धारणा इयमस्ति त्रिवर्गसिद्धान्ते अर्थात् - धर्मः (आचार संहिता) धनार्जनं तथा कामनापरिपूर्तिः एतेषु समवायः कश्चन स्यादेव। अस्य इदं तात्पर्यं - धनं तथा इच्छाप्राप्तिः धर्मविरुद्धा स्यात् तर्हि सा त्याज्या एव ।

एवं प्रकारेण मानवस्य प्रत्येकमपि आचरणं धर्ममूलं स्यात् । यदि मानवः वित्तोपार्जनं करोति सत्यमेव तस्य काश्चन इच्छाः सम्पूर्णाः भवन्ति । तदा

Digitization by Arya Samaj Charitable Foundation, Chennai

धर्मस्य पञ्च आधारभूतानि तत्वानि सः पालयेत् । यथा पूर्वस्मिन् अध्याये उक्तम् । त्रिवर्गसिद्धान्तस्य महत्वस्य अवगमार्थं धर्मः कः इति विषयः पूर्वं ज्ञातव्यः।

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।
एवं सामाजिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः ।। ६३ ।।

१. अहिंसा - अन्यान् प्रति मानसिक-शारीरकहिंसां न कुर्यात् ।

२. सत्यम् - सत्यकथनम् ।

३. अस्तेयम् अन्यायमार्गेण धनोपार्जनं न कर्तव्यम् । यथा घर्षण - लुण्ठन - वञ्चन - चौर्यादिभिः । व्यापारे अनुचितः लाभः अन्येषां शोषणम्, अनुचितसेवा-शुल्ककराकरणं व्ययेऽपि स्वसामर्थ्यात् अधिकं धनोपार्जनं, तन्माध्यमेन सामान्यानां शोषणम् ।

४. शौचम् - मनसि वचसि कर्मसु परिशुद्धभावः (त्रिकरणशुद्धिः)

५. इन्द्रियनिग्रहः - इन्द्रियाणां नियमनम् ।

मनुस्मृतिर्वदति - शान्तिस्तथा प्रसन्नता समवाप्त्यर्थं मानवः एतान् पञ्च गुणान् अवश्यम् एव अनुतिष्ठेत् ।

यथा पूर्वमेव विवृतमेतत् - ये च ऋषयः सन्तः धर्मसंस्थापकाः जीवनस्य समग्रं कल्याणं मनसि धारयन्तः धार्मिकान् नियमान् आरचयन् । एवं धर्मः उत्तमव्यवहारस्य सदाचारस्य अपि सिद्धान्तः । अयं तु मानवस्य सर्वविधचेष्टासु सहकारी वर्तते । विद्यार्थी, शिक्षकः, गृहस्थः, पतिः, पत्नी, पुत्रः, तपस्वी, नागरिकः एवं सर्वेऽपि कथं नियमानां पालनं कुर्युः इति अत्र संहितायां सम्यगेव उपदिष्टम् । इत्थं धर्मः मानवस्य प्रत्येकमपि गुणस्य विकासाय विद्यमाना काचित् आचारसंहिता । यस्याः पालनम् अनुसरणं च समाजसुखाय अपरिहार्यम् अस्ति।

उपरि प्रोक्ताः सर्वे सिद्धान्तबिन्दवः सुशिक्षितमानवसमाजस्य मूलाधाराः । धार्मिकाः निखिलाः ग्रन्थाः इदं वचनम् उद्घोषयन्ति धर्मः स एव भवति यः समग्रविश्वाय आश्रयं मङ्गलं वा ददाति ।

सर्वाः क्रियाकलपाः याश्च धर्मविरुद्धाः ताः अधर्मव्यवहताः, ताः व्यक्तयः तथा व्यवहाराः समाजस्य अहितकारिणः भवन्ति ।

शान्तिपालनाय सम्मिलितसात्त्विकजीवनोपायार्थं धर्माचरणम् आवश्यकम् ।

मनुस्मृतिः धर्मानुसरणार्थं मानवं जागरयन्ती उद्घोषयति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।
तस्माद्धर्मो न हन्तव्यो मानो धर्मो हतोऽवधीत् ।।८-१५ ।

धर्मः तान् अवश्यमेव रक्षति यः धर्मस्य रक्षां करोति । यः धर्मं नैवानुपालयेत् स तु स्वयमेव नश्यति । अतः वयं धर्मं न नाशयामः । परिणामतः नश्यतःस्वस्य परिरक्षणे समर्थाः भवेम । उपर्युक्तवाक्ये उक्तः सिद्धान्तः महत् अर्थम् आवहति । सामान्ये च अस्मिन् कथने शासनाधारित-अधिकारसिद्धान्तस्य अवधारणायाः व्याख्यानं लभ्यते । अयं विषयः अमुं सन्देशं प्रेषयति कोऽपि सुव्यवस्थितः समाजः तदा एव जीवितः स्यात् यत्र समाजस्य सर्वोऽपि जनः धर्मशास्त्रसिद्धान्तान् उक्तरीत्या पालयेत् । तदा तत्र सर्वेषामपि तत्तत्सम्प्रदायावलम्बिनाम् अधिकारः परिरक्षितः भवति ।

धार्मिकसिद्धान्तस्य अर्थः –

मानवः, स्वस्य व्यवहारस्य नियन्त्रणं, सर्वेषां हितं मनसि निधाय कामनासु सीमितताायाः सम्पादनं च कुर्यात् । एवं तादृशसिद्धान्तम् अनसरतः समाजस्य एतत् दायित्वं भवति यत् सामाजिक-नैतिक-संस्थानां परतः व्यक्तेः सुरक्षाप्रदानम् । सङ्क्षेपतः यदि वदामः तर्हि –

धर्मः, व्यक्तिः-समाजः इत्युभयोः दायित्वं तथा तयोः सन्तुलनां स्थापयति । अतः धर्मस्य रक्षणं व्यक्तेः समाजस्य च हिताय भवति । मनुस्मृतिः नः प्रेरयति- धर्मं मा जहि येन भवान् अपि आत्मानं रक्षेत् । शान्तिः मिथः अस्तित्वं सुखम् उन्नत्यर्थं धर्मराज्यस्य सदैव आवश्यकता भवति। यस्मिन् राज्ये धर्मपरायणानां नागरिकाणां सङ्ख्या अधिका भवेत् तत्र शासनसिद्धान्तः व्यवस्थितरूपेण भवति । यत्र स्वाभाविकरूपेण शासनं विरुद्ध्य कार्यं कुर्वतां सङ्ख्या अधिका स्यात् तत् राज्यं निश्चयेन विनष्टं भवति ।

तैत्तरीयोपनिषदि इदं दृढीकृतं वर्तते –

युवा स्यात् साधु युवाऽध्यायकः । आशिष्टो द्रढिष्ठो बलिष्ठः ।
तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् । स एको मानुष आनन्दः ।।

युवानः विद्वांसः चरित्रवन्तः दृढनिश्चयाः शरीरिक-मानसिक दृष्ट्या सशक्ताः स्युः । तदैव पृथ्वी सम्पत्पूर्णा सुसम्पन्ना वा स्यात् । सः एव मानवसमाजस्य आनन्दस्य मानदण्डः ।

अयं (मन्त्रः) अवश्यमेव सत्प्रेरणादायी अस्ति । यस्मिन् राष्ट्रे समुचितशिक्षा-वातावरणेन सङ्ख्याकाः चरित्रवन्तः स्वस्थां यावन्तः जनाः निवसेयुः तत्रैव प्रसन्नता एवं प्रगतिः भवेत् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

अधुना तु बहुषु राष्ट्रेषु वैज्ञानिकप्रगतेः आधारेण भौतिकी समृद्धिः तु सम्प्राप्ता। परन्तु मानसिकदौर्बल्यहेतोः अतिक्षोभेण निराशया भीषणसमस्याम् अनुभवन्ति सन्ति राष्ट्राणि । युवसु अपराधिनां सङ्ख्या वर्धमाना दृश्यते । तथा चारित्र्यमपि नश्यदस्ति । तेषु सामान्यातिसामान्याः अपि अहितमार्गमनुसरन्तः श्रमादधिका लाभप्राप्तिप्रवृत्तिः सर्वत्रावलोक्यते ।

अस्माकं राष्ट्रे, विशेषतः समस्तं विश्वमवलोकयामः तर्हि स्थितिः महती चिन्तादायिनी इति भासते । यथा यथा विज्ञानं प्रगतिपथे अग्रे सरद्भवति तस्मिन्नेव पथि विज्ञानस्य नाम्नि मानवतायाः विनाशकरणस्य कार्यमपि वर्धमानमेव वर्तते । अनेन ज्ञायते यत् धर्मस्य सम्यग् ज्ञानं विना विज्ञानस्य प्रयोगेण स्वार्थः तथा दुराशा एधमानाऽस्ति । अस्य कुपरिणामस्य फलमिव अनैतिकता भष्टाचारः हिंसाचरणबुद्धिः केन्सर् एड्स् इत्यादि महारोगवत् सर्वत्र प्रसरन्ती विद्यते । यः राष्ट्रहितेन सह मानवतायै हानिकारकमस्ति ।

अस्यां स्थितौ आत्मनः सुरक्षार्थम् एकः एव पन्थाः अवशिष्टः वर्तते तत् त्रिवर्गसिद्धान्तस्य पुनरुज्जीवनम् । यः अस्माकं राष्ट्रिय-धार्मिकं मूल्यं परिरक्षन् समग्रविश्वस्य शान्तिमिच्छन् - सात्विकं सिद्धान्तं समग्रे जगति प्रतिष्ठापयेत् ।

* * *

Digitization by Arya Samaj Charitable Foundation, Chennai

सप्तमः अध्यायः

महिलाः प्रति सम्मानः

मनुस्मृतिः आदिशति-महिलाभ्यः यावत् जीवं सुरक्षा-सम्मानः च मिलेत्। अस्मिन् विषये अयं श्लोकः प्रासङ्गिकः स्यात्।

पितृभिर्भर्तृभिश्चैताः पतिभिर्देवरैस्तथा।
पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः ।।३-५५।।

स्त्रियः तासां पित्रा, भ्रात्रा पत्या देवरेणापि सदा गौरवेण द्रष्टव्याः। ये च आत्मनः कल्याणेच्छवः भवन्ति।

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ।। ३-५६।।

यत्र स्त्रीणामादरः सम्मानो वा स्यात्तत्र देवताःसर्वदा निवासं कुर्वन्ति। अर्थात् देवः सर्वकर्मसु सहायकृत्। यस्मिन् भवने स्त्रीणामनादरो भवेत् तत्र न कापि क्रिया फलदायिनी भवेत्।

शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम्।
न शोचन्ति तु यत्रैताः वर्धते तद्धि सर्वदा ।। ३-५७।।

यस्मिन् गृहे महिलाः दुखमयं क्लेशमयमनुभवं लभन्ते तस्य समग्रस्य परिवारस्य नाशः आशु निखितः भवति। यत्र तासामादरः तद्वहं प्रत्यहमपि अभिवर्धते।

जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः।
तानि कृत्याहतानीव विनश्यन्ति समन्ततः ।।३-५८।।

यस्मिन् गेहे महिलाः आदरं न लभन्ते क्षणे क्षणे अपि पीडिताः च भवेयुः तासां शापेन इव तद्गृहं समूलं नाशं गच्छति यथा तन्त्रकर्मणा (कृत्या) गृहं विनष्टं भवति।

तस्मादेताः सदा पूज्याः भूषणाच्छादनाशनैः।
भीतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च ।।३-५९।।

यश्च पुरुषः स्वकल्याणं सर्वदा अभिलषति अवश्यमेव तेन स्त्रीः आदरेण

Digitization by Arya Samaj Charitable Foundation, Chennai

द्रष्टव्या । कदाचित्ताभ्यः समये समये कार्येषु विश्रान्तिं प्रदाय पर्वसु आभूषणादीनि सुमूल्यानि वस्तूनि (प्रदाय) स्वादिष्टभोजनादिभिः च परितोषणीयाः ।

सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च ।
यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् ।।३-६०।।

यत्र गृहे पतिः पत्नी च परस्परमुत्तमव्यवहारेण सन्तुष्टौ तद्गृहं सदापि मङ्गलवातावरणेन भूषितं भवति । अर्थात् तदेव साधुगृहस्थानां लक्षणमिति यावत् ।

स्त्रियां तु रोचमानायां सर्वं तद्रोचते कुलम् ।
तस्यां त्वरोचमानायां सर्वमेव न रोचते ।।३-६२।।

यस्मिन् गेहे महिलाः आनन्देन भूषणवस्तूनां धारणेन सुखमयजीवनं यापयन्ति तत् गृहं मङ्गलमयमस्ति । यदि ताः सुखिन्यः न दृश्यन्ते तर्हि तत् गृहमवश्यमेव अमङ्गलं स्यात् ।

सुवासिनीः कुमारीश्च रोगिणी गर्भिणीः स्त्रियः ।
अतिथिभ्योऽग्र एवैतान्भोजयेदविचारयन् ।।३-१४।।

नवविवाहिताः (ऊढाः) पुत्र्यः कुमार्यः रोगपीडिताः गर्भवत्यः यदि गृहे भवेयुः अतिथीनां कारणेन तासां भोजने विलम्बः भवेत् तर्हि अतिथिभ्यः पूर्वमेव एताः भोजयेयुः ।

एते सर्वेऽपि श्लोकाः मनुस्मृतौ महिलाः प्रति प्रदत्त सम्मानमुद्दिश्य अस्मान् प्रबोधयन्ति । गृहस्थाश्रमस्य एतत् सामान्यं कर्तव्यमस्ति । सः सर्वप्रथमं अतिथिं भोजयेत् पश्चात् गृह-स्वामी- पत्नी- परिवारसदस्यान् च । परन्तु एषा व्यवस्था इमं विचारं दृढीकरोति, युवती यस्याः विवाहः किञ्चित्समयात्पूर्वं समाप्तः पुत्रवधूः एवं गर्भवती वनिता एताभ्यः तावत्-महत्त्वं दत्तमस्ति ताः अतिथिभ्यः पूर्वमेव भोजयितव्याः । परिवारस्य शान्त्यर्थं प्रसन्नताकारणेन च एषः विषयः ताः प्रति सम्मानभावनायाः अभिव्यक्तीकरणमेव ।

संयुक्तपरिवारस्य सम्पत्तौ पुत्र्याः अधिकारः ।।

स्वेंभ्योंऽशेभ्यस्तु कन्याभ्यः प्रदद्युर्भ्रातरः पृथक् ।
स्वात्स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सवः ।। ९-११८।।

सर्वेऽपि भ्रातरः स्वसम्पत्तौ चतुर्थांशं (पादं) स्वाविवाहित अनुजायै / अग्रजायै दद्युः । यदि ते न ददति पातकिनः भवेयुः ।

जनन्यां संस्थितायां तु समं सर्वे सहोदराः ।
भजेरन् मातृकं रिक्थं भगिन्यश्च सनाभयः ।।९-१९२।।

Digitization by Arya Samaj Charitable Foundation, Chennai

मातुः मृत्योः पश्चात् तस्याः सम्पत् पुत्रेषु अविवाहितपुत्रीषु च समानरूपेण विभक्तव्या ।

तथा सर्वैः स्वस्वभागे एकैकं पादं स्वाविवाहिताग्रजायै प्रदातव्यम् भवति ।

स्त्री-धनं

यद्यपि स्त्रियः संयुक्तपरिवारस्य सदस्या इति मानिताः भवन्ति । किन्तु सा संयुक्तकुटुम्बस्य सम्पदः संयुक्त-अधिकारिणी इति नैव परिगृह्यते। अविवाहितपुत्र्याः संयुक्तसम्पत्तौ असंयोजनं तत्समयस्य सामाजिकव्यवस्थानुरूपं स्यात् । यत्र विवाहानन्तरं पुत्रीणां तत्परिवारेण सह सम्बन्धः समाप्तिं याति । सा तु पतिगृहस्य अविभक्तमङ्गं भवति । महिला स्वपतेः परिवारस्य संयुक्तसम्पत्तौ सम्मिलिता न भवेत् । अतः स्त्रीधनस्य विषये महिलाहितं सुरक्षितुं विशेषः नियमः कृतः अस्ति । महिलायाः स्थानं पोषयितुमेषःक्रमः। उक्तावकाशः अग्रे गत्वा स्त्रीधनविषये अधिकां चर्चां विधातुं एषः प्रशस्तः सङ्कल्पः इति ज्ञायते ।

स्त्रीधनं - अस्य किं तात्पर्यम् ?

अध्यग्न्यध्यावाहनिकं दत्तं च प्रीतिकर्मणि ।
भ्रातृ-मातृपितृप्राप्तं षड्विधं स्त्री धनं स्मृतम् ।।९-१९४।।

विवाहसंस्कारात् पूर्वं अथवा विवाहसन्दर्भे कन्यायै तस्याः मात्रा, पित्रा च स्नेहस्य तथा प्रेम्णःवा प्रतीकत्वेन दीयमानं धनं स्त्रीधनम् इति नाम्ना प्रसिद्धमासीत्। (याज्ञवल्क्य-२-१४३-१४४)

पितृमातृपतिभ्रातृ दत्तमध्यग्न्युपागतम् ।
आधिवेदनिकाद्यं च स्त्रीधनं परीकीर्तितम् ।।
बन्धुदत्तं तथा शुल्कमन्वाधेयकमेव च ।
अतीतायामप्रजसि बान्धवास्तदवाप्नुयुः ।।

विवाहस्य समये पितृभ्यां भ्रात्रा च बन्धुभिः यद्धनं दत्तं उत द्वितीयपत्न्याः अवाप्तेः पूर्वं पत्याऽपि दीयमानं धनं विवाहानन्तरं बान्धवैः प्रदीयमाना सम्पत्तिः अपि स्त्रीधनम् इति कथितम् ।

मनुस्मृतौ इदं स्पष्टतया उक्तं यत् कन्यायाः विवाहसमये यस्याः पितृभिः भ्रातृभिश्च दत्तं धनं स्त्रीधनं भवति महर्षिः याज्ञवल्क्यः उद्घोषितवान् विवाहसमये कस्मादपि प्राप्तं धनं पत्युः द्वितीयविवाहसन्दर्भे च प्राप्तं धनं विवाहानन्तरं समवाप्ता सम्पदपि स्त्रीधनम् इति।

उपर्युक्ताः विषयाः स्पष्टं वदन्ति, मनुस्मृतौ स्त्रीभ्यः श्रेष्ठं स्थानं दातव्यं, आर्थिकसंरक्षणमपि प्रदेयमिति । तादृशी व्यवस्था स्मृतिग्रन्थे सुस्पष्टमवेति

Digitization by Arya Samaj Charitable Foundation, Chennai

ज्ञायते ।

मनुस्मृतेः अनुचितनिन्दा ।

मनुस्मृतेः एकः श्लोकः । तच्छ्लोकमवलम्ब्य इयं स्मृतिः स्त्रीः विरुद्ध्य अधिकान्विरुद्धविचारान्वदति इति सर्वे तां स्मृतिं निन्दन्ति ।

पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
रक्षन्ति स्थविरे पुत्राः न स्त्री स्वातन्त्र्यमर्हति ।। ३।।९-३।

स्त्रियः कौमार्ये पिता रक्षति, विवाहानन्तरं भर्ता ताः पालयति, वृद्धावस्थायां पुत्राः पलयन्ति महिला कुत्रापि कस्मिन्नपि समये एकाकिनी एव न जीवेत् ।

अस्मिन् श्लोके केवलमन्तिमं भागमेव पश्यन्तः मनुस्मृतेः निन्दां कुर्वन्तः बहवोऽत्र लभ्यन्ते । कथयन्ति च मनुस्मृतिः इममेव साधयति स्त्रियः आजीवनं पुरुषाणां दासाः भूत्वा एव जीवेयुः इति ।

एतत् सत्यं न । एषः तु सामान्यो नियमः यश्च तादृशान् परिवारान्विहाय , ये असभ्याः असंस्कृ ताः विविधव्यसनेषु विलीनाः एवेत्थं व्यवहारं कर्तुमीहन्ते। प्राचीनकालेऽपि बहुषु परिवारेषु महिलानां गौरवस्थानमवश्यमेवासीत्। बहुष्ववसरेषु तासां मार्गदर्शनं सूचनां च अन्ये गृहसदस्याः शृण्वन्ति स्म । तथा च गृहे भविष्ये भवितव्यानां कार्याणामपि सुनियोजनं (प्रबन्धम्) अपि ताः एव कुर्वन्ति स्म । अत एव उपरि निर्दिष्टश्लोकस्य अयमर्थः कथनीयः महिलाभ्यः इयमावश्यकता अस्ति, तथा एतत् तासामधिकारश्च, ताभ्यः भिन्नभिन्नास्ववस्थासु सुरक्षा प्रदातव्या । इथं च पितुः पत्युः तथा पुत्रस्य चैतद्दायित्वमस्ति क्रमशः ते प्रत्येकं स्तरे सन्दर्भे च पुत्री-पत्नी-मातुः च सेवां कुर्युः । यदि एवं तेषां कर्तव्यं वयमालोचयामस्तर्हि-पितुः इदं कर्तव्यं भवति सः पुत्र्याः आवश्यकता वा इच्छानुसारं शिल्प-कला तथा सङ्गीतं इत्यादिभिः अन्यविषयैः समस्तशिक्षायाः व्यवस्थां कुर्यात् । समये तस्याः विवाहः अपि स्यात् । तत् पश्चात् तासां संरक्षणस्य भारः तस्याः पतिः वहेत्। वृद्धावस्यायां इदं दायित्वं पुत्राणां भवति। वस्तुतः शिशूनां पालने यावत् सावधानता आवश्यकी तावदेव सावधानता वृद्धमातापित्रोः पालनेऽपि भवेत् । तथापि महिलाभ्यः विशिष्टाव्यवस्था कृता वर्तते । अतः एतस्य श्लोकस्य अयं शुद्धार्थः - पिता, पतिः, पुत्रश्च क्रमशः पुत्री, पत्नी तथा मातुः पितरि पत्यां पालनपोषणयोः दायित्वं वहेयुः । एषः महिलानां परावलम्बनं अथवा ताः स्वाधीनं कृत्वा प्रभुत्वप्रदर्शनं नास्ति । तदा इत्थं न व्याख्यातव्यं -महिलाः शैशवे पितुः विवाहनन्तरं पत्युः एवं वृद्धावस्थायां पुत्रस्य दासी भूत्वा आजीवनं पराश्रयिणी भूत्वा जीवति इति एषा तर्कहीनः अस्वीकार्यः

Digitization by Arya Samaj Charitable Foundation, Chennai

विचारः एव ।

अन्यानि अपि उपयुक्तोदहरणानिअमुं विचारं पुष्टीकुर्वन्ति । प्राकृतिकरूपेण महिलाः कोमलाः एव । यासां सुरक्षायाः आवश्यकता वर्तते ।

उदा - कश्चिदपि पुरुषः स्वपुत्रमध्ययनार्थं बहिः प्रेषयेत् । परन्तु अयमेव नियमः पुत्रीभ्यः समन्वितो न भवति । सामान्यतः पुत्र्याः विषये एतदसाध्यमेव। यदि पिता एवं कुर्यात्तर्हि स तु कर्तव्यभ्रष्टः इति समाजः तं कथयेत् । तस्याः पालनपोषणार्थं सुरक्षा तथा शिक्षाव्यवस्थायै विशिष्टप्रबन्धः भवेत् ।

कश्चित् पिता उच्चशिक्षार्थं स्वपुत्रं दूरदेशं प्रेषयितुमिच्छति । तद्व्यवस्थार्थं तत्सम्बद्धजनेभ्यः स्वपरिचयपत्रप्रदानमेवालम् । परन्तु एतादृशी व्यवस्था पुत्रीणां कृते असाध्यमेव। यद्यपि सभ्यसमाजेऽपि पिता केवलं परिचयपत्रप्रदानेन स्वपुत्रीं न कस्यचन बन्धोः गृहे त्यक्त्वा सुखेन निद्रातुं शक्नुयात् । स्वाभाविकतयैव एषः असम्भवः अनुचितः कर्तव्यहीनता इत्येव चिन्तनीयमापतति। यदि पुत्रीमुन्नतशिक्षार्थं कुत्रापि दूरं प्रेषयितुमिच्छति तदा पिता पुत्र्या सह तत्र गत्वा कञ्चित् कालं तत्र स्थित्वा वास-भोजनपानादिव्यवस्थां कृत्वैव पुनरागच्छेत् । स्त्रीपुरुषयोः मध्ये इदमेवान्तरम् । अन्य एकः दृष्टान्तोऽपि दृश्यते । अस्माकं देशे अधिकसङ्ख्यायां निर्धनच्छात्राः वर्तन्ते । तेषां गृहे विद्युतः व्यवस्था प्रायः न भवति । ते पठितुं वाञ्छन्ति। परन्तु अवकाशेन सौलभ्येन वा वञ्चिताः सार्वजनिकस्थानेषु उद्यानेषु वा लभ्यमान-प्रकाशस्य-प्रदीपस्य वा साहाय्येन मध्यरात्रं यावत् पठित्वा गृहमागच्छेयुः । किमेवं बालिकाः वाञ्छन्त्यः अपि कर्तुं शक्नुवन्ति । नु एषः दृष्टान्तः केवलं उदाहरणमात्रं प्रदत्तोऽस्ति । एवमेव अनेकाः परिस्थितयः सन्ति । यत्र महिलानां-बालिकानां परिरक्षणं, तदर्थं कापि समाजिकी व्यवस्था तभ्यः आवश्यकी एव ।

विशाखा विषये राजस्थान सर्वकारस्य (१९९७) (६) एस् सी सी २४१ इति प्रकरणे सर्वोच्चन्यायलयः इमं पक्षं एवं सुदृढीकृतवान् । कैश्चित् सामाजिककार्यकतृभिः तथा वैयक्तिकसङ्घटनेन वा न्यायालये जनहितयाचिका स्थापिता अवर्तत । येषु कार्यालयेषु स्त्रियः कार्यनिरताः भवन्ति । तत्र शारीरिकोत्पीडनादिभिः ताः रक्षितुं न्यायालयेन सर्वकारः निर्दिष्टः, स्त्रीणां रक्षणं सर्वकारस्य दायित्वं स्यात् । परन्तु महिलानामेतादृशोत्पीडनैः परिरक्षितुं सर्वकारस्य सकाशे न कोऽपि नियमः न कश्चिदुपायो वा आसीत् । परन्तु सर्वोच्चन्यायालयः विषयस्य गम्भीरतामालक्ष्य सर्वकाराय महिलानां परिरक्षार्थमादेशमयच्छत् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

निर्णयप्रदानसन्दर्भे सर्वोच्चन्यायालयः अमुं विषयं मनसि धारयन् - महिलानामुपरि भूयमानसर्वविधानाचारान् दूरीकर्तुं अन्ताराष्ट्रिय सम्मेलनस्य धारा ११ (एकादशस्य) उल्लेखमपि कुर्वन् आदेशं प्रायच्छत् ।

निर्णयस्य प्रासङ्गिकभागः कथयति - सी.ई.डी.ए डब्ल्यू इत्यस्य धारा ११ तमे सामान्यानि अनुशासनानि इमानि, उद्योगिनां हिंसारहितस्थितिः, समानताच (उद्योगसन्दर्भे न हिंसा तथा सर्वेषु समानता) ।

२२) यत्र स्त्रियः कार्यरताः भवन्ति, तत्र शारीरिकोत्पीडनं विनैव समानता समानेतव्या ।

२३) अशोभनीयः कामुकव्यवहारः शरीरसम्पर्कः, अश्लीलसम्बोधनं कामोत्तेजकचित्राणां प्रदर्शनं भाषाव्यवहारेष्वपि कामोत्तेजनादिपदानां प्रयोगः एते सर्वे विषयाः शरीरोत्पीडनश्रेण्यामागच्छन्ति । एतानि सर्वाण्यप्याचरणानि अपमानजनकानिस्वास्थ्यं तथा सुरक्षासंबन्धविषयेषु समस्यामुत्पादयन्ति । एषः भेदः तदा उत्पन्नो भवति यदा स्वकार्यालयस्य परिसरे महिलाभ्यः आत्मरक्षार्थं विश्वासपूर्णं वातावरणं न स्यात् । कदाचिदेतादृशसन्दर्भे तासामुद्योगे पदोन्नतावपि बाधा समापतेत् । अतः संस्थासु तासामसन्तोषस्योद्घाटनार्थं च कापि व्यवस्थाऽपि स्यात् ।

(२४) राज्यानि अपि स्वप्रतिवेदने महिलाः प्रति उत्पीडनाधारित-काठिन्यानामपि विषयाणां तत्सूचनायाः समावेशं कुर्युः । अन्यविषयेष्वपि उत्तमसुरक्षाप्रबन्धः स्यात् तथा महिलानां कार्यस्थले भूयमानाः हिंसाः अपि कठोरतया प्रतिरूद्धाः स्युः ।

न्यायालयः अग्रेऽपि अवदत्- यद्यपि भारतसर्वकारः अन्ताराष्ट्रिय सम्मेलने (२५-६-१९९३) निश्चितवान् यत् महिलानां तासां कार्यक्षेत्रे पूर्णतया सुरक्षाप्रदानं तस्य राज्यसर्वकास्य दायित्वमिति ।

अस्य निर्णयस्य स्पष्टः निर्देशः कः? अस्य अयमेव निष्कर्षः आयाति - महिलाभ्यः तासां कार्यस्थले पूर्णतया सुरक्षा अपेक्षिता । किमेतदापत्तिजनकमिति वदामो वा नूनं नैवेत्युत्तरम् । स एव भावः उपरि मनुस्मृतेः श्लोके निर्दिष्टः विद्यते । अस्यायमर्थः - दुष्प्रवृत्तिवद्भिः पुरूषैः स्त्रियः रक्षिताः स्युः । तद्दायित्वं क्रमशः पिता, पतिः पुत्रः अपि निर्वहेयुः । सम्प्रति आधुनिकसमाजे अत्यधिकसंख्यायां स्त्रियः उद्योगनिरता । अन्ताराष्ट्रिय्र सम्मेलनं तथा सर्वोच्च न्यायालयस्य उपर्युक्तनिर्णयःअपि घोषयति - एतत् नियोक्तुः दायित्वमस्ति, सः महिलानां तासां कार्यस्थलेषु सर्वविधसङ्क्लष्टानां सुरक्षां प्रदद्यात् । यदि इदं

Digitization by Arya Samaj Charitable Foundation, Chennai

दायित्वमुपरि कथितश्लोकेन संयोजनं कुर्मः तर्हि – सः इत्थं पठितः स्यात्
पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
रक्षन्ति स्थविरे पुत्राः कार्यक्षेत्रे च स्वामिनः ।।

विवाहं यावत् पिता पुत्र्याः रक्षणं कुर्यात्, विवाहानन्तरं पतिः पत्न्याः रक्षणं कुर्यात्, पुत्रः वृद्धावस्थायां मातरं रक्षेत् नियोक्ता च कार्यस्थले स्त्रीः पालयेत् ।

अतः मनुस्मृतौ उद्धृतस्य श्लोकस्य वस्तुतः अयमेव अर्थः न तु अतिरिक्तः। सर्वदापि स्त्रियं समाजे दासी इति जनाः पश्यन्ति इति । तादृशः निर्देशः नास्त्येव।

यदि महिलाः पुरूषा इव स्वतन्त्राः भूत्वा समाजे सञ्चरेयुः तर्हि तासामुपरि विभिन्नाः शारीरिकमानसिक उत्पीडनानि स्युः प्रकृतिप्रदत्ताः केचनभेदाः भवन्ति। इदमेव मनुस्मृतेः श्लोकस्य तात्पर्यम् । अस्यायमर्थः न स्यात् महिलाः सदा परतन्त्राः, स्वावलम्बिन्यः न भवेयुः इति । अन्यत्र च स्मृतिकारः अपरं श्लोकं उदाहरति – यत्र महिलाः अपमानिताः भवेयुः वा तासां अश्रवः यत्र पतेयुः सः समूलं नष्टो भवेत् । अतः अनेन ज्ञायते मनुस्मृतौ स्त्रीभ्यः सर्वोच्चसंम्मानः प्रदत्तत्तोऽस्ति इति । यथा –

उपाध्यायान्दशाचार्य आचार्याणां शतं पिता ।
सहस्त्रं तु पितृन्माता गौरवेणातिरिच्यते ।।

उपाध्यायात् (शिक्षिकः यः वेतनाधारिताध्यापनं करोति) आचार्यः दशगुणं पूज्यः आचार्यापेक्षया पिता शतं गुणैः पूज्यः पितुरपेक्षया माता सहस्त्रं गुणैः पूजिता (श्रेष्ठा) अस्ति ।

उभयोः श्लोकयोः तुलनात्मकाध्ययनेन एतदिङ्गितं भवति –

प्राचीनकालादपि स्त्रियः उच्चस्थानेष्वेवासन् । शिक्षकादपेक्षया आचार्यः आचार्यापेक्षया पिता पितुरपेक्षया माता एवं उत्तरोत्तरं बलीयत्वं दृश्यते । तस्मात् माता सर्वश्रेष्ठा एव – महाभारतेऽपि यक्षप्रश्ने – ''माता गुरूतरा भूमेः'' इति मातुः स्थानं सर्वदोत्कृष्टमिति वर्णितम् । अस्य नूनमयमेवार्थो भवति – महिलाभ्यः संमानः सुरक्षाऽपि समाजे स्यात् । ताभ्यः सुरक्षाप्रदानं मानवीयता एवं कर्तव्याधारिताव्यवस्था एव। तस्मात् कारणात् सर्वैरपि एतन्मन्तव्यमस्ति केनापि प्रकारेण स्वातन्त्र्यार्थं बाधा भवति इति। एवमनेकानि उदाहरणानि मनुस्मृतौ प्रोक्तानि वर्तन्ते यानि महिलानां स्वतन्त्रसबलीकरणमेव पोषयति ।

मनुस्मृतौ महिलानां विषये विभिन्नकथनावसरेषु एकः अयमवसरः– सामाजिकव्यवस्थायां पुत्री विवाहानन्तरं स्वपतेः परिवारस्य सदस्या भवति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

266 BVBSBMV

जन्मनः आधारेण स्वपितुः सम्पत्तौ तस्याः अधिकारो न भवेत् । तद्विना प्रत्येकमपि व्यवस्था महिलाया : कृतं वर्तते । एषा विशिष्टा व्यवस्था स्मृतौ वर्तते ।

अत्रोक्तानां श्लोकानां यः सारः तस्य अन्या व्याख्या नावश्यकी । परिवारस्य सुखशान्त्यर्थं महिलाभ्यः समानः अधिकारः देयः एव । एतदेवात्र दर्शितम् । एका ब्रिटिश महिला लेखिका स्वग्रन्थे (दि एसेन्शियल् टीचिङ्ग् आफ् हिन्दूईजम्) उक्तवती - तदत्र उल्लेखं कुर्मस्तर्हि स्वष्टं स्यात् -

हिन्दुत्वे महिलानां रक्षा एतदर्थं न भवतु यत् ताः निकृष्टाः असमर्थाः परन्तु तासां सम्माननमेतदर्थं भवति - ताः स्वगृहस्य आधारस्तम्भाः । ताः समाजस्य बलं तथा गौरवस्य आधारभूमयः । यथा अत्यधिकभूषणवस्तूनि असुरक्षितानि न भवन्ति-तथैव महिलाःअनर्घरत्नानि एव। महिलाः अनेकानि सामाजिकदायित्वानि निर्वहन्ति । अपत्यप्राप्तिः तेषां पालनपोषणं गृहस्य तथा धार्मिककार्याणां निर्वहणमित्यादि । पुत्रेभ्यः संस्कारप्रदानमपि तासामन्यतमं दायित्वम् । अतः धनसङ्ग्रहादि (कार्यंकुवन्त्यः) अतिरिक्तभारः ताभ्यः नैव देयः । (खण्ड -१३८) ।

केरी ब्राउन् महिलाभ्यः दीयमानायाः प्रधानभूमिकायाः-विषये सम्यक्तया विश्लेषयति । अत्र कोऽपि सन्देहः नास्ति यत् समयः सदा परिवर्तनशीलः । अधुना तु वनिताः व्यापारे राजकीये प्रशासने तान्त्रिकादिकार्यालयेषु किमुत न्यायाधिकरणे तथा न्यायाधीशा भूत्वाऽपि कार्यं कुर्वन्त्यः सन्ति । एतदपि सत्यमेव सर्वेषु क्षेत्रेषु तासां स्थानमबाधितमेव तथापि ताः प्रति अत्याचारः बलात्कारादि अपराधाः प्रत्यहं वर्धमानाः एव सन्ति । अतः महिलाभ्यः प्रतिक्षणं प्रतिस्तरं सर्वेषु वयस्सु च सुरक्षा प्रदेया अस्ति ।

इत्थं मनुस्मृतौ मनुना प्रदर्शिताः मार्गाः महिलानां सुरक्षाविषये अवश्यमेवानुपालनीयाः । सदापि ते अपरिहार्याः उपयोगिनः च ।

***

Digitization by Arya Samaj Charitable Foundation, Chennai

अष्टमः अध्यायः

पतिः पत्नी पारिवारिकजीवनधर्मः च

पतिः तथा पत्न्याः सम्बन्धे पवित्रता विवाहे भवति । उभयोः सम्बन्धे अविच्छिन्नधर्म एव आधारः इति वदन्ति । मनुष्याणांमृणमथवा चतुर्णां दायित्वानां सिद्धान्तेनास्य उत्पत्तियस्मात् सामाजिकजीवनस्य निर्माणं भवति ।

धार्मिकानुष्ठानं, अन्यधर्मिककार्याणां साहाय्येन सेवायोग्य जनानामुपकारः पीडितानामसहायानामपि सहाय्यम् विधाय देवर्णाम्मुक्ताः भवितुमर्हन्ति । एतादृशानि कर्माणि दम्पती मिलित्वा एव कुर्वेताम् । अस्य आदेशस्य पालनं सम्प्रत्यपि भवदस्ति ।

प्रजनार्थं स्त्रियः सृष्टाः सन्तानार्थं च मानवाः ।
तस्मात्साधारणो धर्मः श्रुतौ पत्न्या सहोदितः ।। ९-९६ ।।

विधाता स्त्रीः जननी इति पवित्रं नाम प्राप्तुम् एव असृजत् पुरूषाणां संरचनां पिता भवितुम् । अतः वदेषु सर्वे धार्मिककार्यक्रमाः पत्न्या सह एव पतिः कुर्यादिति निर्देशः दत्तो वर्तते ।

।। दम्पत्योः मध्ये पवित्रः सम्बन्धः ।।

देवदत्तां पतिः भार्यां विन्दते नेच्छयात्मनः ।।
तां साध्वीं बिभृयान्नित्यं देवानां प्रियमाचरन् ।। ९-८५।।

पतिः न स्वेच्छया भार्यां विन्दति परन्तु ईश्वरेच्छया एव । अतः पतिः पत्न्यै पूर्णं सहयोगं प्रदाय येन कर्मणा भगवान् अपि तुष्येत् तादृशं कार्यं सहैव कुर्यात्।

यथा नित्यं यतेयातां स्त्रीपुंसौ तु कृतक्रियौ ।
यथा नाति चरेतां तौ वियुक्तावितरेतरम् ।।९-१०२।।

यदा भगवतः सङ्कल्पेन विवाहसम्बन्धे प्रबुद्धावुभावपि दृढतया संकल्पं कुर्याताम् - न कदाचिदपि आवां जीवने पृथक् भवेव परस्परं निष्ठया विश्वासेन च कार्यं कुर्याव इति ।

अतः स्थिरः वैवाहिकसम्बन्धः

एतावानेव पुरूषो यज्जायात्मा प्रजेति ह ।

Digitization by Arya Samaj Charitable Foundation, Chennai

विप्राः प्राहुस्तदा चैतद्यो भर्ता सा स्मृताङ्गना ।।
न निष्क्रियविसर्गाभ्यां भर्तुर्भार्याविमुच्यते ।
एवं धर्मं विजानीमः प्राक्प्रजापतिनिर्मितम् ।। (९-४५-४६)

कश्चित् आदर्शपुरूषः सदैव पत्नी पुत्राभ्यां सह युक्तो भवति । तत् सूचयति सः सदा पत्न्या सहैव निवसति । नतु विक्रयेण पति पत्न्याः त्यागेन अनेन मुक्तः स्यात् ।

विवाहः परिवारिकजीवनस्याधारः । विवाहानन्तरं पतिपत्नी गृहस्थाश्रमं प्रविशतः । परिवारजीवनं तद्भवति, प्रत्येकं परिवारोऽपि सामाजिकदायित्वं निर्वहेत् । एषः सम्बन्धः न कामवासनापर्यन्तं सीमितं स्यात् । एतज्जीवनस्य उद्देशः तद्व्रतमिव पालनीयम्। इमम् आचारमनुपालयितुंपतिपत्न्योः उभयोरावश्यकता भवति । यौ स्वदायित्वं सहैव निर्वक्ष्यतः । तानि चतुर्धा विभक्तानि सन्ति –

१. ईश्वरं प्रति, २. पितरौ प्रति, ३. गुरुं, ४. मानवतां उद्दिश्यापि । समाजे उत्तमः नागरिकः स तदैव भवति यः स्वपरिवारेण सह जीवति ।

आजीवनं यौ परस्परं प्रेम विश्वासनिष्ठायाः बलेन जीवतः तावेव इदं दायित्वं निर्वोढुं समर्थौ । तद्विषये मनुस्मृतिः एवं सूचयति–

अन्योन्यस्या व्यभीचारो भवेदामरणान्तिकः ।
एष धर्मः समासेन ज्ञेयः स्त्रीपुंसयोः परः ।।९-१०१।।

यावज्जीवं परस्परं बन्धुता स्यात् अन्योन्यता च । संक्षेपेण अयमेव धर्मः स्त्री पुरूषयोः स्यात् ।

सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च ।
यास्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम्।।३-६०।

यस्मिन् परिवारे पतिपत्नोः सम्बन्धः सुदृढः परस्पर प्रेमभावना तस्मिन् परिवारे नित्यमेव सुखं शान्तिः च भवतः।

उपरि उद्धताः श्लोकाः हिन्दूविवाहस्य विशिष्टं गुणं सूचयन्ति ।

अद्यापि पतिपत्न्योः प्रेरणा स्त्रोतः वर्तते। एवमेवाग्रेऽपि एतद्वचनं सर्वदाऽपि सर्वान् प्रेरयेत् ।

न्यायमूर्तिः सरकारिया अपि वैवाहिकसम्बन्धे परस्परविश्वास एव प्रधानः इति कथयन् अवदत् –

अत्र यदि एवं वयं वदामः तर्हि तदनुचितं न स्यात् – विवाहस्य स्थिरता त्रिषु स्तरेषु स्थिता वर्तते ।

Digitization by Arya Samaj Charitable Foundation, Chennai

१. परस्परं विश्वासः २. परस्परसमानता ३. सहानुभूतिः (अनुकम्पा) एषु त्रिषु निष्ठा एव वैवाहिकजीवनस्य प्रधानः आधारः अस्ति। जार्ज मैंक डोनालड इति पाश्चात्य विद्वान् वदति - परस्परविश्वासः प्रेम्णः अपि महत्त्वम्। विश्वासः एव विश्वासमुत्पादयति। सन्देहः सन्देहं जनयति। (साधुसिंह इति नाम जगदीश कौर ए.आय. आर्.१९६९ पि.एम् एच् १३९ भारतवर्षस्य सम्प्रत्यपि बहूनां जनमानसं पतिपत्न्योः स्थिरबन्धने विश्वस्तं वर्तते। यथा मनुस्मृतौ प्रतिपादितमस्ति। सर्वेषामपि उपर्युक्ते विषये कदापि दुरधिगमः उत्पन्नो न स्यात्। पवित्रता विषये नास्ति कश्चन विकल्पः। पतिपत्नी च आजीवनं यद्येतेषां नियमानामनुपालनं कुरुतः तर्हि न केवलं तेषां जीवने आनन्दं दद्युः अपि तु सामाजिकस्वास्थ्य रक्षणाय च अत्यावश्यकं भवति। परस्परं विश्वासः निष्ठायामपि एते निर्देशाः एकपक्षीयाः नैव, भवन्ति। एकत्र एवं कथितमस्ति पत्नी पतिव्रता भवेत् न केवलमेतावता पतिरपि पत्नीवृती, स्यात्। विवाहसन्दर्भे पतिः यां प्रतिज्ञां करोति तेनापि एतत् दृढीकृतं स्यात् यत् - ''धर्मे च अर्थे च कामे च नातिचरामि'' इति।

उपयुज्य परित्यागः (प्रक्षेपः) इति प्रवृत्तिः मानवाय अत्यन्तं हानिप्रदा।

अधुना मानवसमाजः, विशिष्य पश्चिमदेशस्य पारिवारिकजीवनं अतिसमस्यात्मकं वर्तते - यत् भारतवर्षे तस्य अनुकरणं बहुधा दृश्यते तत् पतिपत्न्योः सम्बन्धं दूषयत् पारिवारिकजीवनमपि नाशायदस्ति। अनेन कारणेन छात्राणां बाल्यजीवनं नाशमुखमस्ति। तेषां चरित्रनिर्माणमप्यसम्भवमेव। जीवनं प्रति तेषामास्थाऽपि परिवर्तमाना वर्तते। तेन न केवलं ते विनष्टाः परन्तु समाजः मानवता अपि क्षतिं प्राप्नुयात्। एतत् तु कृतज्ञता स्थाने कृतघ्नताया आचरणम्। यत्किमपि वस्तु वा व्यक्तिः यावदावश्यकं तावदुपयोगः यदा तस्य कार्यं समाप्तं पश्चात् तस्य परित्यागः। एषा पृवृत्तिः मानवसमाजं समूलं नाशयेत्। तया भावनया सर्वोऽपि जनः स्वार्थी भवन् अस्ति। तया च प्रवृत्या पोषकपतिपत्नी - पुत्रपुत्रीणां मध्ये परस्परसम्बन्धो नश्यन् वर्तते।

वर्तमाने एतादृशानि बहूनि उदाहरणानि सन्ति विवाहानन्तरं दम्पती अपत्याय जन्म दत्तवन्तौ, पश्चात् नूतन सम्बन्धः वर्धते। तौ एतत् न चिन्तयतः स्वपुत्रपुत्रीणां पालनं तेषां शिक्षा प्रबन्धं कः कुर्यात्? अतः तेषां विवाहसम्बन्धः केवलं दैहिकसुखप्राप्तिरेव। मानवः शीघ्रमेव विवाहसंस्कारगुणान् (नियमान्) नाशयन् अस्ति। प्रशोरपेक्षयाऽपि निकृष्टः सञ्जातः। एषः सामाजिकसमस्यां वर्धयति। तेन च मातापित्रोः जीवत्योः सत्योः तेषां पुत्राः अनाथाः भवेपुः। अमेरिकादेशे

Digitization by Arya Samaj Charitable Foundation, Chennai

किं भवदस्ति इति एकस्मिन् समाचारपत्रे प्रकटितमस्ति ।

अधुनातनवर्षेषु अमेरिकादेशे विच्छेद (तलाक) प्रकरणेन कोट्यधिकाः संख्याकाः पुत्राः (पुत्र्यः) कष्टमनुभवन्तः सन्ति ।

विशेषज्ञाः वदन्ति, वैवाहिकसम्बन्धं तिरस्कुर्वन्तः तस्य अनुभवं लभमानाः सन्ति । यावमृत्युं सहैव वसामः इति स्थाने यावत् कालं स्थापयानि इत्यनया भावनया विच्छेदकर्तृणां संख्याऽपि वर्धते । अद्यपि अमेरिकादेशे विवाहितेषु षष्टिप्रतिशतं (६०%) यावज्जनाः विच्छेदिन इत्येवानुमानमस्ति ।

अस्य परिणामः युवसु मादकवस्तु, आत्महननं, दरिद्रता एवमन्येषु अवाञ्छितविषयेषु तेषां रूचिः अधिका दृश्यते ।

न्यूयार्कमध्ये विद्यमाना एका संस्था- कौन्सिल आफ फ़ेमिलीस इन अमेरिका तस्याः विषयविदामनुसारेण अधुनातनः समाजः यस्य मवोवैज्ञानिक - नैतिक - आर्थिकस्थितिः एतावतीमधोगतिं प्राप्तवती - यत्तेषां मातापितृणाम् स्थितिः एतादृशी नैवासीत् ।

विशेषज्ञानामिदमभिमतमस्ति अमेरिका देशस्य जनाः वर्तमानकालखण्डे विवाहस्य पवित्रतां बोधयितुं असमर्था इति । एका स्वतन्त्रसंस्था काउन्सिल्तः कृत - अध्ययनेनेदं सूच्यते ''मेरेज इन् अमेरिका'' इति अस्य प्रतिवेदनं सावधानं करोति यत् यद्येषैव स्थितिः भवति तदा सांस्कृतिका आत्महननं विना अन्यत् किमपि नैव ।

१९७०-१९९० वत्सराणां द्वयोः दशकयोः अमेरिकादेशे विवाहितानां सङ्खा प्रतिशतं ७२ तः ६२ अभवत् इति विमर्शा वदति । २/३ अंशं जनाः ये अद्य अमेरिकादेशे जन्म प्राप्नुवन्ति तेषां मातरः अनूढाः एव । १/३ अंशं जनाः पितरं विना एव जीवन्ति ।

१९६० तः अमेरिका देशे युवसु ६ प्रतिशतं हिंसाप्रवृत्तिः वर्धमाना अस्ति। दारिद्र्ये विद्यमानानां छात्राणां संख्या ३८ प्रतिशतं वर्तत इति । एषा परिस्थितिः अत्यन्तं शोचनीया वर्तते । मनोवृत्तिरपि प्रधानं कारणमस्ति।, उपयोगानन्तरं परित्यागः इति दुष्प्रवृत्तिः। येन कारणेन विच्छेदनानां सङ्खा अधिका एव वर्तते। विश्वे सर्वत्र देशेषु रक्तार्बुदरोग इव विस्तारं प्राप्नुवन्ती अस्ति । अतः पतिपत्नीभावः एव एतादृशीं दुर्घटनामवरुन्ध्यात् । यदि एषा स्थितिः न स्थगिता तर्हि अनाथबालानां सङ्खा प्रत्यहमभिवर्धेत ।

एकः अमेरिकीयलेखकः डेविडब्लैक् हार्न फादरलेस् अमेरिका इति कृ तौ एतादृशभयानकस्थितेः वर्णनं कृ तवान् । सः लिखितवान् ६५ प्रतिशतं

Digitization by Arya Samaj Charitable Foundation, Chennai

अमेरिकन् पुत्र्यः पुत्राः च ते (ताः) न जानन्ति तेषां पितरः के इति । शैशवे मातापित्रोः उत्तमं पोषणं यदि न लभ्येत - तदा पुत्राः पथभ्रष्टाः भवन्ति।

एतत् सांस्कृतिकप्रदूषणमन्यप्रदूषणापेक्षया अति हानिकारकम् । एषा समस्या मानवस्य शारीरिकस्वास्थ्यमवश्यमेव नाशयेत्।

एतत् पतनमेतावतैव स्थगितं न अपितु शारीरिकसुखस्यापेक्षया अधिकापायमुत्पन्नं कुर्वदस्ति । पुरुषस्य स्त्रियः विवाहपूर्वशारीरिक सम्बन्धाभिवर्धनेन विच्छेदनार्थं न्यायालयः गन्तव्यः न पतेत् । तेषां शिशूनां पुत्रपुत्रीभ्यामपि स्थितिः कीदृशी स्यात् । ये च विच्छेदनसन्दर्भे जन्मलब्धवन्तः स्युः ।

यदा स्वार्थः उदारतायाः उपरि आक्रमणं कुर्यात् एतादृशी मनोवृत्तिरेवोत्पद्यते । तस्य विस्तारः स्वाभिभावकानामुपर्यपि पतेत् । यदि जीवनस्याधारभूमिः त्यागभावना एव समाप्तिं गच्छेत् तर्हि केवलमुपभोगस्य भावानाभिवृद्धिं गच्छेत् ।

यावत् पर्यन्तं मातापितरौ भोजनादि व्यवस्थां कर्तुं समर्थाः तावत् सर्वेऽपि उत्तमाः एव । यदा जरामापन्नाः अथवा व्याधिना पीडिताः भवन्ति तदा पुत्राः तान् अप्रयुक्ताः इत्येव चिन्तयेयुः । कदाचित् ते पुत्राः मातापितरौ गृहात् बहिरपि प्रेषयेयुः । स्वजीवनसन्ध्यावसरे ते स्वपुत्रपुत्रीः विना कुत्राऽपि वृद्धाश्रमे जीवनं यावपयेयुः । एषा स्थितिः कीदृशी दुःखदायिनी स्यात् । एवं पित्रोः परित्यागः पूर्णतया धर्मविरुद्धः एव । अमानवीयः च । अतः एतादृशदुर्भावना दूषणीया । मनोरभिप्राये ध्येयपूर्णं पारिवारिकं जीवनं एव पतिपत्न्योः धर्मः।

धर्मस्यैकस्याङ्गस्य विषये यदि उल्लेखं कुर्मस्तर्हि समुचितं स्यात् । पारिवारिकं जीवनं अथवा सामाजिकसंरचनां सुदृढां कर्तुं तथा तेन सह समाजं तादृशम् एकं घटकम् इति परिचिन्तयन्ति। - यस्योपरि संयुक्तराष्ट्रसङ्घस्य सामान्यसभायां स्वीकृ तनागरिकराजनैतिकाधिकारेणसम्बद्धोत्तरदायित्वस्य विषये धरा (२३) तमे उक्तं वर्तते-परिवारः समाजस्य स्वाभाविकं तथा आधारभूतं घटकमस्ति यत् समाजेन राष्ट्रेणापि आवश्यकीं सुरक्षां प्राप्तुं समर्थोऽस्ति । अर्थात् सुशिक्षितं परिवारमवश्यमेव समाजः रक्षेदिति।

उपरि उल्लिखिता धारा मनस्मृतौ सहस्त्रवर्षेभ्यः पूर्वमेव प्रतिपादिता आसीत् । यत्र पतिपत्न्योः धर्मस्यावश्यकता तथा तस्य प्रभावं स्पष्टतया समर्थयति ।

* * *

Digitization by Arya Samaj Charitable Foundation, Chennai

नवमः अध्ययः

गृहस्थाश्रमस्य आधारः गृहस्थः

अस्माकं भारतवर्षे संन्यासिनः सम्माननीयाः भवन्ति । ये च संन्यासिनः पारिवारिकजीवनं हित्वा स्वीयं सम्पूर्णं जीवनं तथा समयं शक्तिं च ईश्वराराधने समाजसेवायामेव उपयुञ्जते स्म । वस्तुतः विद्योपर्जनकालः (ब्रह्मचर्यं) महत्त्वं वहति स्म । वानप्रस्थस्यापि तावदेव प्रधानता प्रदत्ताऽऽसीत् । कस्मिंश्चित् कालगर्भे मानवः आर्थिकविषयं परित्यज्य (धनोपार्जनं) यावन्तं समयं शक्तिं च समाजसेवायामेव उपयुङ्क्ते स्म । परन्तु मनुस्मृतौ एतेषां त्रयाणामाश्रमाणामपेक्षया गृहस्थाश्रमः अनेकैः कारणैः प्रधानः इति वर्णितः वर्तते ।

गृहस्थः तादृशोऽस्ति यः मानवसमाजस्य महतो वर्गस्य निर्माणं करोति। गृहस्थ एव सन्तानोत्पत्तौ प्रधानं कारणं भवति । स्वसन्तानाय उत्तमां शिक्षां प्रदाय तस्याः प्रबन्धनं वा कृत्वा उत्तमसमाजनिर्माणाय साहाय्यमाचरति । सः एव अन्यस्मिन् कर्मण्यात्मानं संयोज्य परिवाराय समाजाय धनधान्यादि वस्तूत्पाद्य अन्यसेवायाः व्यवस्थां करोति । गृहस्थ एव स्व आयेषु कतिपयांशान् सर्वकाराय कररूपेण प्रदाय शासनसञ्चालनाय साहाय्यं करोति । ऊढ एव पुरुषः यः गृहे मानसिकरूपेणान्यप्रकारेण वा दुर्बलेभ्योऽपि समाजिकसुरक्षां प्रदाय तान् पोषयति । अतः सः न केवलं धनमेवोपार्जयेदपितु सदस्यानां पोषणस्य दायित्वम् अपि निर्वहेत् । विभिन्नकारणैः संन्यासिनः आश्रितवर्गाणाममपि रक्षणं, पोषणं च स एव करिष्यति । तस्मादेव मनुस्मृतिः पतिपादयति यत् गृहस्थः समाजस्य सर्वोच्चः पुरुषः इति ।

ते च इमे श्लोकाः -

सर्वेषामपि चैतेषां वेदस्मृतिविधानतः ।
गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान् बिभर्ति हि ।।६-८९।।

स च गृहस्थः धार्मिकनियममनुपालयन् स्वदायित्वं निर्वहति, सः अन्याश्रमाणां व्यक्तिषु सर्वश्रेष्ठः यतः सर्वाश्रमाणामाधारभूतः । तेषां साहाय्यं समये विदधाति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम् ।
तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम् ।।६-९०।।

यथा लघ्वी बृहती वा नदी सागरं गत्वा विश्रमति, तथैव सर्वेषामाश्रमाणां जनाः गृहस्थम् एव आश्रयन्ते ।

अतः समग्रस्य अपि मानवसमाजस्य राष्ट्रस्य च प्रधानः भागः परिवारः। एषः उत्तमनागरिकनिर्माणे निरन्तरं प्रयतते । व्यक्तेः समाजस्य अवलम्बनम् । महाभारते कथितमेतत् संविभागः । अस्यायमर्थः भवति यत् कथञ्चित् व्यक्त्या सङ्गृहीतसम्पत्सु परिवारस्य सदस्याय कर्मचारिभ्यः समानः अधिकारः स्यात् । शिशूनां वृद्धानाम् अथवा ऽन्येषां विकलाङ्गानां पालनपोषणयोः दायित्वं गृहस्थस्य प्रधानः धर्मः । एषा एव सामाजिकनियमं दृढयति ।

अस्मिन् समाजे एष एव सिद्धान्तः साम्प्रतमपि प्रभावी विद्यते । परिवारे यश्च उद्योगी वर्तते, अर्थोपर्जनमपि करोति ! सः कदापि एतन्नचिन्तयति यत् अनुयोगी भ्राता गृहे निवसति, भगिनी अन्येच गृहस्थाः तस्य भारभूताः इति। सः आलोचयति स्वायार्जितधनेषु, सर्वे तत्र भागमर्हन्ति । परिवारस्य परिरक्षणं तस्य दायित्वमिति । विकालाङ्गानामपि सर्वकारेण वेतनप्राप्तिः अपि स्वाभिमानाय कदाचित् भंगं कुर्यात् । एषः अपि विचारः साधुरेव पाश्चात्यसंस्कृत्या तथा क्षणिकभौतिकवादेन प्रभावितः स्वार्थविचारे संलग्नः संविभागसिद्धान्तः कश्चित् अवरुद्धः वर्तते तथापि अधिकमात्रायां जीवितोऽस्ति ।

गृहसेवकान् पशून् प्रति मानवस्य कर्तव्यम् ।

शुनां च पतितानां च श्वपचां पापरोगिणाम् ।
वायसानां कृमीणां च शनकैर्निर्वपेद्भुवि ।।३-९२।।

गृहस्थः सर्वदा गृहपालितान्पशून् सम्यक्तया पोषयेत्, शुनको गौः अन्यः प्रणी वा स्यात् तेभ्यः आहारं समये दद्यात् । गृहे रोगिपीडितानपि जनान्प्रेम्णा एव रक्षेत् । प्राणिभ्यः अपि शुद्धभूम्यामेव आहारं दद्यात् । सवधानता अपि स्यात् यत्र भोजनं दद्यः तत्र न धूलिः मृत्तिका वा स्यात् ।

अनेन जानीमः प्राणिदया अपि गृहस्थस्य कश्चनान्यतमः गुणः इति । तस्मात् पशवः अपि मानवाः इव दयया द्रष्टव्याः इति ।

देवानृषीन् मनुष्यांश्च पितृन्गृह्याश्च देवताः ।
पूजयित्वा ततः पश्चाद् गृहस्थः शेषभुग्भवेत् ।।३-११७।।

ईश्वरपूजानन्तरमतिथीन्तथा सेवकान्भोजयेत् । पश्चाच्च गृहस्थः भोजनं कुर्यात् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

उपरि उद्धतःश्लोकः आत्मनः व्यवस्थाऽपेक्षया अन्येषां सेवा एव प्रधाना इति साधयति । गृहस्थः सर्वदाऽपि अतिथिं सेवकान् भोजयित्वा भोजनं कुर्यादिति नियमः । सेवा तथा त्यागभावनां दर्शयति । **"सर्वेऽपि सुखिनः सन्तु"** इत्याधारभूतः सिद्धान्तः मानवाधिकारस्य रक्षार्थमावश्यमेव ।

ये नित्या भक्तिकास्तेषामनुपरोधेन संविभागो विहितः।
काममात्मानं भार्यां पुत्रं वोपरून्ध्यान्न त्वेव दासकर्मकरम् ।।
(धर्मकोश पृ-८६)

गृहस्थः न कदाचिदपि विस्मरेत् तेन स्वगृहसेवकाय भोजनं दातव्यमिति । यदि भोजने न्यूनता स्यात्तर्हि तस्य पत्नी स्वभोजनात्किञ्चिद् भागं न्यूनीकृत्य सेवकं भोजयेत् । अतः सेवकस्य भोजनव्यवस्थायामव्यवस्था न स्यात् । सत्यमेव मनुस्मृतावपि इदमेव प्रतिपादितम् ।

गृहस्थाश्रमस्य प्रशंसां अवलोकयन्त्वस्मिन् श्लोके -

न्यायार्जितधनस्तत्त्व -ज्ञाननिष्ठोऽतिथिप्रियः ।
शास्त्रवित्सत्यवादी च गृहस्थोऽपि विमुच्यते ।।१

आतिथ्यं शिवपूजनं प्रतिदिनं मिष्टान्नपानं गृहे
साधोः सङ्गमुपासते हि सततं धन्यो गृहस्थाश्रमः ।।४।।

सत्यमेव स एव नरः उत्तमः गृहस्थः भवति यः नीतिमार्गेण धनार्जनं करोति। यस्तु अतिथिं सत्करोति । एवं प्रतिदिनमपि सत्यमार्गावलम्बी वर्तते ।

प्रत्यहं ईश्वरपूजा अर्चनां, कुर्वन् पारिवारिकसदस्येभ्यः तथा अतिथिभ्यः स्वादिष्टं भोजनमुपादधीत । यस्तु उत्तमजनानां सङ्गतौ स्थित्वा तेभ्यः आशीर्वादं स्वीकुर्यात् । स एव आदर्श गृहस्थाश्रमी अस्ति ।

अत्रोल्लिखितः श्लोकः गृहस्थाश्रमस्य दायित्वं दर्शयन् समाजस्य कल्याणं तथा सुखार्थमस्य आश्रमस्य महत्त्वमपि प्रतिपादयेत् ।

आर्थिक चेष्टां परित्यज्य मानवसेवा-

गृहस्थस्तु यदा वश्येद्वलीपलितमात्मनः
अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत् ।।६-२।।

गृहस्थः यदा वृद्धो भवति तस्य पुत्रो युवा स्यात् । अर्थोपर्जनशक्तः भवेत् तस्य विवाहोऽपि सम्पन्नस्तर्हि गृहस्थः अर्थसङ्ग्रहकार्यं परित्यजेत् । स्थिरां चलां च सम्पत्तिं त्यजेत् समाजसेवार्थमधिकसमयं दद्यात् । तस्य पत्नी अपि वानप्रस्थी इव तस्य साहाय्यं कुर्यात् ।

नाभिनन्देत मरणं नाभिनन्देत जीवितम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

कालमेव प्रतीक्षेत निर्देशं भृतको यथा । ६-४५।।

अस्यामवस्थायां नरः अधिकं जीवनस्य इच्छां न कुर्यात् । शीघ्रं स्वकर्तव्यं कृ त्वा मरणमेवेच्छेत्- यथा कोऽपि सेवकः स्वकार्यानन्तरं वेतनापेक्षी तिष्ठेत् । तद्वदेव नरः मृत्युं प्रतीक्षमाणस्तिष्ठेत् ।

एतदत्यन्तं प्रधानः निर्देशः वर्तते यज्जीवनस्यान्तिमावस्थायां स्वायुस्तथा देहबलं च मानवानां सेवार्थं सः उपयुञ्जीत। सः मृत्युभयं विहाय स्वप्रस्थानस्य प्रतीक्षां कुर्यात् । अतः जीवितुं अधिकेच्छा स्यात् तथा समाजं प्रति स्वकर्तव्यविमुखो भूत्वा केवलं मरणमेव पश्यन्नुपविशेत्। एतादृशी मनोवृत्तिः जीवने सन्तृप्तिभावं विकासयति ।

इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च ।
अहिंसया च भूतानाममृतत्त्वाय कल्पते ।।६-६०।।

स्वेन्द्रियाण्यपि वशे कृत्वा अन्यान् प्रति क्रोधद्वेषदृष्ट्या अपश्यन् नान्येभ्यः कष्टं प्रदाय यो हि जीविति स अमरो भवति ।

दूषितोऽपि चरेद्धर्म यत्र तत्राश्रमे रतः ।
समः सर्वेषु भूतेषु न लिङ्गं धर्मकारणम् ।।६-६६।।

पुरुषः अन्येषामायुः वर्गादिकमपृष्ट्वा एव दूषितः स्यादपि कर्तव्यं तेन करणीयम् । लिङ्गं धर्मं च अदृष्ट्वा सर्वान् जीविनः समानतया पश्येत् ।

अहिंसयेन्द्रियासङ्गवैदिकैश्चैव कर्मभिः ।
तपसश्चरणैश्चोग्रैः साधयन्तीह तत्पदम् ।।६-७५।।

अन्येषां हानिःन विधाय आवश्यकतानुसारं इन्द्रियभोगं लब्ध्वा वैदिकादि-कर्मभिः तपसा च मानवः उत्तमपदं साधयेत् ।

अनेन विधिना सर्वास्त्यक्त्वा सङ्गांच्छनैः शनैः ।
सर्वद्वन्द्वविनिर्मुक्तो ब्रह्मण्येवावतिष्ठते ।।६-१८१।

पुरुषः मन्दं मन्दं मोहान्मुक्तो भूत्वा विरक्तो भविष्यति तथा सर्वान् दुर्गुणान् परित्यजति । सः निश्चयेन ब्रह्मणि लीनः भवेत् । (६-८१)

स्वजीविते उपर्युक्तमार्गान् समनुसृत्य सात्विकवृत्तीः यदि सः विकासयेत् जीवनस्य उत्तरार्धे ताः वृत्तीः उपयुङ्क्ते स न केवलं सुखी भवेत् अपितु तस्य जीवनमपि धन्यं भवेत् ।

* * *

Digitization by Arya Samaj Charitable Foundation, Chennai

दशमः अध्यायः

धर्मस्य पालनं कुरु, अधर्मे लिप्तो मा भव

न सीदन्नपि धर्मेण मनो धर्मे निवेशयेत् ।
अधर्मिकाणां पापानामाशु पश्यन्विपर्ययम् ।।४-१७१।।

आत्मनः दुष्परिणामस्य कारणेन जीवने काठिन्यं मानवः अनुभवेत् । परन्तु स न्याय्यमार्गेण विचलितो न स्यात् । अथवा वाममार्गेण सम्पत्तिं न सङ्गृह्णीयात्। आर्थिकतायाः दुस्थितावपि नीतिः नैव त्यक्तव्या।

नाधर्मश्चरितो लोके सद्यः फलति गौरिव ।
शनैरावर्तमानस्तु कर्तुर्मूलानि कृन्तति ।।४-१७२।।

अधार्मिकमाचरणमारम्भे दुष्परिणामं न यच्छति । परन्तु तादृशमेवाचरणं नरस्य आधारमेव कम्पयति, यः अधर्ममनुसरेत् ।

अधर्मेणैधते तावत्ततो भद्राणि पश्यति ।
ततः सपत्नाञ्जयति समूलस्तु विनश्यति ।।६-१७४।।

यश्च अधर्मे अथवा अन्याये विलिप्तःस्यात् सः तात्कालिकं सुखं सफलतां प्राप्नोति । स्ववैरिणः अपि पराजयेत । परन्त्वन्ते तस्य (निस्सन्देहं) समूलनाशः भवेत् ।

सत्वधर्मार्यवृत्तेषु शौचे चैवारमेत्सदा ।
शिष्यांश्च शिष्यधर्मेण वाग्बाहूदर संयुतः ।।६-१७५।।

मानवः सर्वदा सत्यसिद्धान्तं तथा शिष्टव्यवहारं कुर्यात् । स सर्वदा स्व वाण्यां हस्तयोः तथा शरीरे नियन्त्रणं स्थापयेत् ।

परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ ।
धर्मं चाप्यसुखोदर्कं लोकविक्रुष्टमेव च ।।४-१७६।

स पुरुषः सदा धर्मविरुद्धमार्गेण तथा स्वेच्छापरिपूर्तये अधर्मयुक्तमार्गाद्दूरे एव तिष्ठेत् ।

स धर्मस्य तादृशानां नियमानां परित्यागं कुर्यात् । येन समाजस्य व्यक्तेरवमाननं तथा समाजे अशान्तिरपि स्यात् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

न पाणिपादचपलो न नेत्रचपलोऽनृजुः ।
न स्याद्वावकपलश्चैव न परद्रोहकर्मणि ।।६-१७७।।

नरः कायेन मनसा वाचा परिशुद्धं कार्यमेव कुर्यात् । तादृश एव स्यात्सदा नरः। न कदापि सः अन्येषां सङ्कटानां अपि कारणम् भवेत् ।

उपर्युक्ताः श्लोकाः व्यक्तेः समाजस्य मध्ये सद्भावं दातुं पूर्णरूपेण मार्गदर्शनं कुर्वन्ति । तथापि अन्तिमः श्लोकः मनुस्मृतौ सर्वोत्कृ ष्टः । प्रथमपङ्क्तिः एव कथयति, नरः न कदाचिदनैतिकविधिषु संलिप्तः स्यात् । एषोऽपि आदेशः दीयते यत् न स्वेच्छापरिपूत्यर्थमन्यायमार्गमनुसरेत् ।

नरः हस्तौ पादानि अक्ष्णोः दुरुपयोगं न कुर्यात् । व्यर्थवचनेषु न कदापि विश्वासं कुर्यात् । अन्यान् प्रति अहितं नैवाचरेत् ।

येनास्य पितरो याता येन याताः पितामहाः ।
तेन यायात्सतां मार्गं तेन गच्छन्नरिष्यते ।।४-१७८।।

स पुरुषः पूर्वजैः उपदिष्टं सन्मार्गं न कदापि परित्यजेत् एवमनुसरणेन सः सङ्कटस्य भाजनं न भवति ।

जीवनस्य सर्वोच्चः सिद्धान्तः ।

सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात्सत्यमप्रियम् ।
प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः । ४-१३८।

सर्वदा सत्यमेव वक्तव्यं तादृशं सत्यं स्याद्यत् मनसे आनन्दं दद्यात् । अपवादरूपेऽपि ईदृशं सत्यं न वदेत् यत् अन्येषामप्रियं तथा हानिकारकं स्यात्। अपरे तोषणीयाः मया इति कृत्वाऽसत्यं न ब्रूयात् । एषः सनातनधर्मस्य नियमः ।

धर्मस्य सामान्यः नियमः सर्वे सत्यमेव वदेयुरिति । तेनैव सहेदमपि स्मर्तव्यं, सत्यस्य नाम्ना नान्यस्मै हानिः स्यात् । तेन कस्मिंचित् सङ्कटमुत्पाददयेत् । सत्यं सर्वदा वक्तव्यमिति तु व्रतमेव । कदाचित् प्रमादवशात् एकेन सत्यवचसा तादृशी स्थितिरुत्पन्ना स्याद्येन बहवः अकारणं सङ्कटमनुभवेयुः । तदा यदि सत्यं त्यजामः तर्हि तच्छास्त्रविरुद्धं धर्मविरुद्धं वा न स्यात् । कदापि ईदृशः सन्निवेशःअपि स्यात् तत्र सत्यं कथनीयमिति नास्त्यवसरः । अथवाऽनृतेन कस्यचित् नरस्य अपवादः दूरं गच्छेत्तदा अनृतकथने दोषो न ।

तदर्थं समाजे बहून्युदाहरणानि लभ्यन्ते । उदाहरणार्थम्- समाजघातकाः कामप्यबलां बलात् आकृष्य कर्तुमुद्युक्ताः । तदा कश्चन तस्याः साहाय्यं कुर्यात्, अथवा यदा तामनुसरन्तः ते घातकाः आगत्य पथिकं पृच्छन्ति सा कुत्रास्ति?

Digitization by Arya Samaj Charitable Foundation, Chennai

तदा शास्त्रं धर्मं वा जानन् अहं सत्यं वदामि इति चिन्तयन् तेभ्यः मार्गं दर्शयेत् तादृशदुष्कार्याय धर्मोऽनुमतिं नैव ददाति । तदा उक्तमसत्यं सत्यमिव मन्तव्यमेवेति श्लोकार्थः ।

अनुपयुक्तः दोषः एवमधर्मस्य परिणामः ।

भद्रं भद्रमिति ब्रूयाद्भद्रमित्येव वा वदेत् ।
शुष्कवैरं विवादं च न कुर्यात् केनचित्सह । ४-१३९।

नरः अशोभनीयकार्यमकारणशत्रुतां केनचित् निष्कारणं विवादं वा न कुर्यात्।

अधार्मिको नरो यो हि यस्य चाप्यनृतं धनम् ।
हिंसारतश्च यो नित्यं नेहासौ सुखमेधते ।।४-१७०।।

यो ह्यधर्मेण जीवनं यापयति, कुमार्गमनुसृत्य धनमर्जयति वा असत्यं वदेदन्येषां सङ्कटं वीक्ष्यात्मनि तुष्यति सः कदापि सुखस्य पात्रं न भवेत् ।

ऋत्विक्पुरोहिताचार्यैर्मातुलातिथिसंश्रितैः ।
बालवृद्धातुरैर्वैद्यैर्ज्ञातिसम्बन्धि बान्धवैः ।।४-१७९।।
मातापितृभ्यां जामीभिर्भ्रात्रा पुत्रेणभार्यया ।
दुहित्रा दासवर्गेण विवादं न समाचरेत् ।।४-१८०।।
न सीदन्नपि धर्मेण मनोऽधर्मे निवेशयेत् ।
अधर्मिकाणां पापामाशु पश्यन्विपर्ययम् ।।४-१७१।

न कोऽपि नरः अर्चक-उपाध्याय-अतिथि-आश्रितैः सह कलहं कुर्यात् । मातापितरावथवा महिलया सह सः सङ्घर्षं न कुर्यात् । एवमन्यैः गृहबन्धुभिः पत्नीपुत्रसेवकादिभिः सह न कलहमाचरेत् । यश्च कलहाद्दूरे तिष्ठेत्सः समाजे द्वेषं विना एव जीवनं यापयेत् । अतः ईदृशं विवादं दूरीकुर्वन्नरः समग्रं समाजं जयेत् ।

एषा सूचना मानसिकवेदनां दूरे कृत्वा सुखं प्राप्तुमुत्तमः अवकाशः स्यात् । अनेकाः व्यक्तयः तथा भवन्ति याः केवलं कमपि क्षणिकं लाभं/प्रयोजनं वा मनसि निधाय एतादृशे सङ्घर्षे रुचिं दर्शयन्ति । स्वस्य समस्तं जीवनमीदृशे कुकर्मणि विनियोज्य अपराधिनो भूत्वा यावज्जीवं क्लेशमनुभवेयुः। अतः अयमेव मार्गः प्रशस्तः स्यात् यत् सर्वे सर्वान् विवादान् मित्रभावेन पश्यन्तः विनयेन तत्समापयेयुः यतः कलहे केवलं परस्परं शत्रुत्वमभिवर्धते । अन्यभौतिकलाभापेक्षया एषः महान् हानिकारकः।

अपराधः दोषः इति मन्तव्यम् । पश्चात्तापेन दोषं पुनः न आचरामि इति मनसि संकल्पः कर्तव्यः ।।

Digitization by Arya Samaj Charitable Foundation, Chennai

निर्दिषी मनवः समाजे कदापि कोऽपि वा न भवेत् । । मनुस्मृतिः एवं सूचयति - यदि मया अपराधः कृतः इति कस्यचन मनसि भावना समायाति सः तत्क्षणमेव स्वापराधं स्वीकुर्यात् पश्चात्तापमप्यनुभवेत् ।पुनरपराधं न करोमि इति सङ्कल्पमपि कुर्यात् ।

ख्यापनेनानुतापेन तपसाऽध्ययनेन च ।
पापकृन्मुच्यते पापाद्यथा दानेन चापदि ।।११-२२८।

स्वापराधं मत्वा पश्चात्तपं कृत्वाऽपराधं नानुवर्तयामि इति च सङ्कल्प्य मानवः अपराधान्मुक्तो भवेत् । पीडा अथवा काठिन्यस्य समये कृतापराधेन मानवः स्वस्मिन् विनम्रता-तथा करुणाभावमनुभूय तस्मात्पापान्मुक्तो भवितुमर्हति।

यथा यथा नरोऽधर्मं स्वयं कृत्वानुभाषते ।
तथा तथा त्वचेवाहिः तेनाधर्मेण मुच्यते ।।११-१२९।

यथा सर्पः स्वं त्वचं परित्यज्य नूतनो भवति तथैव यदि स्वापराधः दोष इति मत्वा नरः तत्स्वीकरोति सः तस्मात् पापात् मुक्तो भवेत् ।

व्यवहारः मानवं सर्वोच्चं स्थानं प्रापयति ।

वेदाभ्यासस्तपो ज्ञानमिन्द्रियाणां च संयमः ।
अहिंसा गुरुसेवा च निःश्रेयसकरं परम् ।।१२-८३।।

वेदानामध्ययनं ज्ञानप्राप्तिः शारीरिकमानसिकशक्तिं प्राप्तुं तपःअहिंसा गुरोः सेवा, इन्द्रियाणां वशीकरणमेतादृशः व्यवहाराः व्यक्तिं सर्वोत्तमं कारयन्ति।

सर्वभूतेषु चात्मनं सर्वभूतानि चात्मनि ।
समं पश्यन्नात्मयाजी स्वराज्यमधिगच्छति ।।१२-९१।।

सर्वप्राणिषु यः हि आत्मानं पश्यति स्वात्मनि सर्वजीवजन्तूनवलोकयति सर्वे समानाः इति च मन्यमानःमुक्तिमेव लभते ।

या वेदबाह्याः स्मृतयः याश्च काश्च कुदृष्टयः ।
सर्वास्ताः निष्फला प्रेत्य तमो निष्ठा हि ताः स्मृताः ।।१२-९५।।

ताः स्मृतयः अनुपयोगिन्यः उक्ताः याश्च वेदाधारिताः न सन्ति वैदिकं कर्म न पोषयन्ति, ताः निष्फला एव ।

एषः सर्वाणि भूतानि पञ्चभिर्वाप्य मूर्तिभिः ।
जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत् ।।१२-१२४।।

क्षणिकेऽस्मिन् जगति यां सृष्टिमवलोकयामः सा मूलभूतैः पञ्चतत्त्वैः निर्मिता वर्तते । (पृत्वी अप्तेजवायुः आकाशः) एतानि परमात्मनः एव अंशाः । जन्मवृद्धिक्षयादिकं परमात्मानमवलम्ब्य तिष्ठति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

एकादशः अध्यायः

मातरं-पितरम् उपाध्यायमतिथिं च प्रति आदरः कर्तव्यं च

आचार्यश्च पिता चैव माता भ्राता च पूर्वजः ।
नार्तेनाप्यवमन्तव्याः ब्राह्मणेन विशेषतः ।।२-२२५।।
यं मातापितरौ क्लेशं सहेते सम्भवे नृणाम् ।
न तस्य निष्कृ तिः शक्या कर्तुं वर्षशतैरपि ।।२-२२७।।

सर्वेऽपि मानवाः गुरुं मातापितरौ अग्रजं पितामहं च अतिगौरवेण पश्येयुः। कदाचिदपि एतेषामवमाननं न कुर्युः । न कोऽपि मानवः मातापित्रोः ऋणं मोचयितुं शक्नुयात् । अस्माकं (पुत्राणां) सम्भावादारभ्य पालनपोषणादिभिः यत् वात्सल्यं तैःदीयते यःक्लेशः अनुभूयते तस्य निष्कृ तिः शतेन वर्षैः अपि कर्तुं न शक्या एव ।

तयोर्नित्य प्रियं कुर्यादाचार्यस्य च सर्वदा ।
तेष्वेव त्रुषु तुष्टेषु तपः सर्वं समाप्यते ।।२-२२८।।

पुत्रः सदा मात्रा पित्रा गुरूणा च तादृशं व्यवहारं कुर्यात् यथा तस्य सद्व्यवहारेण ते सन्तुष्टा भवेयुः । यदि तस्य व्यवहारेण ते तुष्टाः सर्वं तपः समाप्तिं याति । स्वेच्छां सः प्राप्नुयादिति भावः ।

तेषां त्रयाणां शुश्रूषा परमं तप उच्यते ।
न तैरभ्यननुज्ञातो धर्ममन्यं समाचरेत् ।।२-२२९।।

पित्रोः शिक्षकणां शुश्रूषाऽऽज्ञापालनं वा सर्वोत्तमं तपः । तेषामनुमतिं विना मानवः (पुत्रः) किमपि कार्यं नानुतिष्ठेत् ।

तेषामनुपरोधेन पुत्रोऽयं यद्यदाचरेत् ।
तत्तन्निवेदयेत्तेभ्यो मनोवचनकर्मभिः ।।२-२३६।।

यावत्पितरौ गुरुः च जीवन्ति तावत् तेषामनुमतिं विना स्वतन्त्रेण किमपि कार्यं न कुर्यात् । येन च कर्मणा एते त्रयः आनन्दमनुभवेयुः तादृशमेव कर्म पुत्रः

Digitization by Arya Samaj Charitable Foundation, Chennai

कुर्यात् ।

त्रिष्वेतेष्वितिकृत्यं हि पुरुषस्य समाप्यते ।
एषः धर्मः परः साक्षादुपधर्मोऽन्य उच्यते ।।२-२३७।।

एतान् त्रीन् मातापितृगुरून् यो हि सेवते तत्पुत्रस्य उत्तमं पावनं च दायित्वम्। एतद्विहायान्यानि कर्माणि अन्यश्रेण्यामायान्ति । ते च उपधर्माः इति मनुः न्यगदत् ।

पित्रोः परित्यागः अनुचितः ।

न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति ।
त्यजन्नपतितानेतान्राज्ञा दण्ड्यः शतानि षट् ।।२-३८९।।

न कोऽपि मानवः मातरं-पितरं पत्नीं पुत्रांश्च परित्यजेत् । यद्येवं कश्चित् करोति स राज्ञा दण्डयितुमर्हः ।

।। शिष्टाचारः ।।

शिष्टाचारः, उत्तमव्यवहारः, सत्परिवारस्य एवं समाजिकजीवनस्य महत्त्वपूर्णः आधारस्तम्भः । ज्येष्ठैः उत्तमव्यवहारः मधुरभाषा, सर्वैः सह विनयपूर्वकः सम्बन्धः शिष्टाचारणां गुणाः कथिताः । शिष्टाचार एव संस्कृतिः अस्यां भूमौ अति प्राचीलकालादेव विकासं प्राप्तवत्यौ । तदेव स्मृतौ बहुधा व्याख्यातं विद्यते । स्मृतिशास्त्रेषु प्रोक्ताः केचन सिद्धान्ताः मानवजात्यै मार्गदर्शकाः तानत्र व्याख्यास्यामः ।

ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा ।
संहत्य हस्तावध्येयं स हि बद्धाञ्जलिः स्मृतः ।।२-७१।।

शिष्यः स्वाध्ययनदिनादारभ्य शिक्षाग्रहणस्य सन्दर्भे प्रत्यहं निश्चितरूपेण (निरन्तरम्) उपाध्यायानां चरणं स्पृशेत्, प्राञ्जलः तेषां पुरतः उपविशेत् । अध्ययनसमाप्त्यनन्तरमपि सः एवमेव कुर्यात् ।

अयं शिष्टाचारः स्वतः एव स्पष्टः । यश्च सर्वविधं दौर्बल्यं देहे स्वीकृत्य जन्म लभते न कस्याःचित् भाषायाः विषयस्य वा ज्ञानं भवति स च गुरूणां मार्गदर्शनिनैव एको मानवो भूत्वा समाजे जीवति । गुरुः एव शिष्येषु विद्यमानं बहुविधदौर्बल्यानि दूरीकृत्य उत्तमगुणानां विकासं कारयति । अतः गुरुः 'ब्रह्मा' भवति । दुर्गुणैः तान्रक्षति सद्गुणान् बोधयति, तत् च यावज्जीवं धर्तुमुत्साहयति अतः गुरुः 'विष्णुः' । अनाचारेः यथा व्याप्तो न स्यात् तथा तं सदुपदेशैर्नाशयति अतः 'महेश्वरः' । अतः गुरुः त्रिमूर्तिः भवति । एतैः त्रिभिः व्यक्तिविशेषगुणैः सः पुनर्जन्म ददाति । इत्थं स बोधयति। समाजे मानवस्य किं कर्तव्यम् ? कथं

Digitization by Arya Samaj Charitable Foundation, Chennai

मानवो भूत्वा जीवेत्? अतः सामाजिकरूपेण सृष्टिः संरक्षणं नाश इति त्रयः गुणाःतस्मिन्निहिताः भवन्ति । इदमेव कारणं मत्वा अध्ययनारम्भे समाप्तौ गुरोः पादं स्पृष्ट्वा शिष्याः नमन्ति ।

ज्येष्ठानां सम्माननम्

शय्यासनेऽध्याचरिते श्रेयसा न समाविशेत् ।
शय्यासनस्थश्चैवेनं प्रत्युत्थायाभिवादयेत् ।।२-११९।।
ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति ।
प्रत्युत्थानाभिवादाभ्यां पुरस्तान्प्रतिपद्यते ।।२-१२०।।

कश्चिदपि स्वस्यापेक्षया अधिकवयसां पुरतः उच्चासनेषु नोपविशेत् । यदि कश्चन ज्येष्ठानामागमनात्पूर्वमुपविष्टवान् स उत्थाय आगतेभ्यः तत्स्थानं प्रदाय सः तेषां पुरतः तावत्तिष्ठन् भवेद्यावत् ते नोपविशन्ति ।

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ।।२-१२१।।

यदि कश्चित् पुरुषः नित्यं वृद्धान् सेवते-आदरभावेण वा पश्यति तस्य आयुः विद्यादिकं चतुर्गुणमभिवर्धते ।

अवाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत् ।
भो भवत्पूर्वकं त्वेनमभिभाषेत धर्मवित् ।।२-१२८।।

न्यूनम् अपि आयुः यस्य भवेत् योऽयं दीक्षितः विद्वानपि स्यात् तं संमातया पश्येत् । सम्बोधने च भो भवान् इति गौरवयुक्तेन वचसा तेन सह व्यवहरेत् ।

परपत्नी तु या स्त्रीः स्यादसम्बन्धा च योनितः ।
तां ब्रूयाद्भवतीत्येवं सुभगे भगिनीति च ।।२१-१२९।।

स्त्रीभ्यः गौरवप्रदानसम्दर्भे स्वपत्नीं विना अन्याः सर्वाः महिलाः आदरपूर्वकं सम्बोधनीयाः । अविवाहितां स्त्रीः आयुष्मती, भगिनी, सुभगे! इत्यादिभिः गौरवपदैः सम्बोधनीया ।

यस्य वाङ्मनसी शुद्धे सम्यगुप्ते च सर्वदा ।
स वै सर्वमवाप्नोति वेदान्तोपगतं फलम् ।।२-१६०।।

यस्याः व्यक्तेः, वाक्, मनः च शुद्धे भवतः सम्पूर्णतः संयतः सः वेदान्तेषूक्तान्सर्वान् लाभानवाप्नुयात् ।

नारुन्तुदः स्यादार्तोऽपि न परद्रोहकर्मधीः ।
ययास्योद्विजते वाचा नालोक्यां तामुदीरयेत् ।।२-१६१।।

कश्चित् रोगेण, वेदनया वा पीडितो वर्तते, तान् (तं) प्रति न कठोरां वाणीं

Digitization by Arya Samaj Charitable Foundation, Chennai

वदेत्, येन सः अधिकां वेदनामवाप्नुयात् । स्वव्यवहारेण अन्येभ्य आघातं न दद्यात् । तादृशवचनान्यपि सः न प्रयुञ्जीत येन च अन्यः आत्मनं भीतं मनुते।

सुखं ह्यवमतः शेते सुखं च प्रतिबुध्यते ।
सुखं चरति लोकेऽस्मिन् अवमन्ता विनश्यति ।।२-१६३।।

कोऽपि अन्येन अवमानितः सन्नपि स्वं स्थिरं जानाति न विचलितो भवति। प्रतीकारमपि न करोति विना विषादं शेते प्रसन्नतया जागृतो भवति, धर्मपथे चलति अवमन्ता स्वयमेव नाशं याति ।

अन्यदेकं सुभाषितम्

प्रिययवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।
तस्मात्तदेव वक्तव्यं वचने का दरिद्रा ।।

मानवस्य मधुरं वचनं श्रुत्वा पशवोऽपि सन्तुष्टा भवन्ति । अतः तदेव सदा वदामः तत्कथने कुतो वा सङ्कोचः कर्तव्यः ?

सदाचारस्य नियमाः जीवने सुखावाप्तये आवश्यकाः एतैः गुणैः विना नरः अहङ्कारी अथवा अधार्मिकः स्यात् ।

।। आचार-व्यहारयोः सरलः सिद्धान्तः ।।

यमः एवं नियमः

यमान्सेवेत सततं न नित्यं नियमान्बुधः ।
यमान्पतत्यकुर्वाणो नियमान्केवलान्भजन् ।।४-२०४।।

कश्चित् विवेकी पुरुषः आचरणयोग्यान् नियमान् निषिद्धान्नियमान् अपि पालयेद्यश्च विधिनिषेधान्न रक्षति नाचरति च सः अपराधी एव ।

अहिंसा, अनृतं न वदेत्, दुर्मार्गेण सम्पदः न सङ्ग्रहः ब्रह्मचर्यस्य पालनं क्रोधनिग्रहः आचार्यसेवा. शरीमनसोः स्वच्छता हितं मितं च भोजनं एते तु सामाजिकाः शिष्टाचाराः। उत्तमञ्जीवनं धारयितुमुपर्युक्तान्सर्वान्नियमान्स अनुपालयेत्।

आहारस्य पवित्रता

भारतीयसंस्कृ तौ भूमिः न केवलं क्षमावती कोमला च परन्तु सा तु पवित्रा यथाऽस्माकं माता । अतः भूमाता इति कथ्यते । केवलं भौतिकं सुखं प्राप्तुमेकं साधनं न भवति भूः अपितु - जीविभ्यः या भोजनं ददाति या च सर्वन्पोषयति। यद्भोजनं स्वीकुर्मः तत्सर्वदा पवित्रं इत्येव भावयामः ।यतः तद्भूम्या एव प्रसादः। अतः आहारस्य पवित्रताऽस्मिन् श्लोके एवं अस्ति।

पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

दृष्ट्वा हृष्येत्प्रसीदेच्च प्रतिनन्देच्च सर्वशः ।।२-५४।।
पूजितं ह्यशनं नित्यं बलमूर्जं च यच्छति ।
अपूजितं च तद्भुक्तमुभयं नाशयेदिदम् ।।२-५५।।

भोजनं पूजयन्तस्य निन्दामकुर्वन् नरः प्रसन्नचित्तेनाहारं गृह्णीयात् । तथा प्रार्थयेत च यत् प्रत्यहमप्यहमाहारं प्राप्नुयाम् । पूजानन्तरं स्वीकृ तमन्नं शक्तिं दास्यति ।

'नोच्छिष्टं कस्यचिद्दद्यान्नाद्याच्चैव तथान्तरा ।
न चैवात्यशनं कुर्यान्नचोच्छिष्टः क्वचिद्व्रजेत् ।।२-५६।।

भक्षणादवशिष्टमुच्छिष्टं वस्तु न कस्मैचिदपि दातव्यम् । तथा अवश्यकतायाः अधिकं भोजनं न कुर्यात् । अर्धं भोजनं खादित्वा हस्तमप्रक्षाल्य कुत्रापि न गच्छेत् ।

मनुस्मृतौ यावद्भोजनाय प्राधान्यता दत्ता तद्विषये अधिककथनस्य अवश्यकता नास्ति । तथापि भारतीयसंस्कृ तौ भोजनं ईश्वरः इत्येव भावना वर्तते । ''अन्नं ब्रह्मेति व्यजानात्'' इत्यादि श्रुतिवक्यानि अपि प्रमाणभूतानि सन्ति। भोजनात् पूर्वं तदन्नपूर्णेश्वरी इति कृत्वा तस्य पूजनमपि भवति । एतदेव भोजनमस्मान्पोषयति शारीरिकं मानसिकं च बलं ददाति । सम्यग्भोजनान्तरं मानवः सन्तुष्टो भवति । स्मृतिः वदति भोजनस्य पूजानन्तरं उत्तमपरिसरे स्व-परिवारसदस्यैः सह मिलित्वा भोजनमस्माकं जीवनमूल्यानामेकमङ्गम् । अतः एकाकी एव भोजनं न स्वीकुर्यात् ।

भक्षणादवशिष्टं भोजनं न कस्मैश्चिदपि दातव्यम् बुभुक्षिताय दुर्बलायान्नदानमुत्कृष्टं पुण्यदायकम् । तथापि भोजनस्य पश्चात् विद्यमानम् (अवशिष्टं) भोजनप्रदानम्, अपराध एव इति स्मृतिः ।

प्रतिग्रहं प्रति सावधानता

प्रतिग्रहसमर्थोऽपि प्रसङ्गस्तत्र वर्जयेत् ।
प्रतिग्रहेण ह्यस्याशु ब्रह्म तेजः प्रशाम्यति ।।४-१८६।

अन्यैः प्रदत्तस्य वस्तुनः स्वीकारविषये अवश्यमेव सावधानता स्यात् । ज्ञानैरन्यैरुत्तमोत्तुमगुणैः पुरुषः प्रतिग्रहं कर्तुं योग्यो भवेत् । परन्तु सः प्रतिग्रहवस्तूद्दिश्य नात्याशां दर्शयेत् । उपहारस्वीकारेण ब्राह्मं तेजः शक्तिश्च मन्दं नाशं गच्छेत् ।

हिरण्यं भूमिमश्वं गामन्नं वासस्तिलान् घृतम् ।
प्रतिगृह्णन्नविद्वांस्तु भस्मीभवति दारुवत् ।।४-१८८।

Digitization by Arya Samaj Charitable Foundation, Chennai

सामान्यः कश्चन अन्यैर्हिरण्यं भूमिश्चादिकं दानरूपेण (प्रतिग्रहरूपेण) गृह्णाति, स काष्ठखण्डमिव दग्ध्वा भस्मीभूतः भवति ।

तस्मादविद्वान्बिभियाद्यस्मात्तस्मात्प्रतिग्रहात् ।
स्वल्पकेनाप्यविद्वान् हि पङ्के गौरिव सीदति ।।४-१९१।।

अतः विवेकी कश्चित् उपहारं स्वीकर्तुं बिभ्यात् न तावद्बृहदुपहारः - परन्तु अति लघूपहारमपि स्वीकृत्य सः तस्य व्यक्तित्वं नाशयेत् ।

अतः मनुस्मृतौ पर्तिग्रहस्वीकारात्पूर्वं सावधनं कृतम् । अयं च सामान्यः विषयः उपहारः कदाचिदात्मनः स्वार्थपरिपूर्त्यै एव दीयते । विशिष्य सर्वकारीयोद्योगेषु ये भवन्ति तेषान्तु प्रतिग्रहः महादोषदायक इत्येव शास्त्रम् । यदि कदाचित् सर्वकारीयः पुरुषः प्रतिगृह्णीयात् सः दण्डयितुमपि योग्यो भवति। अयं खदेदायको विषयः न कोऽपि इमं नियमं पालयन्नस्ति । बहवो ह्यधिकारिणः पृष्ठद्वारेण तत् स्वीकुर्वन्तः सन्ति । एषः तेषां स्वभावः सम्पन्नः ।

मन्त्रिणः प्रधानाधिकारिणः ये दृश्यन्ते प्रायः उपहारग्रहणार्थमेव गमिष्यन्तीव दृश्यन्ते । अतः गुप्तस्य कृष्णधनस्यान्यायेनर्जितायाः सम्पदः विनियोग-क्रमः। प्रायः अनेनैव कारणेन मनुस्मृतिः प्रतिग्रहात् सर्वाञ्जागरूकान् करोति ।

प्रशंसां प्रत्यपि सावधानता

संमानाद्ब्राह्मणो नित्यमुद्विजेत विषादिव ।
अमृतस्येव चाकाङ्क्षेदवमानस्य सर्वदा ।।२- १६२।।

नरः सर्वदाऽन्येषां प्रशंसायाञ्जागरूकः स्यात् । विषं केवलं शरीरं नाशयेत्, परन्तु प्रशंसा अहङ्कारमभिवर्धयन्ती अशोभनीयव्यवहारं प्रति मानवस्योत्तेजनं करोति । अतः अन्येषां प्रशंसायां जागृतो भवेन्मानवः ।

अस्याः सूचनायाः उपयुक्ततां पश्यन्तु - यदि अन्यः प्रशंसामाचरेत्तस्य पृष्ठतः कश्चन दुरुद्देशो भवेत् । प्रशंसकः कमपि लाभं स्वस्वार्थं वा पूरयितुं कुर्यात्प्रशंसाम् । तस्मात् मनोरिदं वचनं सदा मनसि भवेत् - न कदाचिदपि मानवः प्रशंसाप्रियः स्यात् यः पापमार्गमुद्घाटयेत् ।

परिसरस्य रक्षा

मनुस्मृतौ परिसररक्षणेऽपि स्वमार्गदर्शनं दत्तमस्ति । एतत्सर्वेषामपि दायित्वं स्यात् न कश्चिदपि परिसरं पर्यावरणं वा दूषयेत् ।

जलप्रदूषणं न कुर्यात्

नाप्सु मूत्रं पुरीषं वा ष्ठीवनं वा समुत्सृजेत् ।
अमेध्यलिप्तमन्यद्वा लोहितं वा विषाणि वा ।।४-५६।।

Digitization by Arya Samaj Charitable Foundation, Chennai

यत्पेयजलं भवति तत्र न कोऽपि शरीरस्य त्याज्यं वस्तु त्यजेन्न तत्र वस्त्रं कोऽपि क्षालयेत् । विषयुक्तं वस्त्वपि न प्रक्षिपेत् ।

उपर्युक्ते उदाहरणे मानवानां पशूनामन्यजीवजन्तूनां जलमेव जीवनमित्युक्तम् । सर्वेऽपि व्याधयः मलिनजलेनैव व्यापकरूपेण प्रसारिताः भवन्ति । अतोऽयं नियमो भवेत् न कोऽपि जलं प्रदूषयेत् । वर्तमानकाले यन्त्रागारैः परित्यक्तं जलमपि सर्वत्र दूषणं करोति - उच्चन्यायालयः सर्वोच्चन्यायालयोऽपि सर्वकाराय औद्योगिकसंस्थाभ्यः अनेकान्निर्देशान् प्रायच्छताम्। तथापि नैताः संस्थाः नैतच्छुछूषन्ति।

भारतवदन्यदेशेष्वपि जलप्रदूषणं विरुद्ध्य नियमाः कृताः वर्तन्ते, प्रदूषणनियन्त्रण आयोगोऽपि प्रतिष्ठापितः संयुक्तराष्ट्र सङ्घे अपि जलप्रदूषणविषये वायुप्रदूषणविषये नियन्त्रणं कर्तुमेका संस्था स्थापिता वर्तते । यस्याः मुख्यालयः नैरोबी वर्तते ।

वस्तुतः भविष्ये यत् घटिष्यते तत् विषये सहस्त्रवर्षेभ्यः पूर्वमव स्मृतिग्रन्थेषु उल्लेखः मिलति । एतत्प्राचीनानां भारतीयशासननिर्मातृणां दूरदर्शित्वं प्रतिपादयति।

* * *

Digitization by Arya Samaj Charitable Foundation, Chennai

द्वादशः अध्ययः

सारभूता - प्रक्रियात्मिका शासनव्यवस्था

मनुस्मृतौ उन्मादः तथा आपराधिकशासनं विना अन्यविषयः अपि शासन- विधिव्यवस्थायां संयोजितं वर्तते । एते सर्वेऽपि व्यवहाराः सामान्यविधयः प्रक्रियाः विधिरूपेण प्रसिद्धाः वर्तन्ते । परन्तु राजधर्मात् भिन्ना एव ।

व्यावहारशब्दस्यार्थः - एकं विधिसम्बद्धक्रियान्वयनम् इति । अयं शब्दः अधुनाऽपि प्रचलितो वर्तते । कस्यचित् मानवस्योपरि कस्मिन्नपि प्रकरणे विधेः क्रियान्वयनम् एव व्यवहारः इति । एष आधुनिककाले कस्मिन्नपि विशिष्टं विषयमाश्रित्य कृतेन विधिविधानेन समम् । प्राचीनकले अनेकेषु विषयेषु सामान्यतः उत्पन्नानां विवादानां विभागः अष्टादशविभागेषु विभक्तः आसीत् । एतदतिरिच्य जनहितम् अभिलक्ष्य अन्यविषयाणामपि विधिव्यवस्था अवर्तत । येषां विषये अग्रिमाध्याये लिखितं वर्तते ।

एतेषाम् अष्टादशविषयाणां वर्गीकरणमेवं कृतं अस्ति

तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः ।
सम्भूय च समुत्थानं दत्तस्यानपकर्म च ।।८-४।
वेतनस्यैव चादानं संविदश्च व्यतिक्रमः।
क्रयविक्रयानुशयो विवादः स्वामिपालयोः ।।८-५।
सीमा विवादधर्मश्च पारुष्ये दण्डवाचिके ।
स्तेयं च साहसं चैव स्त्रीसङ्ग्रहणमेव च ।८-६।
स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वय एव च ।
पदान्यष्टादशैतानि व्यवहारस्थिताविह ।। ८-७।

१. ऋणदानम् २. निक्षेपः ३. अस्वामि विक्रयः ४. सम्भूय समुत्थानम् ५. दत्तस्यानपकर्म - परिग्रहस्य पुनरादानम् ६. वेतनप्रदानम् - सेवकानां वेतनप्रदानम् ७. संविद्व्यतिक्रमः - सङ्घनियमानां क्रमः ८. क्रयविक्रयानुशयः क्रयणं विक्रयणम् ९. स्वामिपालविवादः - यजमान-सेवकयोः मध्ये विवादः

Digitization by Arya Samaj Charitable Foundation, Chennai

१०. सीमाविवादः - परस्परसीम्नोः विषये सङ्घर्षः ११. वाक्पारुष्यम् - मानहानिः १२. दण्डपारुष्यम् - शारीरिकी हिंसा १३. स्तेयम् - चौर्यम् १४. साहसः - हिंसापराधः १५. स्त्रीसङ्ग्रहम् - व्यभिचारः १६. स्त्रीपुंधर्मः - पत्युः पत्न्याश्च धर्मः (दाम्पत्यनियमः)१७. विभागः - सम्पद्विभाजनम् १८. द्यूतसमाह्वयः - द्यूतं, प्राणिद्यूतम् ।

एतेषु (११) एकादशतः १५ पर्यन्तं विषयाः आपराधिकविषयेष्वन्तर्गताः भवन्ति । अन्ये सर्वे विध्यन्तर्गता भवन्ति । एतेषां विषयाणां केचन प्रधानाः अंशाः अत्रोक्ता वर्तन्ते ये विधिविषयस्य मूलसिद्धान्तं वक्तुं सक्षमाः वर्तन्ते ।

प्रतिज्ञाः

प्रतिज्ञा पत्रं यन्नियमविरुद्धम् ।

सत्या न भाषा भवति यद्यपि स्यात्प्रतिष्ठिता ।
बहिश्चेद्भाष्यते धर्मान्नियताद्व्यावहारिकात् ।।८-१६४।।

एतादृशी प्रतिज्ञा या नियमं विधिं विरुध्य कृ ता । अथवा प्रचलितपरम्परां विरुद्ध्य वा भवेत् । अतः एषा विधिदृष्ट्या नियता नास्ति ।

मेधातिथिः अस्य नियममुद्दिश्य विवृण्वन्नलिखति - व्यक्तिः पत्नीं अपत्यानि वा विक्रीणाति तत् विधिविरुद्धम् । सन्ताने विद्यमाने सत्यपि स्वपैतृकीं सम्पत्तिमन्येभ्यः उपहार (प्रतिग्रह)रूपेण दीयते तदपि विधिविरुद्धमेवेति।

भारतस्य राज्याङ्गस्य अधिनियमः धारा २३ तथा २४ मध्ये एष सिद्धान्तः दृढीकृतो वर्तते ।

(ख) स्वेच्छा सहमतिं विना नियमविरुद्धं स्यात् ।

योगाधमनविक्रीतं योगदानप्रतिग्रहम् ।
यत्र वाप्युपधिं पश्येत्तत्सर्वं विनिवर्तयेत् ।
बलाद्दत्तं बलाद्भुक्तं बलाद्यच्चापि लेखितम् ।
सर्वान् बलकृतानर्थानकृतान्मनुरब्रवीत् ।

कपटवञ्चनया विक्रीतं निक्षेपोऽथवा उपहारः तद्दानं स्वीकारश्च तथा तादृशमेव यस्मिनन्वञ्चना दृश्यते तत्सर्वं निरस्यत एव ।

बलात् दत्तमाग्रहेण बलेन वा उपयुक्तमनुभूतं वा बलात् यत् यत् च विलेखितं बलात् कारितं सर्वमपि कार्यम् नियमविरुद्धमेव इति मनुरवदत्

मत्तोन्मत्तार्ताध्यधीनैर्बालेन स्थविरेण वा ।
असम्बद्धकृतश्चैव व्यवहारो न सिद्ध्यति ।।८-१६३।।

केनचित् उन्मत्तेन अस्थिरेण रोगपीडितेन शिशुना ऽतिवृद्धव्यक्त्या वा कृता

Digitization by Arya Samaj Charitable Foundation, Chennai

अप्यनियमिततैव स्यात् ।

प्रतिभुवः उत्तरदायित्वम्

यो यस्य प्रतिभूस्तिष्ठेद्दर्शनायेह मानवः ।
आदर्शयन्सतं तस्य प्रयच्छेद्दस्वधनातृणम् ।।८-१५८।

कस्यचन ऋणिनः प्रतिभूः अधमर्णं तं न्यायालये दर्शयितुं असफलो भवति सः ऋणं पूरयितुं विवशो भवेत् । (८-१५८) पुत्रः पितुः कतिचिद्दणे उत्तरदायी न भवति ।

प्रातिभाव्यं वृथादानमाक्षिकं सौरिकं च यत् ।
दण्डशुल्कावशेषं च न पुत्रो दातुमर्हति ।।८-१५९।।

पिता यदि द्यूतक्रीडार्थं धनमृणं कृत्वा ऋणी भवति । प्रतिभूः भवितुं वा दीयमानं धानमथवा दण्डार्थं दत्तधनस्य च पुत्रः प्रत्यर्पणार्थं विवशो न भवेत्।

२. (क) स्वामित्वं विना सम्पत्तेः हस्तान्तरमपि नियमविरुद्धम्।

अस्वामिता कृतोऽयस्तु दायो विक्रय एव वा ।
अकृतः स तु विज्ञेयो व्यवहारे यथा स्थितिः ।।८-१९९।।

कस्यचिदपि सम्पदा विक्रीतं धनमथवा उपहारेणागता सम्पदधिकारिणं विना तृतीयः कोऽपि तद् व्यवहारं कुर्यात्तत्कार्यं निरस्तं स्यादेव ।

(ख) विना स्वामित्वे क्रयणस्य दण्डः

अवहार्यो भवेच्चैव सान्वयः षट्शतं दमम् ।
निरन्वयोऽनपसरः प्राप्तः स्याच्चौरकिल्बिषम् - ।।८-१९८।।

यस्याः कस्याश्चित्सम्पदः स्वामिनस्तस्य बन्धुस्तां सम्पदं यदि विक्रीणाति तस्योपरि षट्शतं दमं दण्डः स्यात् । विक्रेतुः सम्पदः स्वामिनः बन्धुर्नास्ति तथापि अन्यायेन तद्विक्रीणाति तं चौरस्थाने संस्थाप्य दण्डः प्रदातव्यः ।

(घ) स्वायत्तापेक्षयाधिकं स्वामित्वस्य अधिकारः ।।

सम्भोगो दृश्यते यत्र न दृश्येतागमः क्वचित् ।
आगमः कारणं तत्र न सम्भोग इति स्थितिः ।।८-२००।।

तादृशी सम्पत्तिः काचिद्यत्र अन्यस्य स्वायत्तता किन्तु स्वामी कश्चनापरः। उभयोर्मध्ये सम्भोगापेक्षया तस्याः सम्पत्तेः स्वामिनः एवाधिकारस्तत्र भवति ।

(ङ) विक्रयणं वा कृपणस्य खण्डनम्

क्रीत्वा विक्रीय वा किञ्चिद्यस्येहानुशयो भवेत् ।
सोऽन्तर्दशाहात्तद्र्व्यं दद्याच्चैवाऽददीत च ।। ८-२२२।।

यदि कश्चन पुरुषः एवं चिन्तयेद्यत् कस्यचन वस्तुनः क्रयविक्रयसन्दर्भे

Digitization by Arya Samaj Charitable Foundation, Chennai

दोषः कृ तः तर्हि सः दशदिनाभ्यन्तरे तत् वस्तु पुनः यजमानाय प्रदाय तत्समानमेव मूल्यं पुनः प्राप्तुं शक्नुयात् ।

ऋणस्योपरि कुसीदस्य मूल्यस्योपरि प्रतिबन्धः

वसिष्ठविहितां वृद्धिं सृजेद्वित्तविवर्धिनीम् ।
अशीतिभागं गृह्णीयान्मासाद्वार्धुषिकः शते ।।८-१४०।।

कुसीदस्योऽपि य ऋणं ददाति सः कति प्रतिज्ञातं प्राप्तुं शक्नोति इति विषये वसिष्ठेन निर्धारितः कश्चन नियमः । तदुपर्यधिकः कुसीदः स्वीकर्तुं न शक्यते यः पितामहस्य प्रत्येकं शतस्य १.२५ भागो भवति ।

न्यासः अथवा बन्धकः

न त्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयात् ।
नचाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः ।।८-१४३।।

ऋणी च यस्मात्सः ऋणं स्वीकृतवान्यदि तस्मै सम्पदथवा वस्तुरूपेण किमपि न्यासाय दत्तं तर्हि तस्मै (कुसीदं) न दद्यात् ।

एकवारं स्थापितः आधिः सर्वदा तथैव ।

आधिश्चोपनिधिश्चोभौ न कालात्ययमर्हतः ।।
अवहार्यौ भवेतां तौ दीर्घकालमवस्थितौ ।।८-१४५।।

यदि काचित्सम्पदुपयोगार्थं आधिरूपेण(न्यास) स्थापिता सा सर्वदा आधिरेव तिष्ठेत् । कश्चित् ऋणी स्ववस्तूत्तमर्णस्य सकाशे न्यासरूपेण स्थापयति तत्तस्मै शीघ्रमेव पुनर्दद्यात् ।

सर्वकारीय नीलमी घोषणाया क्रयेण पूर्णयाजमान्यम् ।

विक्रियाद्यो धनं किञ्चिद्गृह्णीयात्कुलसन्निधौ ।
क्रयेण च विशुद्धं हि न्यायतो लभते धनम् ।।८-२०१।

यदि कापि सम्पत्सर्वकारीय घोषणायां क्रीयते यः तां क्रीणाति तस्याः उपरि क्रेतुः यजमानस्याधिकारं स लभते ।

एकवारं दत्तोपहारः न परिवर्त्यते ।

सकृदंशो निपतति सकृत् कन्या प्रदीयते ।
सकृदाह ददानीति त्रीण्येतानि सतां सकृत् ।।९-४७।।

कन्यादानसन्दर्भेऽन्यव्यक्त्या अपि ददामि इति वचनं न कदापि परिवर्तितं भवति । सन्तः एकवारं दत्तं वचनं न परिवर्तयन्तीति तात्पर्यम् ।

केषुचित् सन्दर्भेषु नियमितोपहारः अपि अनियमितं स्यात् ।

धर्मार्थं येन दत्तं स्यात् कस्मैचिद्याचते धनम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

पश्चाच्च न तथा तत्स्यान्न देयं तस्य तद्भवेत् ।।८-२१२।।

कश्चित् च उत्तमकार्यार्थं धनं प्रददाति परन्तु तस्योपयोगः नाभवत् तर्हि तदपि धनमनुपयुक्तमित्येव स्मृतिः वदति । परन्तु ददामि इति वचनं दत्त्वा अपि यदि समये न ददाति पुनः देयमिति नास्ति नियमः ।

५. कस्यचन चरसम्पदन्येषां हस्ते १० वर्षाणि अथवा ततोऽप्यधिकसमयाय भवेत् तस्य याजमान्यं समाप्येत एव ।

यत्किञ्चिद्दशवर्षाणि सन्निधौ प्रेक्षते धनी ।
भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति ।।८-१४७।।
अजडश्चेदपोगण्डो विषये चास्य भुज्यते ।
भग्नं तद्व्यवहारेण भोक्ता तद्द्रव्यमर्हति ।।८-१४८।।

तादृशी चरसम्पत् या न कस्यचिच्छिशिशोः दशवर्षाणि अथवा नोन्मत्तस्य विना बाधां तृतीयः कश्चन तस्योपयोगं कुरुते यस्य तद्धनमासीत् तस्याधिकारः विनश्यति । यस्य वशे तद्धनमासीत्सः तस्योपयोगं कर्तुमर्हति ।

६) न्यासः

पुनः प्रत्यर्पणस्य उत्तरदायित्वम्

यो यथा निक्षिपेद्धस्ते यमर्थं यस्य मानवः ।
स तथैव ग्रहीतव्यो यथा दायस्तथा ग्रहः ।। ८-१८०।

यदि कश्चिन्मानवः स्व सम्पदं कस्यचन हस्ते स्थापयति । तत्पुनः प्राप्तुं तस्याधिकारो वर्तते । यथा प्रतिष्ठापितं (जमा) तथैव तस्मै प्रत्यर्पणीयम् ।

न्यासं पुनरर्पयितुं दायित्वे असफलतायां विपरीताभ्यर्थना

यो निक्षेपं नार्पयति यश्चानिक्षिप्य याचते ।
तावुभौ चौरवच्छास्यौ दाप्यौ वा तत्समं दमम् ।।८-१९१।

केनचिन्निक्षिप्तं न्यासं कोऽपि तत्पुनरावर्तयितुं न प्रभवति । अथवा स्वनिक्षेपादधिकं वाञ्छति यत् नार्पितं च तस्मै चौर इव दण्डः दातव्यः । यावदुक्तः दण्डः तावत्सः दद्यात् ।

निक्षिप्तवस्तुनः अपेक्षया अधिकं राशिं निक्षेप्ता अभिलषति तद्दोषाय ।

तादृशः नरः उपर्युक्तनियमानुसारं चौरवत् अपराधी इति चिन्तयित्वा यावत् धनं सः निक्षिप्तवान् तत्समानः दण्डः तस्मै देयः ।

विपरीताभियोगिनं प्रति दायित्वम्

निक्षेपो यः कृतो येन यावांश्च कुलसन्निधौ ।
तावानेव स विज्ञेयो विब्रुवन्दण्डमर्हति ।।८-१९४।।

Digitization by Arya Samaj Charitable Foundation, Chennai

कतिचित्साक्षिणः पुरतः वा तेषामुपस्थितौ केनचित् किमपि वा वस्तु यद् कस्यचित्सकाशे निक्षिप्यते स्थाप्यते वा तस्मै तदेव वस्तु तस्यामेव मात्रायां पुनरर्पणीयम् । निक्षिप्तधनस्य यदि सः विरुद्धं राशिं वाञ्छति सः दण्डयितुमर्हः।

चौर्यं तथा सर्वनाशविषये (बर्बादी) न किमपि दायित्वम् ।

चौरैर्हृतं जलेनोढमग्निना दग्धमेव वा ।
न दद्याद्यदि तस्मात्सः न संहरति किंचन ॥८-१८९॥

यः निक्षेपं स्वसकाशे स्थापयति निक्षिप्तस्य धनस्यसमानं न प्रत्यर्पयितुं शक्नुयात् यदि न्यस्तं धनं अग्निजलेन वा नष्टं भवति। (८-१८९) (called vis-major in law)

अत्र तु एतत् ध्यातव्यम् - यत्कियता सावधानेन अयमपवादः अत्र योजितः । वर्तमानकालेऽपि विधिशास्त्रे एषःसिद्धान्तः सम्मिलितो वर्तते ।

सीमाविवादः

साक्षिणः अभावे राज्ञः निर्णयः।

सीमायामविषह्यायां स्वयं राजैव धर्मवित् ।
प्रदिशेद्भूमिमेतेषामुपकारादिति स्थितिः ॥८-२६५॥

यदि कस्याश्चन भूमेः सीमानिर्णयः साक्षिणः अभावे नैव भवितुमर्हति विवादस्य निर्णयं राजैव कुर्यात् । यतः विवादविषये विद्यमानान् सर्वान् पक्षान् श्रुत्वा निर्णयन्दद्यात् ।

एषः अतिप्रधानः सिद्धान्तः । सामान्यतः राजा साक्षिणमुपलक्ष्यैव विवादस्य निर्णयं करोति । किन्तूपर्युक्तं प्रकरणं साक्ष्यभावे तेन करणीयं भवति । सः स्वविवेकं न्याय्यपथंचानुसरन् निर्णयं स्वीकुर्यात् ।

संस्था सम्बद्धविषये शपथस्य भङ्गे दण्डः।

यो ग्रामदेशसङ्घानां कृत्वा सत्येन संविदम् ।
विसंवदेन्नरो लोभात्तं राष्ट्राद्विप्रवासयेत् ॥८-२१९॥

कस्याश्चन संस्थायाः वा सङ्घस्य सदस्योऽथवा तादृशः कश्चन जनः यश्च संस्थायाः नियतः सदस्यः। अन्यैर्येषां नियमानां पालनं क्रियते तथा एषोऽपि कुर्यात् ।

यदि सः तत् भङ्गं करोति तस्मै दण्डः देयो भवति ।

श्रम शासनम्

'अस्वास्थ्यकारणेन कार्यविलम्बे वेतने न्यूनीकरणं न स्यात्'

Digitization by Arya Samaj Charitable Foundation, Chennai

आर्तस्तु कुर्यात्स्वस्थः सन् यथा भाषितमादितः ।
स दीर्घस्यापि कालस्य तल्लभेतैव वेतनम् ।।८-२१६।।

यदि कश्चनकर्मकरः दत्तं कार्यमस्वस्थताकारणेन समये कर्तुं न शक्नोति सः स्वास्थ्यप्राप्त्यनन्तरं तत्कर्तुं प्रभवेत् । यदिकार्यसमाप्तौ विलम्बः स्यादपि सः पूर्वतनं वेतनं वश्यमेव लभते ।

मनोः अयं सिद्धान्तः सत्यमेव मानवीयतां पारिरक्षति । कोऽपि नियोक्ता कार्यविलम्बमेव कारणं मत्वा वेतने न्यूनीकरणमथवा वेतनं नास्ति इत्यपि वक्तुं न प्रभवेत् । तत्र विलम्बय्यः इति कारणमनुचितं न स्यात् ।

'राजा विध्यनुसारं अभियोगस्य निर्णयं कुर्यात् '

अमात्यमुख्यं धर्मज्ञं प्राज्ञं दान्तं कुलोद्गतम्।
स्थापयेदासने तस्मिन्खिन्नः कार्यक्षणे नृणाम् ।७-१४१।

यदि राजा न्यायस्याध्यक्षतां कर्तुं अनुपलब्धः तदा तस्य स्थानं न्यायाधीशोऽथवाऽमात्यः स्वीकुर्यात् ।

उपर्युक्तं प्रावधानं विशेषतः न्यायपरिरक्षणार्थं स्थापितं वर्तते । तस्य दायित्वमासीत् सः सम्यङ्निर्णयं कुर्यात् । केवलं अपवादे एव सः मुख्यन्यायधीशमध्यक्षतां कर्तुं प्रतिनियोजयेत्। न्याययुक्तं प्रशासनमीश्वरीयं कार्यं इति पूर्वजाः मन्वते स्म । नियमोऽयमप्यासीन्न्यायनिर्णयात्पूर्वं राजा ईश्वरस्य पूजां कुर्यात् ।

मौखिकं साक्ष्यम्

साक्षी कः स्यात् ?

स्मृतिशास्त्रे मौखिकसाक्ष्यविषये मूलभूतानां नियमानां विषये अप्युक्तं वर्तते। यान्साक्ष्यविषये स्वीकुर्वन्ति स्म ।

समक्षदर्शनात्साक्ष्यं श्रवणाच्चैव सिद्ध्यति ।।

यः पुरुषः यं विषयं वस्तुतः दृष्टवान् श्रुतवाननुभूतवान्स एव साक्ष्यं वक्तुमर्हः।

इमं श्लोकमुद्धरन्मेधातिथिः कथयति

समक्षदर्शनात्साक्षादनुभवाच्छ्रवणाच्च समक्षशब्दानुषङ्गः कर्तव्यः ।

यत्कुतश्चिदेकेन श्रूयते ततोऽन्येन तत्परम्पराश्रुतं तेन परम्पराश्रावि न साक्षी।

समक्षदर्शनम् - अस्यायमर्थः यः प्रत्यक्षं दृष्टवान् श्रुतवान् अनुभूतवान्स एव साक्ष्यं दातुमर्हति । अन्येन दृष्टं श्रुतमनुभूतमप्याधारीकृत्य साक्ष्यं वदति तत् अनुश्रुतिः कथ्यते । एषा विधिवत्साक्षी न भवेत् । एतद्भारतीय साक्ष्याधारनियमस्य धारा ६० इत्यनेन सममस्ति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

(ग) साक्षी रूपे कस्य परिक्षणं कर्तुं शक्यते ।

गृहिणीः पुत्रिणो मौलाः क्षत्रविट्छूद्रयोनयः ।
अर्थ्युक्तार्थ साक्षमर्हन्ति, नये केचिदनापदि ।।८-६२।।

योग्यः विश्वसनीयः गृहस्थः कस्याश्चिदपि जातेः देशस्य च नागरिकमपि विभिन्नपक्षैरभियोगस्य समये परीक्षितुं शक्यते ।

अनुभावी तु यः कश्चित्कुर्यात्साक्ष्यं विवादिनाम् ।
अन्तर्वेश्मन्यरण्ये वा शरीरस्यापि चात्यये ।।८-६९।।

गृहाभ्यन्तरे अरण्ये वा घटितां दुर्घटनाञ्जानाति यत्र च शरीरात्ययः (हत्या) अभवत् स च पुरुषः साक्षीं वक्तुं शक्नुयात् ।
साक्ष्यं दातुं यदि असफलः सः दण्डार्हः ।

त्रिपक्षादब्रुवन्साक्ष्यमृणादिषु नरोऽगदः ।
तदृणं प्राप्नुयात्सर्वं दशबन्धं च सर्वतः ।।८-१०७।

कश्चिन्नरः अस्वस्थतां विहायान्यकारणवशात्सूचनायां प्रदत्तायां सत्यामपि त्रिपक्षं यावत् (२१) दिनानि साक्ष्यं दातुं (वक्तुं) न्यायलये उपस्थितो न भवेत्तदा सोऽपि नियोगस्य सम्पूर्णव्ययं प्रति उत्तरदायित्वं वहेत्तथा राज्ञा निर्धारितदण्डस्य १/१० भागं स एव दद्यात् । साक्षिणः भावं भागिनोऽ अपि पश्येयुः ।

बाह्यैर्विभावयेल्लिङ्गैर्भावमन्तर्गतं नृणाम् ।
स्वरवर्णेङ्गिताकारैश्चक्षुषा चेष्टितेन च ।।
आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च ।
नेत्रवक्त्रविकारैश्च गृहयतेऽन्तर्गतं मनः ।।८-२५-२६।

कस्यचन मानवस्य अङ्गविन्यासेन भाषाप्रयोगैर्मुखबावैश्च तस्य मनसः आन्तरिकभावना ज्ञातुं शक्यते । एवं प्रकारेण राजा कस्यचन साक्षिण आचरणं परीक्ष्य तस्य स्थितिं जानीयात् ।

वर्तमान - न्यायव्यवस्थायां मौखिकसाक्षीणं प्रदातुः शरीरविन्यासोऽपि प्रधानोंऽशः । न्यायपरीक्षणं कर्तुः प्रथमन्यायाधीशस्याभिप्रायः अति महत्त्वं भवति। यः साक्षिणः आचरणं सुष्टु अवलोकयति ।

पराजयाधारः

ब्रूहीत्युक्तश्च न ब्रूयादुक्तं च न विभावयेत् ।
न च पूर्वापरं विद्यात्तस्मादर्थात्स हीयते ।।
साक्षिणः सन्ति मेत्युक्त्वा दिशेत्युक्तो दिशेन्न यः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

धर्मस्थः कारणैरेतैर्हीनं तमपि निर्दिशेत् ।।(८-५६-५७)

तादृशः कश्चन वादी आहूतश्चेदपि स्वपक्षं स्थापयितुमसमर्थः स्व साक्षिणमपि प्रस्तोतुं विफलः स्यात् यः स्व प्रकरणमपि न जानीयात् स्वस्योपरि विद्यमानमारोपमपि प्रमातुमसफलो भवेत्सः स्वाभियोगे पराजितः स्यात् ।

निर्णयस्य पुनरावलोकः

तारितं चशिष्टं च यत्र क्वचन यद्भवेत् ।
कृतं तद्धर्मतो विद्यान्न तद्भूयो निवर्तयेत् ।।९-२३३।।
अमात्याः प्राडिवाको वा युत्कुर्युः कार्यमन्यथा ।
तत्स्वयं नृपतिः कुर्यात् तान्सहस्त्रं च दण्डयेत् ।९-२३४।

यस्मिन् कस्मिन् अपि कर्मणि शासकीयप्रक्रिया समाप्ता भवति विध्यनुसारं निर्णयः दत्तोऽपि स च अन्तिमनिर्णयः स्यात् । यदि न्यायाधीशानामधिकारिणां दोषेण विपरीतः निर्णयः श्रावितः तदा राजा तादृशं विषयं पुनरवलोकयेत् । यः विपरीतनिर्णयं श्रावितवान् तस्मै सहस्त्रं पणानामर्थदण्डः प्रदेयः ।

मेधातिथिः तथा कुल्लूकः च कथयतः अन्तिमनिर्णयस्य पुनरावलोकनार्थं निषेधस्य प्रथमः सिद्धान्तः युक्तो भवति । यस्मिन् निर्णये न कोऽपि दोषः समाचरितः स्यात् । पुनर्विलोकनस्य नियमः न्यायाधीशैः कृतः विपरीतनिर्णयमुद्दिश्य भवेत् ।

(७) राजा अथवा तस्य सेवको वा कस्मिन् अपि विषये स्वप्रभावं न दर्शयेयुः।

नो त्पादयेत्स्वयं कार्यं राजा नाप्यस्य पूरुषः ।
न च प्रापितमन्येन ग्रसेदर्थः कथञ्चन ।।८-४३।।

न तु राजा न तस्य सेवको वा न किमपि प्रकरणं प्रारभेत ,न तु तद्गोपयेत्। यत्प्रकरणं कस्यचित्समक्षं स्थापितम् ।

उपर्युक्तः सिद्धान्तः सर्वेषु न्यायालयीयकार्येषु सम्बद्धो भवति । आपराधिकविषयेषु तु राज्यस्याधिकारिणामेतत्कर्तव्यं ते अपराधे सम्भूते सति अथवा तस्य सूचनायां प्राप्तायां अपराधिनं विरुद्ध्य आपराधिकाभियोगः प्रारब्धव्यः ।

निर्दोषी दण्डितः न स्यात् - अपराधी च दण्डनात् रक्षितः न स्यात् -

यावानवध्यस्य वधे तावान्वध्यस्य मोक्षणे ।
अधर्मो नृपतेर्दृष्टो धर्मस्तु विनियच्छतः ।।९-२४९।।

राजा निर्दोषिणं न कदापि दण्डयेत् । यदि कश्चित् दोषं करोति दण्डनं

Digitization by Arya Samaj Charitable Foundation, Chennai

विना सः न विमोचनीयः ।

न्यायप्रदानं न्यायाधीशस्य सर्वोच्चः धर्मः

सर्वाणि धर्मशास्त्राणि सकलाः स्मृतयः घोषयन्ति, न्यायदानं न्यायाधीशस्य सर्वोच्चं कर्तव्यम् ।

धर्मो विद्धस्त्वधर्मेण सभां यत्रोपतिष्ठते ।
शल्यं चास्य न कृन्तन्ति विद्धास्तत्र सभासदः ।।८-१२।।

(अ) विशिष्टप्रकरणानां निर्णयप्रदान-सन्दर्भे धर्मस्य पक्षः नश्यति तदा अन्यायं दूरीकर्तुं न्यायाधिकार्यसफलो भवति। तादृशः न्यायाधीशः नूनमेव स्वदोषाय भविष्येऽपि सङ्कण्टमनुभवेत् ।

यत्र धर्मो ह्यधर्मेण सत्यं यत्रानृतेन च ।
हन्यते प्रेक्षमाणानां हतास्तत्र सभासदाः ।। ७-१४।

(९) धर्मः अधर्मेण सत्यमनृतेन नाशं गच्छति यत्र न्यायाधिकरी धर्मं सत्यं वा पालायितुमशक्तः केवलं मूकप्रेक्षको भूत्वा पश्यन्भवेत्तर्हि तत्र तस्य विनाशः अवश्यम्भावी ।

(१०) यस्योपर्यभियोगः संस्थापितस्य तस्याभियोगस्य निर्णयानन्तरं न्यायालयः शुल्कं समादद्यात् ।

ऋणे देये प्रतिज्ञाते पञ्चकं शतमर्हति ।
अपह्नवे तद्द्विगुणं तन्मनोरनुशासनम् ।।८-१३९।।

राज्ञः यदभियोगस्य निर्णयः प्रतिवादिद्वारा स्वापराधस्वीकरणेन तं विरुद्ध्य निर्णयो यदि स्यात् तदा निश्चितमूल्यात्पञ्चप्रतिशतमधिकं स्वीकुर्यात् । अथवा प्रकरणे यावान्राशिः घोषितः तादृशगुणमधिकं समादानमुचितम् ।

आपराधिकं शासनम् -

एतदस्माकं राज्यशासनस्य विशेषता - न्यायलयीय - कार्यकलापः तेनैव सम्पूर्णः कृतः स्यात् यस्याधिकारः विनष्टोऽभवत् । न तृतीयव्यक्त्या। राजा तथा तस्याधिकारिणा तेषां परतः न्यायालयीयविषयान् उद्घाटयितुं प्रतिबन्धः विद्यते । तेभ्यः आपराधिकविषयाणां तेषां परतः निरीक्षणार्थं दायित्वं प्रदत्तम् । मनुस्मृतौ राज्ञः अपराधनियन्त्रणे दक्षता तथा अपराधान्वेषणमपराधिभ्यः दण्डं विधातुं च अधिकं दायित्वं प्रदत्तं वर्तते।

राज्यस्य कर्तव्यम् -

सभाप्रपापूशालावेशमद्यान्न विक्रयाः ।
चतुष्पथाश्चैत्य वृक्षाः समाजाः प्रेक्षणानि च ।९-६४।
जीर्णोद्यानान्यरण्यानि कारुकावेशनानि च ।

Digitization by Arya Samaj Charitable Foundation, Chennai

शून्यानि चाप्यगाराणि वनान्युपवनानि च ।९-६५।
एवं विधानृपो देशान्गुल्मैः स्थावरजङ्गमैः ।
तस्करप्रतिषेधार्थं चौरैश्चाप्यनुचारयेत् ।।९-६६।

(क) अपराधं कुर्वन्तः षड्यन्त्रं कुर्वन्तः समान्यतः भोजनालय वेश्यालय मदिरागृह भोजनविक्रेतुः आपणमुत्सवस्थान द्यूतगृहं प्राचीनोद्यान ंशिलानिर्मितप्राकृतिक-कृत्रिमवाटिकासु लभ्यन्ते ।

(ख) राजा तु एतेषां गृहाणां निरीक्षणार्थं सैनिकानां गुप्तचराणां व्यवस्थां कुर्वन् चौरान् सामाजिकानेतैः दूरे स्थापनार्थमादेशं दद्यात् ।

(ग) नृपः ये चौराः आत्मनः स्वभावं परिवर्तितवन्तः तानन्यान्यविभागेषु नियुक्तिं विधाय तेषां माध्यमेन अपराधं कुर्वतां चौराणामभिज्ञानं कृत्वा च तान् दण्डयेत् ।

मनुः (अ ९-२६४-२६६) न्यायालयीय दोषान् यत्र न्यायसम्बद्धाभियोगः प्रारभ्यते, तथा अपराधः च । येषां कृ ते राजापराधिनः प्रति क्रियान्वयनं (दण्डनं) ददाति । तेषां मध्ये स्पष्टं भेदं स्थापितवान् । वर्गीकरणायायं क्रमः आधुनिकन्यायशास्त्रेऽपि परिदृश्यते । एतत् प्राचीनं भारतीयं न्यायशास्त्रम्। तथा विश्वस्यान्यप्रचीनसांविधानिकव्यवस्थायाः भिन्नताप्रतीकम् ।

चौर्ये सहायता चौरेभ्य आश्रयदनं चौर्यसम्पत्तिस्वीकारोऽपि दण्डनीयः अपराधः।

अग्निदान्भक्तदांश्चैव तथा शस्त्रावकाशदान् ।
सन्निधातृंश्च मोषस्य हन्याच्चौरमिवेश्वरः ।।९-२७८।

कश्चिज्ज्ञाऽत्वापि चौरेभ्यः अग्निं भोजनं शस्त्रं आश्रयं च यच्छत्यथवा चौर्यवस्तूनि तेभ्यः स्वीकरोति ते शासकैः चौराः इव दण्डयितुं योग्याः ।

केषुचिद्विषयेषु दण्डविमुक्तिः

विशिष्टसन्दर्भेऽन्येषां केषाञ्चिद्वस्तूनां प्रयोजनं मनसि निधाय स्वीकारः चौर्यापराधान्तर्गतो न स्यात् ।

वानस्पत्यं मूलफलं दार्वग्नयर्थं तथैव च ।
तृणं च गोभ्यो ग्रासार्थमस्तेयं मनुरब्रवीत् । ।८-३३९।

वनस्पतिवस्तूनि फलं मूलकं इन्धनं गोभ्यः ग्रासार्थं तृणानामादानं स्तेयं नेति मनुरवदत् ।

अवसरेणकृ तापराधाय सामान्यः दण्डः ।

गृहं तडागमारामं क्षेत्रे वा भीषया हरन् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

शतानि पञ्च दण्ड्यः स्यादज्ञानाद्विशतोदमः ।।८-२६४।

अज्ञात्वैव कश्चन बलपूर्वकं गृहं तडागमुपवनं क्षेत्राण्यपि स्वाधीनं कुर्यादितत्कार्यं यदि सः असावधानेनाज्ञात्वा वा कृतवान् तर्हि सः द्विशतं पणानि दण्डरूपेण प्रदद्यात् ।

आत्मरक्षाधिकारः

गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम् ।
आततायिनमायन्तं हन्यादेवाविचारयन् । ८-३५०।
नाततायिवधे दोषो हन्तुर्भवति कश्चन ।
प्रकाशं वाप्रकाशं वा मन्युस्तं मन्युमृच्छति ।।८-३५१।

यदि कश्चिदाक्रमणकार्यकरणं हन्तुमागतस्तर्हि नरस्तं मारयति चेदपराधो न। वेदेष्वस्मिन्विषये बहुधा प्रोक्तं वर्तते । आक्रान्ता यदि गुरुर्बालः बहुश्रुतः ब्राह्मणः वृद्धो वा स्यात्तथाप्यात्मक्षार्थं हनने दोषो न ।

अस्मिन् सिद्धान्ते एव कुल्लूकस्य टिप्पणी एवमस्ति - राज्ञा सहयतां प्राप्तुं समयः नास्ति, अथवा तत्साहाय्यं विलम्बेन मिलेत् तेन च जीवनधारणे क्लेशः स्यात्तर्हि तदा व्यक्तयेऽयमधिकारः स्यात् यदात्मरक्षार्थं बलप्रयोगं सः कुर्यात् ।

यदि हन्त्राऽऽत्मानं रक्षितुं मार्गान्तरं नास्ति । तथा हन्तारं न हन्मः तदा स्वयमेव सः पुरुषः मरणमवाप्नुयात्। तादृशसन्दर्भे आत्मरक्षा एव कर्तव्या । याज्ञवल्क्य (२-२८६) व्याख्याने मिताक्षरायाः अभिप्रायोऽप्येवमेव । यः कश्चित् नरः कमपि दग्धुमथवा वञ्चनेन मारयितुमिच्छति, सः आततायी भवति। अन्यां दुर्घटनां रोद्धुं तस्य हननात् नान्यः पन्था अवशिष्टो भवति ।

आत्मरक्षायां वनिताः शिशवः दुर्बलाः अपिआयान्ति । मिताक्षरा वदति केवलमात्मरक्षार्थमेव हन्तारं मारयितुमधिकारः नास्ति, किन्तु ये चाक्रान्तारं विरुद्ध्य सङ्घर्षं कर्तुमशक्ताः बालाः स्त्रियः ता रक्षितुमपि उपर्युक्तनियमस्य परिपालनं स्यादिति ।

अर्थ दण्डस्य प्रमाणविषये निर्णयः ।

सर्वासु स्मृतिषु समानः सिद्धान्तः प्रतिपादितः अस्ति ययंयाधीशोऽथवा महाराजस्याध्यक्ष्ये कस्यचन विषयस्य कक्ष्य-प्रतिकक्षयोरभिप्रायसङ्ग्रहः कृतस्तथा न्यायालये अपराधस्य निर्णयानन्तरं दण्डस्य प्रमाणमवधिरेतयोरन्तिमः निर्धारः केवलं राज्ञा एव स्वीकार्यः । केवलम् अभियोगे अपराधस्य निष्कर्षानन्तरमेव न किन्तु अन्याः परिस्थितीः अवलोक्य राजा दण्डयितुं स्वतन्त्रोऽस्ति । अस्याः

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रक्रियायाः महत्त्वम् आपराधिकप्रक्रियासंहिता १९७३ इत्यस्य अधीनं वर्तते । दण्डस्य प्रमाणं निर्णेतुं प्रत्येकम् अवलोकनस्य आवश्यकता अस्ति ।

अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः ।
सारापराधौ चालोक्य दण्डं दण्ड्येषु पातयेत् । ८-२६ ।
अधर्मदण्डनं लोके यशोघ्नं कीर्तिनाशनम् ।
अस्वर्ग्यं च परत्रापि तस्मात्तत्परिवर्जयेत् । ८-२७ ।
अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति नरकं चैव गच्छति । ८-२८ ।

राजा प्रमाणसन्दर्भे पूर्णतया तलस्पर्शिविमर्शं कुर्यात् ।

(अ) उद्देश्यम्
(ब) घटनास्थानम्
(स) यस्योपरि दण्डो विधेयः तस्य क्षमता
(द) अपराधस्य स्वभावः यदर्थं दण्डः प्रदेयः अस्ति ।

राजा सर्वप्रथमम् अपराधिनं मृदुवचनैः एव पूर्वज्ञापनं कुर्यात् । तत्पश्चात् कठोरशब्दैः निन्दां कुर्यात् तथा अनन्तरम् अर्थदण्डमेवं शारीरकं दण्डं दद्यात् ।

यदि राजा निर्दोषिणे अपि अर्थदण्डं शारीरकदण्डं च दद्यात् तर्हि सः स्वयम् अत्यन्तं कलङ्कितो भूत्वा मृत्योः पश्चात् नरकस्य अधिकारी स्यात् ।

उपर्युक्तविषयेण एतत् ज्ञायते यत् राजा तु दण्डस्य उद्घोषणात् पूर्वं विवेकी भूत्वा कार्यं कुर्यात् । सर्वप्रथमं सः स्वकार्येषु सावधानः स्यात् अपराधी दोषम् आचरदिति पूर्णविश्वासः राज्ञि स्यात् ।

अपराधी दोषं कृतवान् इति तु निस्सन्देहः । तथापि दण्डं यदा राजा श्रावयति तदा अपराधिनः वयः दैहिकीं स्थितिं स्वास्थ्यं दण्डधाराणक्षमता कियती वर्तते इति अंशं च सः सावधानतया अवलोकयेत् ।

कदाचित् अपराधी मिथ्यामार्गम् अनुसरन् स्वदण्डनं न्यूनीकर्तुं भिन्नं भिन्नं भावं शारीरकाक्षमतां दर्शयेत् । तदा अपराधिनः पूर्वचरित्रस्य अध्ययनं कर्तव्यम् आपतति । तथापि अपराधिनं प्रति राजा दयावान् स्यात् ।

राजादेशस्य अनुपालनं स्यात्

तस्माद्धर्मं यमिष्टेषु वा व्यवस्येन्नराधिपः ।
अनिष्टं चाप्यनिष्टेषु तं धर्मं न विचालयेत् ।। ७-१३ ।।

राजा विधिसम्मतविषयान् न उल्लङ्घयेत् । सर्वे राज्ञः निर्णयस्य पालनं कुर्युः । अस्यायं परामर्शः अस्ति यत् नियमं राजा एव कुर्यात् । परन्तु विधिशब्दः अत्र

Digitization by Arya Samaj Charitable Foundation, Chennai

केवलं सीमितमेव अर्थं कथयति । अस्येदं तात्पर्यम् - लिखितशास्त्रस्य गृहीताचरणस्य च नियमानां विरोधं विना राजा स्वादेशं प्रकटयेत् । मेधातिथिः कुल्लूकः इत्यादयः व्याख्याकाराः इमं सिद्धान्तं विवृण्वन्तः अकथयन् यत् महाराजाय दण्डदानस्य अधिकारः केवलं लौकिकविषयैः सम्बद्धो वर्तते इति ।

द्यूतः समाह्वयः च तिरस्कृतौ स्याताम् -

मनुस्मृतिः वदति - द्यूतं समाह्वयः च (सट्टेबाजी) उभावपि राज्ये प्रतिषिद्धौ भवेताम् इति । यतः एतौ द्वावपि घातकौ एव । अस्मिन् विषये ये द्यूते समाह्वये च संलग्ना भवन्ति ते स्वयमेव विनष्टा भवन्ति । तेषां पारिवारिकसदस्याः सङ्कटम् अनुभवेयुः।

द्यूतः समाह्वयस्य च परिभाषा -

अप्राणिभिर्यत्क्रियते तल्लोके द्यूतमुच्यते ।
प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः ।।९-२२३।।

कश्चित् अजीवं वस्तु कूटयुक्तौ संस्थाप्य यदि खेलेत् तर्हि तद् द्यूतमिति कथ्यते । यश्च प्राणिनः संस्थाप्य खेलति स च समाह्वयः इति कथ्यते ।

अस्मिन् विषये विज्ञानेश्वरस्य अभिप्रायं पश्यामः । अजीववस्तूनि (निर्जीवाणि) संयोज्य या क्रीडा तस्य द्यूतम् इति नाम । एवमेव कुक्कुट-शुक-अज-वृषभादीन् उपयुज्य या क्रीडा भवेत् तत् विधिरूपेण प्राणिद्यूतम् इति कथ्यते । अत्र मनोः वचनम् - निर्जीवविषये क्रीडा द्यूतं, सजीवैः क्रीडा समाह्वयः भवति इति ।

एषः दुःखदः विषयः यत् मनुस्मृतौ प्रदत्ता सावधानता बहुभिः नैव दृष्टा, अनुभूता च । मनुस्मृतौ 'द्यूत'पदेन अश्वखेलनम् एव परामृष्टम् । परन्तु सर्वोच्चन्यायालयः किञ्चिद्विरुद्धार्थं वदन् अश्वद्यूतं निपुणाक्रीडा इति अन्वमन्यत । सर्वोच्चन्यायालयः यद्यपि अश्वद्यूतं द्यूतम् इति न मन्यते, किन्तु तदर्थं मनुस्मृतौ आधारणवाक्यं दृष्टान्तरूपेण दातुं शक्यते ।

द्यूतं समाह्वयश्च प्रतिषिद्धौ भवेताम् ।

द्यूतं समाह्वयं चैव राजा राष्ट्रान्निवारयेत् । (९-२२१)
राजान्तकरणावेतौ द्वौ दोषौ पृथिवीक्षिताम् ।।
प्रकाशमेतत्तास्कर्यं यद्देवनसमाह्वयौ ।
तयोर्नित्यं प्रतीघाते नृपतिर्यत्नवान् भवेत् । (९-२२२)
एते राष्ट्रे वर्तमाना राज्ञः प्रच्छन्नतस्कराः ।
विकर्मक्रियया नित्यं बाधन्ते भद्रिकाः प्रजाः । (९-२२६)
द्यूतमेतत्पुराकल्पे दृष्टं वैरकरं महत् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

तस्माद्द्यूतं न सेवत हास्यार्थमपि बुद्धिमान् । (९-२२७)

(क) राजा द्यूते समाह्वये च प्रतिबन्धं स्थापयेत् । यतः तदूभयं राज्यविनाशस्य कारणं स्यात् ।

(ख) द्यूतं समाह्वयः च प्रत्यक्षं चौर्यमेव । एतौ द्वावपि समापयितुं राजा सर्वदा प्रयत्नशीलः स्यात् ।

(ग) तादृशः कश्चन राज्ये आत्मानं गोपयित्वा निवसेत् सः स्वाधर्मैः अकर्मभिः प्रजाविनाशस्य हेतुः भवति ।

(घ) प्राचीने काले द्यूतं शत्रुतायाः कारणम् आसीत् । विवेकी न कदापि अस्य अभ्यासं कुर्यात् । मनोविनोदार्थमपि न खेलेत् ।

अतः उपर्युक्तनिदेशैः एतद्राजा जानीयात् तस्य राज्ये द्यूतस्य प्राणिद्यूतस्य चापि निषेधो भवेत् । द्यूतविषयमेव उदाहरन्तः मनुस्मृतेः व्याख्यातारः राज्ञः नलस्य युधिष्ठिरस्य च उदाहरणं यच्छन्ति ।

द्यूतप्राणिद्यूतयोः विचारे –

प्रच्छन्नं वा प्रकाशं वा तन्निषेवेत यो नरः ।
तस्य दण्डविकल्पः स्याद्यथेष्टं नृपतेस्तथा ।।९-२२८ ।

गुप्तरूपेण प्रकाशेन वा यो हि अधर्मकार्ये संलग्नः स्यात् तस्मै सर्वस्मै अपि जनाय दण्डः प्रदातव्यः । राजा स्वेच्छनुसारम् अर्थदण्डं विदध्यात् ।

। व्यभिचारः ।

शास्त्रेषु परस्त्रीगमनं निकृष्टापराधः इति कथ्यते । स्मृतिः वदति – शारीरकसुखं विवाहितदम्पत्योः मध्ये एव स्यात् । तद्विना परस्त्रिया संसर्गः निषिद्धः एव ।

न हीदृशमनायुष्यं लोके किञ्चन विद्यते ।
यादृशं पुरुषस्येह परदारोपसेवनम् ।। ४-१३४ ।।

अस्मिन् जगति जीवनं नाशयितुं समाजे अनादरं प्राप्तुं सर्वाधिकं निकृष्टं कार्यम् अस्ति परस्त्रीगमनमेव । अतः व्यभिचारात् विना नान्यः कश्चन अपराधः अस्ति ।

दम्पत्योः परस्परदाम्पत्यधर्मापेक्षया अन्यलैङ्गिकव्यवहारस्य नाम व्यभिचारः इति ।

उपचारक्रिया केलिः स्पर्शो भूषणवाससाम् ।
सह खट्वासनं चैव सर्वं सङ्ग्रहणं स्मृतम् ।। ८-३५७ ।।

अन्यवनिताभ्यः सुगन्धितमालाप्रदानं, पुष्पगुच्छोपहारः, असभ्यहास्यवचन-कथनं, हस्तस्पर्शः, तस्याः आभूषणानां वस्त्राणां च स्पर्शः, तया सह एकस्मिन्नेव

Digitization by Arya Samaj Charitable Foundation, Chennai

भाजने भोजनम्, एकस्यामेव शय्यायां शयनम् इत्यादयः व्यभिचारपदेन निर्देष्टुम् अर्हाः । स्मृतिभाषायाम् एतस्य 'सङ्ग्रहणम्' इति नाम । अत्र मनोः इमं सिद्धान्तम् अवलम्ब्य अवश्यमेव अस्य विषयस्य उल्लेखः उचितः इति भाति । 'वेलेंटाईन्'-दिवसस्य नाम्नि समग्रे देशे यत् प्रचलति, तत् उद्दिश्य किञ्चित् अवधानस्य आकर्षणम् उचितम् । तादृश्यः महिलाः पुरुषाः ये याः परस्परम् आश्रमधर्मं न पालयन्तः अथवा एका कन्या यस्याः उपयमः केनचिन्निश्चितः परन्तु विवाहः नैव सम्पन्नः अथवा अन्येन तृतीयेन सह समागमः शास्त्रविरुद्धं कर्म एव । एषः अपि नूनं व्यभिचार एव स्यात् ।

स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तया ।
परस्परस्यानुमते सर्वं सङ्ग्रहणं स्मृतम् ।। ८-३५८ ।

काचित् स्त्रीः पुरुषेण आत्मनः गुप्ताङ्गानां स्पर्शम् इच्छति पुरुषः अपि अन्यस्त्रिया परस्परानुमतौ अपि एतच्छास्त्रविरुद्धम् अथवा व्यभिचारकोट्यामम् एव आपतति ।

प्रायश्चित्तम् -

अपराधस्य न्यूनीकरणं वा अपसारणम् ।

प्रायश्चित्तापराधेन युक्तः कश्चित्पक्षः । यस्य न्यायालयस्य शासनेन न किमपि तात्पर्यम् । परन्तु कोऽप्यनेन आधारेण स्वदण्डं न्यूनीकर्तुं शक्नुयात् । विभिन्नप्रकाराणां दण्डानां विषये चर्चयन् धर्मशास्त्रे तद्विषये प्रथमाध्याये एव लिखितः अस्ति । यस्य नाम प्रायश्चित्तम् इति । अस्मिन् भागे अपराधस्य न्यूनीकरणार्थं तदपसारणाय च नैके मार्गाः उपदिष्टाः सन्ति ।

धर्मशास्त्रेषु स्मृतिष्वपि चर्चितप्रायः अयं विषयः - मानवः स्वापराधकारणेन न केवलं पृथिव्याम् अपि तु मृत्योः पश्चात् पुनर्जन्मानन्तरमपि कृतापराधानां विषये पीडितः प्रताडितः अपि स्यात् । एवंप्रकारेण अयं पुनर्जन्म तथा कृतकर्मणः विश्वासमपि दृढीकरोति ।

शास्त्राणि स्मृतयश्च एतादृशानाम् अपराधानां दोषावगमनेन तन्मुक्तिमार्गम् अपि उपदिशन्ति। राज्ञा श्रावितं दण्डं विना स्मृतयः शास्त्राणि च तादृशान् उपायान् निगदन्ति, येषु अपराधकर्ता प्रायश्चित्तं विधाय नैतिकं धार्मिकं मार्गं विरुद्ध्य कृतापराधैः मुक्तिं प्राप्नुयात् । एतत् प्रायश्चित्तं मुक्तवातावरणे गोपनीयरीत्या अपि भवितुम् अर्हति । एतत् मार्गदर्शिसूत्रम् अपराधिभिः स्वदोषस्वीकारेण समाजे पुनः पूर्ववत् गौरवान्वितं स्थानं लब्धुम् अवकाशः स्यात् । तथा

Digitization by Arya Samaj Charitable Foundation, Chennai

अपराधसङ्ख्यां न्यूनीकर्तुम् अपि सहायकं स्यात् ।

आत्मशुद्धेः कतिचित् उपायाः

स्वीकारोक्तिः वा पश्चात्तापः । - स्मृतिः घोषयति यत् मानवः स्वापराधं दोषः इति स्वीकृत्य पुनस्तादृशम् अपराधं न करिष्यामि इति प्रतिज्ञां विधाय अपराधप्रमाणं न्यूनं कुर्यात् ।

यथा यथा मनस्तस्य दुष्कृतं कर्म गर्हति ।
तथा तथा शरीरं तत् तेनाधर्मेण मुच्यते ।।११-२३० ।।

कश्चित् नरः स्वेन आचरितानां कुकर्मणां प्रभवेण आघातम् अनुभूय स्वान्ते पश्चात्तापम् अनुभवन् पुनः तादृशम् अपराधं न करिष्यामि इति सत्यसङ्कल्पं करोति सः अपराधात् मुक्तः स्यात् । अपराधसम्मतिरपि तदुक्तिर्वा प्रधानमेव अस्ति । अस्मिन् विषये मनोः वचनम् -

यः स्वापराधं स्वीकरोति तस्य दण्डोऽर्ध एव अवशिष्यते । येन क्रैष्टः अपि स्वीकारोक्तिम् उक्त्वा पश्चात्तापशिक्षाम् अयच्छत् ।

* * *

Digitization by Arya Samaj Charitable Foundation, Chennai

त्रयोदशः अध्यायः

जनहितव्यवस्थायाः विहङ्गमविलोकः

मनुस्मृतेः पूर्वतनेषु अध्यायेषु शान्त्या सफलतापूर्वकं जीवननिर्वहणाय सामान्यं मार्गदर्शनं दत्तम् । अनेन सह जनानां हितरक्षणं तथा राज्यहितसहितं जनानां क्रियकलापाः सामाजिकनियन्त्रणाय उपयोगिन्यः उत्तमव्यवस्थाः सम्मिलिताः । एतेषु विषयेषु केचन विषयाः मनुस्मृतौ प्रोक्तानां विभिन्नान् विषयान् प्रति अस्माकं मार्गदर्शनं कुर्वन्ति । तादृशविषयाणां व्यवस्थाविषये अस्मिन् अध्याये विचारः कृतः वर्तते ।

सार्वजनिकापराधं निरोद्धुं विफलता यदा आपतेत् तदा –

ग्रामघाते हिताभङ्गे पथि मोषादिदर्शने ।
शक्तितो नाभिधावन्तः निर्वास्याः सपरिच्छदाः ।। ९-२७४ ।।

कश्चित् पुरुषः ग्रामस्य लुण्ठनं, सेतोः विनाशः, मार्गलुण्ठनम् इत्यादीन् अपराधान् वीक्षमाणोऽपि स्वबलानुसारं तदवरोद्धुं यदि न प्रभवेत् तर्हि सः चरसम्पत्तिभिः राज्याद् निष्कास्यः ।

अत्र उद्धतः सिद्धान्तः इमम् अभिप्रायं द्रढयति । समाजस्य सर्वोऽपि जनः अपराधं रोद्धुं क्षमः स्यात् । समाजं प्रति स्वकर्तव्यम् अपि जानीयात् । सर्वषामपि नागरिकाणाम् इदं प्रथमं कर्तव्यम् अस्ति यत् ते स्वस्य उपसथितौ जनसम्पत्तेः हान्या सह सकलविधम् अपराधम् अवरोद्धुं शासनस्य साहाय्यं कुर्युः । स्व-क्षमतानुसारम् इति पदस्य अयम् अर्थः, मानवः समाजस्य राष्ट्रस्य च रक्षणार्थं किं कुर्यात् ? समाजः अपि तेन किम् इच्छति ? अतः यथाशक्ति सः समाजस्य हितार्थं सहयोगं दद्यात् । यदि असाध्यं तर्हि दोषः न । तथापि अग्रे प्रत्यक्षम् अपराधं दृष्ट्वा वीक्षकः भूत्वा स्थीयेत यत् सः अपराधाय ! विष्णुस्मृतौ (पृ. सं. – ३१ /७४) अस्य एव सिद्धान्तस्य पुनरुक्तिः वर्तते । घटनास्थले भूत्वाऽपि यः कष्टे विद्यमानानां साहाय्यं न कुर्यात् तस्मै द्विगुणितः दण्डो विधेयः । एषः सिद्धान्तः प्राचीनविधिशास्त्रलेखकानां व्यापकदूरदर्शित्वस्य सङ्केतः

Digitization by Arya Samaj Charitable Foundation, Chennai

सार्वजनिकान् उद्दिश्य सामन्यस्यापि किं कर्तव्यम् इत्यपि निर्दिशति । वर्तमानकालस्य शासने एतादृशस्य दूरदर्शित्वस्य अभावः दृश्यते । साम्प्रतं सर्वत्रापि एतत् सामान्यं स्यात् तत् बस्निस्स्थानम् उत रैल्वेनिस्स्थानं सर्वत्रापि सार्वजनिकानां बहुसम्पत्तीनां हानिः भवति । तथापि बहवः निष्क्रियाः भूत्वा ताः पश्यन्तः तिष्ठन्ति । क्रिया प्रतिक्रिया वा तैः नैव दर्श्यते । सर्वेषां नागरिकाणाम् अधिकारः अस्ति तादृशघटनानां विरोधं कर्तुम् ।

राज्यं विरुध्य अपराधः

राज्यसम्पत्तौ (कोशे वा) बलात् प्रवेशः

कोष्ठागारायुधागारदेवतागारभेदकान् ।
हस्त्यश्वरथहर्तृंश्च हन्यादेवाविचारयन् । ९-२८०।

यदि कश्चित् राज्याभाण्डागारस्य शस्त्रागारस्य मन्दिरस्य वा भञ्जनं कृत्वा तत्र विद्यमानानि वस्तूनि चोरयति हस्त्यश्वरथादीन् हरेत् सः मृत्युदण्डाय योग्यः ।

राज्ञः भाण्डागारे अक्रमप्रवेशः राजानं विरुध्य कुतन्त्रम्

राज्ञः कोशोपहर्तॄन् प्रतिकूलेषु च स्थितान् ।
घातयेद्विविधैर्दण्डैररीणां चोपजापकान् ।। ९- २७५ ।

यः महाराजस्य कोशागारे लुण्ठनं तथा शत्रुभिः सह मिलित्वा राजानं विरुध्य कुतन्त्रं वा कुर्यात् सः मृत्युदण्डाय योग्यो भवति । राज्ञः आदेशं अवमत्य यः विरुद्धम् आचरति तस्मापि अयमेव दण्डः उचितः ।

कूटशासनकर्तॄंश्च प्रकृतीनाञ्च दूषकान् ।
स्त्रीबालब्राह्मणघ्नान् च हन्याद्द्विट्सेविनस्तथा ।। ९-२३२ ।

यः राज्ञः आदेशस्य उल्लङ्घनं कुर्यात्, मन्त्रिणं भ्रष्टं कुर्यात्, शत्रूणामपि साहाय्यं कुर्यात्, बलात् च स्त्रीबालब्राह्मणान् हन्यात्, तस्मै मृत्युदण्डः प्रदेयः ।

राज्यस्य संपदः प्रतिषिद्धवस्तूनां वा विक्रयः

राज्ञः प्रख्यातभाण्डानि प्रतिषिद्धानि यानि च ।
तानि निर्हरतो लोभात्सर्वहारं हरेन्नृपः ।। ८-३९९ ।।

यदि कोऽपि महाराजस्य कोशागारस्य वा सम्पदम् अन्यस्मै दद्यात् अथवा प्रतिषिद्धस्य वस्तुनः (यस्य निर्यातं निषिद्धं अस्ति तस्य) निर्यातं कुर्यात् तस्य नरस्य सम्पदं राजा स्वाधीनां कुर्यात् ।

साक्षिणः अपराधः - असत्यसाक्षिणे दण्डः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

लोभान्मोहद्भयान्मैत्रात्कामात्क्रोधात् तथैव च
अज्ञानाद्बलभावाच्च साक्ष्यं वितथम् उच्यते । ८-११८ ।
लोभात्सहस्रं दण्ड्यस्तु मोहपूर्वन्तु साहसम् ।
भयाद्वौ मध्यमौ दण्डौ मैत्रात्पूर्वं चतुर्गुणम् । ८-१२० ।
कामाशगुणं पूर्वं क्रोधात्तु त्रिगुणं परम् ।
अज्ञानाद् द्वे शते पूर्णे बालिश्याच्छतमेव तु । ८-१२१ ।
एतानाहुः कौटसाक्ष्ये प्रोक्तान्दण्डान्मनीषिभिः।
धर्मस्याव्यभिचारार्थमधर्मनियमाय च । ८-१२२ ।

यदि लोभात् व्याकुलतया भयात् मित्रतया स्त्रीभोगेच्छया वा अन्यस्य कथनं श्रुत्वा च विपरीतसाक्ष्यं यः ददाति स च एतैः दण्डैः दण्डितः स्यात् । कारणैः विपरीतं साक्ष्यं वदति तस्मै दीयमानाः दण्डाः ।

१) स्वार्थात् लोभाद् वा - एकशतं पणाः ।
२) व्याकुलता भ्रमः - न्यूनतमः दण्डः ।
३) भयम् - मध्यदणडस्य द्विगुणितम् ।
४) मित्रता - न्यूनतमदण्डस्य चतुर्गुणः ।
यदि ब्राह्मणः एवं कुर्यात् सः
देशात् बहिः निष्कासितः स्यात् ।
५) क्रोधः - मध्यदण्डस्य त्रिगुणितम् ।
६) असावधानता - द्विशतं पणानां ।
७) बालिश्यात् - एकशतं पणाः ।

न्यायस्य उत्तमां व्यवस्थां परिपालयितुम् असत्यसाक्षं कथयताम् एतादृशी दण्डस्य परिकल्पना ।

सुरक्षाधिकारिणः कर्तव्यच्युतौ

राष्ट्रेषु रक्षाधिकृतान् सामन्तश्चैव चोदितान् ।
अभ्याघातेषु मध्यस्थान् शिष्याच्चौरानिव द्रुतम् ।। ९-२७२ ।

राज्ञा नियुक्तः अधिकारी राज्यस्य प्रजानां वा रक्षासमये शत्रूणां लुण्ठकानां च आक्रमणकाले निष्क्रियः यदि भवेत् तर्हि सः चौरः इव दण्डयितव्यः ।

यद्यपि प्रथमे भागे नागरिकाणां रक्षा प्रत्येकम् अपि प्रजायाः विधिद्वारा

Digitization by Arya Samaj Charitable Foundation, Chennai

निर्दिष्टं कर्तव्यम् । द्वितीये भागे नागरिकाणां रक्षार्थं नियुक्ताः अधिकारिणः तेषां रक्षायाम् असमर्थाः भवन्ति तान् अपि दण्डयितुं विधौ अवकाशः अस्ति । साम्प्रतं घटितासु घटनासु सुरक्षाविषये यदा प्रश्नः समुत्पन्नः तदा शासनेन असहायकानां परीक्षार्थं निवारकव्यवस्थां संयोजयितुम् अभ्यर्थना कृता वर्तते । तस्मादेव कारणात् आपराधिकविधिसंशोधनहेतोः १९८० इत्यस्य १६२ विधेयकम् आनीतम् ।

विभिन्नप्रकाराणाम् अथवा कापट्यैः क्रियमाणाः अपराधाः ।

उत्कोचकश्चौपधिका वञ्चकाः कितवास्तथा ।
मङ्लादेशवृत्ताश्च भद्रश्चोक्षणिकैः सह । ९-२५८ ।
तान्विदित्वा सुचरितैर्गूढैस्तत्कर्मकारिभिः ।
चारैश्चानेकसंस्थानैः प्रोत्साद्यवशमानयेत् । ९-२६१ ।

ये च उत्कोचं स्वीकुर्वन्ति वञ्चकाः धूर्ताः ये च बलप्रयोगेण धनमाहरन्ति ये च असत्यभविष्यवाणीं वदन्ति यथा त्वया धनं लभ्यते, तव पुत्रोत्पत्तिः भवति इत्यादिभिः धनसंग्रहं कुर्वन्ति ते छलिनः कपटिनः भवन्ति । एवम् असत्यं वदतः जनान् अन्विष्य तादृशेभ्यः उचितदण्डं दद्यात् ।

मनुस्मृतेः प्रमुखः व्याख्याकारः मेधातिथिः वदति – यस्य सन्देहास्पदं व्यवहारः यः दयालुः इव व्यवहरति सः अन्ततः क्रूरी । गुप्तरूपेण अन्येभ्यः असम्यक् दुष्टमार्गेण आग्रहेण वा भाययित्वा वा धनं स्वीकरोति तम् औपधिकरूपेण (कपटी) परिभाषयति । कुल्लूकस्तु औपाधिकं (ब्लेक् मेलर्) कथयति । औपाधिकाः ते भवन्ति ये च भयं दत्त्वा धनम् उपार्जयन्ति ।

ठत्तमम् इत्युक्त्वा दुर्बीजानां विक्रयणम् ।

अबीजविक्रयी चैव बीजोत्कृष्टं तथैव च ।
मर्यादाभेदकश्चैव विकृतं प्राप्नुयाद्वधम् । २-२९१ ।

यस्तु बीजानि उत्तमानि इत्युक्त्वा दुर्बीजानां विक्रयणं करोति सः कठोरदण्डं प्राप्तुं योग्यः ।

व्यवसायिकव्यापारसंहितायाः ठल्लङ्घनम्

चिकित्सकानां सर्वेषां मिथ्यप्रचरतां दमः ।
अमानुषेषु प्रथमः मानुषेषु तु मध्यमः । ९-२८४ ।

ये च रोगिणां विपरीतम् उपचारं कुर्वन्ति तादृशाः चिकित्सकाः अर्थदण्डार्थम्

Digitization by Arya Samaj Charitable Foundation, Chennai

अर्हाः । पशूनां विपरीतोपचाराणां विषये निम्नतमः दण्डः प्रदेयः । मनुष्याणां विषये मध्यदण्डः भवेत् ।

अत्र एतदवश्यं वक्तव्यम् अस्ति चिकित्सकानां व्यवसाये असावधनता, अथवा आचारसंहितायाः उल्लङ्घनम् ग्राहकसंरक्षणाधिनियमानुसारं यः व्ययः रोगिणा कृतः तस्य निस्तारं सः लब्धुं शक्नोति ।

अदूषितानां द्रव्याणां दूषणे भेदने तथा ।
मणीनामपवेधे च दण्डः प्रथमसाहसः । ९-२८६ ।

शुद्धानि द्रव्याणि कलुषितैः वस्तुभिः मिश्रीकृत्य क्रयविक्रयं वा करोति सः प्रथमदण्डेन दण्ड्यः स्यात् ।

समैर्हि विषमं वस्तु चरेद्वै मूल्यतोऽपि वा ।
समाप्नुयाद्दमं पूर्वं नरो मध्यम एव च । ९-२८७ ।

यः नरः स्वग्राहकैः अप्रामाणिकतया व्यवहरति मूल्यविषयेषु वञ्चनं करोति तस्मै प्रथमः मध्यमो वा दण्डः देयः ।

मेधातिथेः अनुसारं क्रीतवस्तुनः मात्रा यावत् स्यात् तस्य न्यूनतममात्रा प्रदानस्य दोषः अस्यामेव श्रेण्याम् आयाति ।

प्रकाशवञ्चकास्तेषां नानापण्योपजीविनः ।
प्रच्छन्नवञ्चकास्त्वेते ये स्तेनाटविकादयः ।। ९-२५७ ।

तान्विदित्वा सुचरितै गूढैस्तत्कर्मकारिभिः ।
चारैश्चानेकसंस्थानैः प्रोत्साद्य वशमानयेत् ।। ९-२६१ ।

ये च आपणेषु क्रयविक्रयसन्दर्भे बहुविधवञ्चनां कुर्वन्ति, ते च मुक्तधूर्ताः इति नाम्ना व्यवहर्तुम् अर्हाः । एतान् गुप्तचराणां साहाय्येन बद्ध्वा अपराधस्य गम्भीरतानुसारं दण्डम् दद्यात् ।

सम्पदं विरुद्ध्यापराधः । अथवा अन्येषां सम्पत्तेः क्षतिः ।

द्रव्याणि हिंस्याद्यो यस्य ज्ञानादज्ञानतोऽपि च ।
स तस्योत्पादयेत्तुष्टिं राज्ञे दद्याच्च तत्समम् । ८-२८८ ।

यदि कश्चन पुरुषः ज्ञात्वा अज्ञात्वा वा अन्येषां धनस्य अपहरणं हानिं वा करोति तस्याः सम्पत्तेः धारकस्य तस्योचितमूल्यं दत्त्वा तथा राज्ञे च हान्यनुसारं अर्थदण्डस्य निस्तारः कर्तव्यः ।

तत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि ।

Digitization by Arya Samaj Charitable Foundation, Chennai

न तत्र प्रणयेत् दण्डं नृपतिः पशुरक्षिणाम् ।। ८-२३८ ।

यदि क्षेत्राणि परितः वृतिः न निर्मिता स्यात् कस्यचन पशवः तत्रागत्य क्षेत्रं नाशयन्ति पशुपालकः ज्ञात्वा तान् तत्र प्रेषयति इति कृत्वा क्षेत्रस्य स्वामी तान् उद्दिश्य कमपि दण्डं न दद्यात् । क्षेत्रस्वामिनः हानिं पूरयितुं पशुपालकाः बाध्याः न भवन्ति ।

यश्च क्षेत्रस्वामी वर्तते तस्य प्रथमम् इदं कर्तव्यं भवति यत् अन्यप्राणिपशुभिः स्वक्षेत्रं रक्षितुं वृतिं कुर्यात् । यदि क्षेत्ररक्षणं कर्तुम् असमर्थः स्यात् तर्हि हानिपूर्त्यै कं वदेत् ।

सेतुसीमायाः भञ्जनम्

तडाकभेदकं हन्यादप्सुशुद्धवधेन वा ।
यद्वापि प्रतिसंस्कुर्याद्दाप्यस्तूत्तमसाहसम् । ९-२७९ ।

या सेतुं तटबन्धं तडागं च भञ्जते तं जले मज्जयित्वा तस्मै मृत्युदण्डस्य शिक्षा देया । अपराधकर्ता स्वशक्त्या हानेः निस्तारं करोति तस्मै उच्चतमदण्डः प्रदेयः ।

जलस्त्रोतसः हरणम्

यस्तु पूर्वनिविष्टस्य तडाकस्योदकं हरेत् ।
आगमं वाप्यपां भिद्यात्स दाप्यः पूर्वसाहसम् । ९-२८१ ।

यश्च नरः तडागादीनां जलस्त्रोतः नाशयति तस्मै न्यूनतमः दण्डः प्रदेयः ।

सेतुबन्धस्य नाशनम्

सङ्क्रमध्वजयष्टीनां प्रतिमानाञ्च भेदकः ।
प्रतिकुर्याच्च तत्सर्वं पञ्च दद्याच्छतानि च । २-२८५ ।

कश्चित् नरः सेतुं मन्दिरस्य ध्वजं राजभवनं पवित्रस्तम्भं मूर्तिं च भञ्जयेत् (नाशयेत्) पुनर्निर्माणस्य पूर्णं धनभारं स एव धरेत् । पञ्चशतपणानाम् अर्थदण्डम् अपि तस्मै दद्यात् ।

भारः तथा मानम्

तुलामानं प्रतीमानं सर्वं च स्यात् सुलक्षितम् ।
षट्सु षट्सु च मासेषु पुनरेव परीक्षयेत् । ८-४०३ ।

प्रत्येकमपि भारः मानं च राजा सम्यग् अवलोकयेत् । तस्य चिह्नमपि सुष्ठु स्यात् । षण्मासाभ्यन्तरे तस्य वस्तुनः पुनः परीक्षणमपि कर्तव्यम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

वशिष्ठः पृ सं - ९७-१३ पृष्ठे उपर्युक्तनियमानां चर्चा विद्यते । राजा माने भारे वञ्चनां निरोद्धुं स्वतः परीक्ष्यमाणः प्रजानां रक्षां कुर्यात् । कौटिल्यस्तु एतदर्थम् अधिकारिणः नियुक्ताः भवेयुः इति परामर्शं ददाति । मानतुलयोः यः वञ्चनां करोति सः चौर्येण समं दण्डाय अर्हः ।

आपणगतोपकरणानां नियन्त्रणे व्यवस्था ।

आगमं निर्गमं स्थानं तथा वृद्धिक्षयावुभौ ।
विचार्य सर्वपण्यानां कारयेत् क्रयविक्रयौ । ८-४०१ ।

पञ्चरात्रे पञ्चरात्रे पक्षे पक्षेऽथवा गते ।
कुर्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृपः । ८-४०२ ।

राजा तु क्रयविक्रयवस्तूनां मूल्यविषये निश्चयं कुर्यात् । वस्तूनि कुतः आयान्ति तस्य दूरं तथा तस्य परिवहणम् उपकरणानां मूल्यं तेषां विनियोगः तथा लाभः उभयोश्च अन्तरं तत् मूल्यं यदा निश्चिनोति सर्वे विषया ध्यातव्याः तेषां च मूल्यनिर्धारः पञ्चसु पञ्चसु दिनेषु अथवा प्रतिपक्षं वा कुर्यात् ।

भारतीयराज्याज्ञानुसारं समग्रभारतवर्षाय मानं तुलनम् उभयोः व्यवस्था सप्तमानुसूची १-५० इत्यनुसारं केन्द्रीयविधायिकायाः विषयः वर्तते । तथा समानसूच्याः अभियाचना ३३१ अनुसारं तस्य नियोजनादि भवति ।

विना मृदुमुद्रां मापनतोलने उपयोगप्रतिबन्धः

मापनतोलनयन्त्रं व्यापारे उपयोगात् पूर्वं तस्य निरीक्षकेण यथानियमं परीक्षणं कारयेत् । व्यापारनियमानुसारं मृदुमुद्रा तत्र स्थापिता स्यात् ।

अधिनियमः ११ यदि सम्यक् न पालितः तदा २३ अधिनियमानुसारं दण्डस्य व्यवस्था कृता वर्तते । प्राचीने विधिशास्त्रे मनुः कौटिल्यः च एतद्विधानं प्रस्तुतः । यदा स्मृतिः लिखिता आसीत् तदैव मूल्यनिर्धारणनियमः आसीत् । मूल्यनिर्धारणसमये तत्सम्बद्धपरिवहणशुल्कस्य विषये सम्यक् परिचिन्तनं स्यात् । येन क्रेतुः विक्रेतुः च उभयोः सौलभ्यं स्यात् । यः ग्राहकान् विरुद्धय कुतन्त्रं करोति तादृशं वणिजं प्रति दण्डनस्य अवकाशोऽपि आसीत् । अयं नियमः आवश्यकवस्तु-अधिनियमः १९४५ इत्यनेन तुलयितुं योग्यो वर्तते । यथा निर्धारितमूल्यं गोपयन् अधिकमूल्यसंग्रहीतुः वञ्चकव्यापारिणः कार्यकरणे अधिकोपयोगी वर्तते ।

Digitization by Arya Samaj Charitable Foundation, Chennai

वस्तुषु करसंग्रहः

क्रयविक्रयमध्वानं भक्तं च सपरिव्ययम् ।
योगक्षेमं च संप्रेक्ष्य वणिजो दापयेत् करान् ।

वस्तुनां क्रयः विक्रयः तथा यस्मात् स्थानाद् आयाति तस्य दूरं तत् वस्तु प्राप्तुं सेवकानां कर्मकराणां भोजनादि व्यवस्था इत्यादि सर्वान् विषयान् विमृश्य मूल्यनियमं कृत्वा राजा भू अथवा जलमार्गद्वारा आगतेभ्यः वस्तुभ्यः करनिर्णयं कुर्यात् । (अ ७- १२७)

कौटिल्यः इमं नियमं विमृशन् वदति , वस्तूनि आनेतुम् उपयुक्तान् सर्वान् व्ययान् सुष्ठु विगणय्य पूर्णलाभस्योपरि करः स्थापितः स्यात् ।

अपरवस्तूनाम् आयाते करव्यवस्था।

पञ्चाशद् भाग आदेयो राज्ञा पशुहिरण्ययोः ।
धान्यानामष्टमो भागः षष्ठो द्वादश एव वा ।(७ १३१)
आददीताथ षड्भागं द्रुमांसमधुसर्पिषाम् ।
गन्धौषधिरसानां च पुष्पमूलफलस्य च । (७ १३२)
पत्रशाकतृणानां च चर्मणां वैदलस्य च ।
मृन्मयानां च भाण्डानां सर्वस्याश्ममयस्यच । (७ १३३)

क) रजा पशुपालकैः लभ्यमानलाभे १/५०तम भागेन तथा स्वर्ण धान्यानाम् अष्टः ८% षट् अथवा द्वादशभागेषु करं गृह्णीयात् ।

ख) वृक्षमधुघृतसुगन्धयुक्तपदार्थानाम् उपरि वनस्पतिषु पुष्पपत्राणां तृणवंशानां च वस्तुषु चर्म भूपदार्थेषु च पाषाणैः निर्मितवस्तुषु ६ भागं कररूपेण रजा स्वीकुर्यात् ।

मेधातिथिः तथा कुल्लूकः च करविषये वदतः । करसंग्रहः वस्तुनां व्यापारेण आयव्ययम् उद्दिश्य न भवेत् । अपितु तैः वस्तूभिः यत् लाभः मिलति तस्योपरि एव करः संग्रहीतः स्यात् ।

गोचारणभूमिरक्षणम् ।

धनुःशतं परीहारो ग्रामस्य स्यात् समन्ततः ।
शम्यापातास्त्रयो वापि त्रिगुणो नगरस्य तु ।८-२३७।

ग्रामस्य सर्वकोणेषु २०० धनुषः तथा तत् त्रिगुणितस्थाने नगरस्य समीपे

Digitization by Arya Samaj Charitable Foundation, Chennai

गोचारणभूमिः सुरक्षिता भवेत् ।

कुल्लूकः मेधातिथेरनुसारं चतुर्हस्तो धनुः इत्युक्तौ धनुषः चतुर्हस्तप्रमाणं च चतुष्पादप्रमाणं च यथा स्यात् तथा व्यवस्था गोचारणभूम्यर्थं भवेत् । यज्ञसमये यस्य काष्ठखण्डस्योपयोगं कुर्वन्ति तदेव मापनार्थम् उपयुज्यमाना

मापिका यस्य नाम समयः इति । नगरस्य त्रिसमयभूमिः आरक्षिता स्यात्। याज्ञवल्क्यसृतावपि अस्य व्यवस्था विद्यते । मैसूर् राज्यान्तर्गतं राजस्वसंहितायां भगः ३९ मध्ये प्रत्येकं ग्रामस्य गोचारणभूम्यर्थं आरक्षितप्रदेशस्य् व्यवस्था आसीत् । भागः ४० यत्र च चारणभूमिः सुरक्षिता आसीत् तथा च पशुपालकाः। स्वामिनः अत्र आगत्य गाः निश्शुल्कं चालयितुं अवकाशः आसीत् । संहितायाः प्राप्तनियमानुसारं यावन्तः पशुस्वामिनः तन्मात्रानुरूपं चारणभूमेः व्यवस्था भवति स्म। सम्प्रति कर्णाटकस्य भूराजस्वाधिनियमः १९६४ इत्यस्य भागः ७१/७२ मध्ये अस्ति । देशस्य अन्यराज्येष्वपि विधिनियमान् परिवर्त्य व्यवस्था कल्पिता । कृषिकार्योद्देश्यं दुग्धोत्पादनं दुग्धनिर्मितवस्तुनाम् उत्पादनम् वीक्ष्य पशुधनसंरक्षणं अतिप्रधानम् आसीत् । एतैरेव कारणैः चारणभूमिप्रदेशानाम् आरक्षणं प्रचीनकालादेव व्यवहारे आसीत् । तादृशरक्षकाणां 'गोम्ल' इति नाम । उच्चन्यायालयस्य केचन निर्णयाः भवन्ति यत्र उक्तम्गोमलार्थं रक्षितभूमेः उपयोगः अन्यकार्यार्थं न स्यात् ।

नष्टोपलब्धोपकरणानां कृते विधिव्यवस्था।
नष्ठवस्तूनां प्रत्यर्पणार्थमधिकारः ।

प्रणष्टस्वामिकं रिक्थं रजा त्र्यब्धं निधापयेत् ।
अर्वाक् त्र्यब्धाद्धरेत्स्वामी मरेण नृपतिर्हरेत् । ८-३०।

या कापि नष्टसम्पत् लब्धा चेत् रजा तां सम्पत्तिं त्रीणि वर्षाणि रक्षेत् । यस्य स्वामी अज्ञातः स्यात् । तस्याः सम्पदः स्वामी धनं स्वस्य इति वदन्नायाति सः अभियोगं संस्थाप्य त्रिवर्षाभ्यन्तरे स्वधनं पुरवाप्तुं शक्नुयात् । यदि एवं न भवेत् तत् सम्पत्त् राज्ञः कोशं गच्छेत् । मेधातिथिः तथा अन्ये व्याख्याकाराः वदंति यदि सेवकेन एषा सम्पत् प्राप्ता तर्हि एव एषः नियमः । नोचेत् न ।

आददीताथ षड्भागं प्रणष्टाधिगतान्नृपः ।
दशमं द्वादशं वापि सतां धर्ममनुस्मरन् ।।८-३३।

एतन्मध्ये सम्पदः वास्तविकस्वामी आगत्य वदेत्तर्हि तदा सम्पदः अभिज्ञानं कृत्वा स्वामित्वस्य विषये विश्वस्यच सा तस्मै देया ।

Digitization by Arya Samaj Charitable Foundation, Chennai

मेधातिथिप्रभृतयः अस्मिन् विषये वदन्ति रज्ञः अपि कश्चन भागः सुनिश्चितः स्यात् । कियन्ति दिनानि राज्ञः समीपे एवासन् । तदायनार्थं तसुरक्षायै कियती कठिनता अनुभूता । याज्ञवल्क्य स्मृतौ अस्याः चर्चा यद्यपि वर्तते किन्तु प्रत्यर्पणं एकवर्षाभ्यन्तरे भवेदिति स्मृतिः वदति ।

कृत्रिमाभियोगे दण्डः ।

अवेदयानो नष्टस्य देशं कालं च तत्त्वतः ।
वर्णरूपं प्रमाणं च तत्समं दण्डम् अर्हति ।। ८-३२।

यदि पुरुषः अविदित्वा अपि सम्पदः विषये अधिकारः न वहति तदा दण्डः विधेयः ।

भूमौ गुप्तस्य अज्ञातस्य कोषस्य वा अधिकारः -

ममायम् इति यो ब्रूयान्निधिं सत्येन मानवः ।
तस्याददीत तद्भागं राजाद्वादशमेव वा ।। ८-३५।
निधीनां तु पुराणानां धातूनामेव च क्षितौ ।
अर्धभागग्रहणाद्राजा भूमेरधिपतिर्हि सः ।। ८-३९।

कश्चित् निखनितं वस्तु सम्पत् वा लभते यत तत् तस्यैव स्यात् । पूर्ववस्तुनः ६% प्रतिशतं भागं स्वीकृत्य राज्ञे दद्यात् । यदि तदेव कश्चिब्राह्मणः प्राप्नुयात् तदा राजा स्वाधिकारेण तां पूर्णां सम्पत्तिं ब्राह्मणाय दद्यात् ।

भारतीय अज्ञातकोशाधिनियमे तु एवमेव व्यवस्था वर्तते । अधिनियमे (३) तृतीये भूमेः अंततःविद्यमानअमूल्यपदार्थम् उद्दिश्य कोषाधिकाररूपेण परिभाषितं वर्तते । अधिनियमानुसरं प्राप्तिकर्ता आहर्तारं सूचयेत् । यः स्वामित्वविषये परीक्षणं कृ त्वा निश्चयं प्रकटयेत् । स्वामित्वनिर्धारानन्तरं सः कोषः तस्मै एव दत्तः स्यात् । स्वामी यदि न मिलेत तदा यः तदन्विष्टवान् प्राप्तवान् वा तस्मै एव सम्पूर्णकोषः प्रदेयः स्यात् ।

सामान्यः भारहरः ।

चक्रवृद्धिं समारूढे देशकालव्यवस्थितः ।
अतिक्रामन् देशकालौ न तत् फलमवाप्नुयात् । ८-१५६।

यदि काश्चन भारहरः धनार्थम् यानेन उपकरणानि प्रापयितुं सन्धिं करोति उपकरणं यथास्थानं यथासमयं प्रापयितुं सहमतिं ददाति समये वस्तूनि स्थलम् आनेतुं असमर्थः भवति भारहरस्य भाटकं सः प्राप्तुं न हर्हति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

शारीरिकक्षतिम्, उद्दिश्य उत्तरदायित्त्वम्

द्रव्याणि हिंस्याद्यो यस्य ज्ञानतो ऽज्ञानतोपि वा ।
स तस्योत्पादयेत्तुष्टिं राज्ञे दद्यात् च तत्समम् ।। ८-२८८।

कान नरः जानन् अजानन् अपि कस्यचिद्वस्तुनः हानिं कृतवान् राज्ञः हानेः प्रमानणविज्ञाप्य तत्प्रमाणेन एव अर्थदण्डः विधेयः ।

मेधातिथिः कुल्लूकः तथा अन्ये व्याख्याकाराः वदन्ति उपकरणानां हानौ भग्नावस्थायां च सामान्यः दण्डः विहितः स्यात् । ज्ञात्वा अज्ञात्वा इति शब्दयोः विधिशास्त्रे अधिकम्ः महत्त्वम् विद्यते । सम्पत्तेः अथवा शारीरिकक्षतौ आधुनिकविचारे अन्येभ्यः क्षतिः संभवेत् तस्याभियोगः अपि अतिप्रधानः । यदि कोऽपि वदेत् ज्ञात्वा तेन स दोषः अपराधो वा न कृतः । एवमुक्ते अपि कृ तापराधी स्व दोषन्मुक्तः न भवति । अधिका वा किञ्चिद्वा क्षतिः अभवदेव। अतः दण्डः विधेय एव इति तेषां व्याख्याकर्तृणां मतम् ।

अपवादः

यानस्य चैव यातुश्च यानस्वामिन एव च ।
दशातिवर्तनान्याहुः शेषे दण्डो विधीयते । (८ २९०)
छिन्ननास्ये भग्नयुगे तिर्यक् प्रतिमुखागते ।
अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च । (८ २९१)
छेदने चैव यन्त्राणां योक्तृशक्त्योस्तथैव च ।
आक्रन्दे चाप्यपेहीति न दण्डं मनुरब्रवीत् ।(८ २९२)

केनचित् उपकरणवाहकयानेन क्षतिरभवत् तर्हि अस्य अर्थदण्डस्य व्यवस्था विद्यते ।अधो लिखितेषु विषयेषु यजमानः तां हानिं निस्तारयितुम् उत्तरदायी नास्ति । याननियन्त्रकचक्रे भग्ने चक्रयोजनयन्त्रे वा भग्ने यदि वाहनं मार्गस्य पार्श्वे अवतरति तर्हि चर्मणः पट्टिकायां भग्नायां सत्यां यजमानः तन्निस्तारार्थम् उत्तरदायी न भवेत् ।अत्रोक्तानि उदाहरणानि एतत् सूचयन्ति यत् चालकस्य अजाग्रता एतेषां वस्तूनां हान्यै कारणं न भवति किन्तु यानस्य दोषः एव। अतः एतादृशविषयेषु विधौ दण्डनार्थम् नास्ति उपायः । यानस्य यदि दोषः न चालकस्य चेत् वृणिताय न किमपि अनुग्रहराशिः देयो भवेत् । काशचन दुर्घटनाः भवन्ति याः श्रेणिद्वये विभागं कर्तुं शक्यन्ते ।

१) तादृशाः घटनाः याः मानवीय प्रयत्नात् भिन्नाः तथा प्राकृ तिकाअपत्तिभिः

Digitization by Arya Samaj Charitable Foundation, Chennai

सम्भूता ।

२) एतादृश्यः दुर्घटनाः या आंशिकरूपेण तदर्थं मानवीयकार्यम् अपि अस्ति । कापि व घटना भवतु सर्वत्रापि ईश्वरीयशक्तिः बलवती एव ।

सेवकानाम् अजाग्रता स्वामी तथा नियोजकस्य उत्तरदायित्वम् ।

> यत्रापवर्तते युग्मं वैगुण्यात् प्राजकस्य च ।
> तत्र स्वामी भवेण्ड्यः हिंसायां द्विशतं दमम् ।८-२९३।
> प्राजकोद्भवेदाप्तः प्राजको दण्डम् अर्हति ।
> युग्मस्थाः प्राजकेनाप्ते सर्वे दण्ड्याः शतं शतम् ।८-२९४।

क) यदि चालकस्य अजाग्रतया यानं मार्गात् च्युतो भवति (परिवर्तते) यानस्य स्वामी द्विशतम् अर्थदण्डं दद्यात् ।

ख) यदि चालकः योग्यः तथापि असावधानो भूत्वा यानं चालयेत् तदा स्वामिनं विहाय चालकस्य दण्दः दातव्यः ।

ग)यदि चालकः अनर्हः, यः तं सेवायां न्ययोजयत् तस्मै अपि प्रत्येकम् अपि शतं अर्थदण्डः प्रदेयः ।

एतत्तु यानस्य स्वामिनः उत्तरदाय्त्विं भवति सेवकस्य कारणादेव हानिः अतः तस्य हानिं स्वामी एव निस्तारयेत् ।

* * *

Digitization by Arya Samaj Charitable Foundation, Chennai

चतुर्दशः अध्ययः

राजधर्मः शासकानाम् आचारसंहिता

मनुस्मृतेः सप्तमे अध्याये मनुः राज्ञः तथा शासकानां महत्त्वं प्रतिपादयति । राजा भगवतः प्रत्यक्षं रूपम् । यथा 'राजा प्रत्यक्षदेवता' इति उक्त्यनुसारम् । स राजा प्रजाः बाह्यतः भूयमाना आक्रमणैःपरिरक्षति । आन्तरिकवैरिभिरपि प्रजाः रज्ञा रक्षिताः भवन्ति । प्रजानां सुखदुखयोः पूर्णमवलोकनं राजा एव विदधाति । एवमन्येषु विषयेष्वपि अस्मिन् अध्याये परिचर्चा भवति । सहैव शासकैः पाल्यमानानां आचाराणाम् अपि ।

अयम् अस्य अध्यायस्य आरम्भश्लोकः –

राजधर्मान् प्रवक्ष्यामि यथावृत्तो भवेन्नृपः ।
सम्भवस्य यथा तस्य सिद्धिश्च परमा यथा । ७- १।

सम्प्रति अहं राजधर्मस्य घोषणां करोमि । रजधर्मो नाम राज्ञा अनुपालनीयाः राजतन्त्रस्य सृष्टिः । तथा राज्ञः वैयक्तिकम् आचरणं कथं स्यादित्यपि । केन प्रकारेण स राजा प्रजासु अनुरागम् उत्पादयति ? इति ।

मनोः सप्तमे नवमे अध्याये मनुना एतेषां धर्माणां विस्तृता चर्चा विहिता । अन्यासु स्मृतिष्वपि एतस्य विचारो विद्यते । प्राचीने भारतवर्षे राजधर्मः सर्वमान्य आसीत् ।

प्रजापालनं राज्ञः सर्वोत्तमं कर्तव्यम् ।

क्षत्रियस्य परो धर्मः प्रजानाम् एव पालनम् ।
निर्दिष्टफलभोक्ता हि राजाधर्मेण युज्यते ।७-१४४।

प्रजापालनं महाराजस्य प्रधानं कर्तव्यम् । स राजा प्रजाभ्यः निश्चितं करं संगृह्णाति,तथा ताः परिपालयति ।सः सर्वदा धर्ममार्गे एव सञ्चलेत् ।

विक्रोशन्त्यो यस्य राष्ट्राद्ध्रियन्ते दस्युभिः प्रजाः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

सम्पश्यतः स भृत्यस्य मृतः स न तु जीवति । ७-१४३।

यो हि राजा प्रजाः लुण्ठकैः दुष्टैः वञ्चकैर्वा न रक्षेत् सः धृतः शरीरेण मृतः इव जीवति इति मनोः आशयः ।

समोत्तमाधमै राजा त्वाहूतः पालयन्प्रजाः ।
न निवर्तेत सङ्ग्रामात् क्षात्रं धर्ममनुस्मरन्।
सङ्ग्रामेष्वनिवर्तित्वं प्रजानां चैव पालनम् ।७-८७-८८।

शत्रुः यद्याह्वयत्यायोधनार्थं राजा तत्स्वीकुर्यात् । युद्धान्नकदापि निवर्तितो भवेत्। न पलायेत । स्याच्छत्रुर्बलवान् दुर्बलः समबलो वा । रजा तैः प्रजानामवश्यमेव रक्षणं कुर्यात् ।

यथा सर्वाणि भूतानि धरा धारयते समम् ।
तथा सर्वाणि भूतानि बिभ्रतः पार्थिवं व्रतम् ।९-३११।

यथा पृथिवी सर्वाणि चराचरवस्तूनि समानरूपेणा धरति तद्वदेव राजा ऽपि स्वप्रजासु भेदभावमकुर्वन् समानरूपेण सर्वाः रक्षेत् ।

एवं चरन्सदायुक्तो राजधर्मेषु पार्थिवः।
हितेषु चैव लोकस्य सर्वान्भृत्यान्नियोजयेत्।९-३२४।

इत्थं उत्तमाचारैः सदा वर्तमानः राजा राजधर्ममनुतिष्ठन् स्व सेवकान् प्रजारक्षार्थं नियोजयेत् । यत्र च सर्वहितैषिता स्यात् ।

यत्किञ्चिदपि वर्षस्य दापयेत् करसंज्ञितम् ।
व्यवहारेण जीवन्तं राजा राष्ट्रे पृथग्जनम् । ७-१३७।

निर्धनलोकेषु रजा नाममात्रं करं सङ्गृह्णीयात्, ये च जनाः लघुव्यवहारेण जीवनं धारयन्ति तेषामुपरि राज्ञः विशिष्टं अवधानं स्यात् ।

दण्डप्रदानावश्यकाता–

सर्वो दण्डजितो लोको दुर्लभो हि शुचिर्नरः ।
दण्डस्य हि भयात्सर्वं जगद्भोगाय कल्पते । ७-२२।

दण्दस्य भयादेव सर्वो लोकः नियन्त्रणे समायाति । संसारे सामान्यतः न कोपि मानुषः निर्दोषी स्यात् । दण्डभयात् जनाः विधेः नियमस्य अनुपालनं कुर्वन्ति।

द्रव्येषु सर्ववर्णाश्च भिद्येरन् सर्वसेतवः ।
सर्वलोकप्रकोपाश्च भवेद्दडस्य विभ्रमात् । ।। ७-२४ ।।

यदि रजा अपराधिनः दण्डं प्रदातुं राजसत्तायाः उपयोगं न करोति तदा दुष्टप्रवृत्तयः दुर्जनाः तस्य दुरुपयोगं कुर्वन्तः । अनाचारमधिकं कुर्युः । अन्यानपि सङ्कष्टे पातयेयुः । तत्परिणामेन समाजस्य अनेके जनाः दुःखभाग् भवेयुः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

यत्र श्यामो लोहिताक्षो दण्डश्चरति पापहा ।
प्रजास्तत्र न मुह्यन्ति नेता चेत्साधु पश्यति । ७-२५।

यत्र पापिषु दण्डः विधीयते तदा दोषिणः भिया एव सञ्चरन्ति । दोषिषु दण्डं वीक्ष्य प्रजाः शान्तेः वातावरणे जीवनं धारयन् तोषेण जीवेयुः ।

तस्याहुः सम्प्रणेतारं राजानं सत्यवादिनम् ।
समीक्ष्यकारिणं प्राज्ञं धर्मकामार्थकोविदम् । ७-२६ ।

दण्डनविषये निश्चयात् पूर्वं क्षितीशः सर्वान् विकल्पान् सम्यगवलोकयेत् । कदा अपराधः सङ्घटितः । तस्य का पृष्ठभूमिः इति चालोचयेत् । यः राजा त्रिवर्गसिद्धान्तेषु (धर्मार्थकामांः) निपुणः तथा चतुरः स्वतः एव अपराधिनं दण्डयितुं शक्नुयात् ।

दण्डो हि सुमहत्तेजो दुर्धरस्य कृतात्मभिः ।
धर्माद्विचलितं हन्ति नृपमेव सबान्धवम्। ७-२८।

दण्डं तादृशः जनः न दद्यात् याननुभवी , अज्ञानी च । अतः धर्मं जानता, धर्ममार्गमनुसरता पुरुषेणैव दण्डः प्रदातव्यः । दण्डाधिकारस्य दुरुपयोगः सबान्धवं राजानमेव हन्यात् ।

सोऽसहायेन मूढेन लुब्धेनाकृतबुद्धिना ।
न शक्यो न्यायतो नेतुं सक्तेन विषयेषु च । ७-३०।

वस्तुतः सम्यक् सहयोगं परामर्शं विना न कोऽपि राजा उचितं दण्डं दातुं शक्नुयात् । योग्यं दण्डं प्रदातुं स एव नृपः समर्थो भवति यः धर्मवित्तथा यस्य सकाशे उतमाः परामर्शदातारः स्युः यः विषयासक्तोऽ पि न भवति ।।

तं देशकालौ शक्तिं च विद्यां चावेक्ष्य तत्त्वतः ।
यथार्हतः सम्प्रणयेन्नरेष्वन्यायवर्तिषु । ७-१६।

ये च समयपरिपालकाः न प्रामाणिकतया जीवनं न निर्वहन्ति तेभ्यः दण्डः स्यात्। दण्डस्य निश्चयसमये कुत्र वा अपराधः समजनि तस्य अपराधस्य किं कारणम् ? अपराधी विधिविषये कियज्जानाति?इत्यपि राजा सम्यक् परीक्षेत । यावदेतेषु विषयेषु राज्ञः मानसे विश्वासो न स्यात् तावद्दडः नैव देयः ।
अनेनाऽस्माभिरेतदवगन्तुं शक्यं यत् पूर्वस्मिन् काले दण्डविषये कीदृशः नियमोऽनुसृत इति । यो हि सामान्यमपराधं करोति सः कठोरदण्डेन न दण्डयितव्यः। दोषानुरूपः एव दण्डः निष्पक्षपातः च दण्डविधिः । विशिष्य यो ह्यल्पशिक्षितः न्यायान्याय विषयेऽधिकं न जानाति तस्मै दीयमानः दण्डः दयया युक्तः स्यात् । यदि शिक्षितः दोषी तत्र नैव मृदुस्वभावोऽपेक्षितः । तादृशेभ्यः

Digitization by Arya Samaj Charitable Foundation, Chennai

कठोरातिकठोरः दण्डः विधेयः ।

दण्डः शास्ति प्रजाः सर्वाः दण्ड एवाभिरक्षति ।
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः । ७-१८।

सर्वाभ्यः प्रजाभ्यः दण्डः सदाचारस्य शिक्षां ददाति । दण्डः एव सर्वान् प्राणिनः रक्षति । राज्यस्य दण्डाधिकारः एव रात्रिंदिवं व्यक्तेः वास्तविकः संरक्षको ऽस्ति ।

समीक्ष्य स धृतः सम्यक् सर्वाः सञ्जयति प्रजाः ।
असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः ।।७-१९।

किञ्चिदपि समीक्ष्य प्रदत्तः दण्डः सर्वाः प्रजाः रञ्जयति । असमीक्ष्य यदि दण्डः दीयते तत् सर्वान् नाशयति । अतः विमर्शः प्रथमः,पश्चात् च दण्डः इति नियमः पालनीयः ।

यदि न प्रणयेद्राजा दण्डं दण्डेष्वतन्द्रितः ।
शूले मत्स्यानिवापक्ष्यन्दुर्बलान्बलवत्तराः। ७-२०।

यदि राजा दोषिषु दण्डं दातुं असफलः स्यात् दुरचारिणः दुर्बलान् तथा पीडयेयुः यथा मत्स्यग्राहिणः मत्स्यान् लोहदण्डस्योपरि स्थापयन्तः छिन्दन्तः पचन्ति।अस्यायमर्थः - परिणामतः समाजस्यदुर्बलाः सदा पीडां सहमानाः जीवनं धारयेयुः ।(७-२०) अस्मिन् अध्याये राज्यसत्ता न्यायं विरुध्य ये कार्यं कुर्वन्ति तान् दण्डयितुं निर्देशः प्रदत्तो वर्तते । एषः नियमः सार्वकालिकः । सर्वेषां सर्वकाराणां शासकानां च अत्यावश्यकं वर्तते। तनैव सह स्मृतिः राज्ञः शासकाञ्जागरयति दण्डः नाम सामान्यं कार्यं न । दण्डदानात्पूर्वं विधिज्ञैः सह सम्यक्परामर्शं सः कुर्यात् । द्वितीयोऽनवधानतयां शीघ्रतया दण्डो दत्तः तत् सम्यङ्न। तृतीयः भिन्नानामपरधानामपराधस्य गाम्भीर्यं दृष्ट्वा दण्डो निर्धारितः स्यात्। दण्डो नाकदापि दयायुक्तःस्यान्नतु निर्दयायुक्तः । अन्ततो गत्वा मनुस्मृतिः दण्डस्य महत्त्वं विचारणीयमिति वदति अतो राज्ञः प्रथममिदं कर्तव्यं भवति सः ऽसंवैधानिककार्यकर्तृणां दण्डं निःसंकोचं कुर्यात् ।

महाभारते एका रोचककथा - दण्डप्रदानस्याधिकारः केवलं राज्ञे विद्यते नत्वन्यस्मै । शंखः लिखित इति भ्रातरौ । द्वावपि भिन्नभिन्नस्थलेषु वसतः । एकदाऽनुजो लिखितः शंखट्य गृहमागतः । तदा शंखः गृहे नासीत् । लिखितः किञ्चित्प्रतीक्षमकरोत् । तथापि भ्राता नागतः । लिखितो गन्तुमुद्युक्तः । तदैव गृहाद्बहिराम्रवृक्षे पक्वानि फलान्यपश्यत् । सः कानिचित्फलान्यत्रोटयत्। यदा फलानि गृहीत्वा गन्तुमुद्युक्तः शंख प्रत्यागतः । स्वास्थ्यादि विषये परस्परं संभाषणमभवत् । संभाषणसमये लिखितस्य करे किमपि दृष्ट्वा शंखोऽपृच्छत् - अनुज! तव करे किं वर्तते? किं गृहीत्वा गन्तुमुद्युक्तः ? लिखितः अवदत्- न

Digitization by Arya Samaj Charitable Foundation, Chennai

किमपि भ्रातः ! गृहाङ्गणे आम्रफलानि दृष्ट्वा तानि त्रोटयित्वा गृहं नयन्नस्मि। तदा शंखः अवदत् -

तमब्रवीत्तदा शंखः तीव्ररोषसमन्वितः।
स्तेयं त्वया कृतमिदं फलान्याददतः स्वयम्।
(महा- शान्ति- २३ -१८- ४४)

यत्किमपि वस्तु स्वामी यावन्नदास्यति तावद्यदि स्वीक्रियते तत् स्तेयमेवेति शास्त्रनिर्णयः।

शंखः स्वानुजमवदत्- त्वया चौर्यं कृतम्। अतः अस्य अपराधस्य परिमार्जनं कथं स्यादिति चिन्तयतु। तदाऽनुजः तूष्णीं तस्य पुरतोऽतिष्ठत्। शोऽअवदत् तदर्थमेक एव मार्गः, भवान्राज्ञा दण्डितः स्यात् दण्डं प्राप्तुं स राजानम्प्रति गच्छेत्। तत्पाल्लिखितः इच्छापूर्वकं राजानमगच्छत्। स च स्वदोषं राज्ञः पुरतः स्वीकृतवान्। राजा लिखितं दृष्ट्वा यो हि वेदविद्वानासीत्। दण्डं विना तं मोचयितुमिष्टवान्। परन्तु लिखितोऽवदत्-यदि कस्यचिदुपरि अपराधः सिद्धो भवति विना दण्डं स राज्ञा नहि क्षन्तव्यः। रजा दण्डश्रावणदोषी न प्राप्यैव पवित्रो भवति। यदि राजा दण्डं दातुं संकोचं कुर्यात्सः स्वकर्तव्यपालनेऽसफल इत्येव निर्णयः।

दण्डाधिकारविषये पुनःस्मारणानन्तरं राजा लिखिताय दण्डमश्रावयत्। दण्डमनुभूय गृहमागतो लिखितः भ्रातरमपृच्छत् - भवान् तु ज्येष्ठभ्राता, तथापि दण्डमदत्वा राज्ञः समीपं किमर्थं प्रैषयत् ? तदा सः अवदत्।

एवमेतन्मया कार्यं नाहं दण्डधरस्तव।
स च पूतो नरपतिस्त्वंचापि पितृभिः सह।

प्रियभ्रातः! त्वां दण्डयितुं ममाधिकारो नास्ति। भवते दण्डं श्रावयितुं केवलं राजैवाधिकारी।

यतः राजा पिता यथा पूजनीयस्तथैव पूजनीयः। तस्मात्स एव दण्डधरः। अनया कथया इदं ज्ञायते एतन्महाकाव्यरचयिता स्तेयलक्षणेन सह दण्डं निर्धारयितुमपि विधिदृष्ट्या एतान्परामर्शान्ददाति।

१) यदपराधिनो दोषः सिद्धस्तस्मै दण्डदानं राज्ञः कर्तव्यम्।
२) दण्डयितुं राजा एवाधिकारी , न परिवारस्य जनाः।
३) यद्यपि एषा कथा ५००० वर्षेभ्यः पूर्वं लिखिता। तथापि नियमस्यावधारणं स्पष्टमेवास्ति। मनु - (८ ३३५ ३३६)

Digitization by Arya Samaj Charitable Foundation, Chennai

राज्ञः दण्डः निष्पक्षपातः स्यात् ।

पिताचार्यः सुहृन्माता भार्या पुत्रः पुरोहितः ।
नादण्ड्यो नाम राज्ञोऽस्ति यःस्वधर्मे न तिष्ठति ।८-३३५।
कार्षापणं भवेण्ड्यो यत्रान्यः प्राकृतो जनः ।
तत्र राजा भवेद्दण्ड्यो सहस्त्रमिति धारणा । ८-३३६।

राजा दण्डदानसमये एतन्न चिन्तयेद्यथा मया दण्डितः पिता आचार्यो मित्रं माता भार्या पुत्रः पुरोहितो वा इति । या रजा स्वयं धर्मं नानुपालयति तदा तस्मै सहस्त्रकार्षापणानां दण्डो देयः। सामान्या प्रदत्तदण्डात्सहस्त्राधिकं स्यात् । दोषी अवश्यमेव दण्डितो भवेत् -

राष्ट्रेषु रक्षाधिकृतान्सामन्तस्वौव चोदितान् ।
अभ्याघातेषु मध्यस्थाञ्छिष्याच्चौरानिव द्रुतम् ।

ते चाधिकारिणः ये आरक्षकसेवायां (पुलिस्) सन्ति । पथभ्रष्ठास्ते यदि अपराधमचरिष्यन्ति तदपराधार्थं ते ऽपि राज्ञा दण्डिता भवेयुः ।

राज्ञः शिक्षणं- तथा तद्गुणः ।

राजा रजधर्मस्य अन्यपक्षेष्वपि अवधानं दद्यात्। स राजा शसकानां शिक्षणस्य एको भागः । यस्य शासने प्रधानता भवति । एतत्सदा आवश्यकमस्ति केवलं कस्मिंश्चित् राजकुले जन्मनैव उत्तराधिकारी भवितुं नार्हति । राज्ञः पुत्रस्य केवलं कुलगौरवं मिलति । न तद्योग्यता। आवश्यकयोग्यता प्राप्त्यै धर्मशास्त्रानुसारं सः शिक्षितः स्यात् । यथा भविष्ये राज्यसत्तां सम्यक्चालयितुं सक्षमः स्यात् । तस्य केचनांशाः एवं भवन्ति ।

तेभ्योऽधिगच्छेद्विनयं विनीतात्मनि नित्यशः ।
विनीतात्मा हि नृपतिर्नविनश्यति कर्हिचित् । ७-३९।
बहवो ऽविनयान्नष्टा राजानः सपरिच्छदाः ।
वनस्था अपि राज्यानि विनयात्प्रतिपेदिरे । ७-४०।
राज्यशासनं चालयितुं नृपे ऽनेके गुणाः अपेक्षिताः ।

यतः सर्वप्रथमंविनीतता प्रमाणीकता । प्रचीनकाले राजानः अविनयेन साधनैः सह विनष्टाः अभवन् । विनयप्रभावाद्वनवासिनोऽपि राज्यमवाप्नुवन् । अतः विनयः सर्वोत्कृष्टो गुणो वर्तते।

विनम्रताभावस्य परिणामः ।
वेनो निनष्ठो ऽविनयान्नहुश्चैव पार्थिवः । ७-४१।
सुदाः पैजवनौव सुमुखो निमिरेव च ।

Digitization by Arya Samaj Charitable Foundation, Chennai

पृथुस्तु विनयाद्राज्यं प्राप्तवान्मनुरेव च । ७-४२।
कुबेराश्च धनैश्वर्यं ब्राह्मण्यं चैव गाधिजः ।

सम्प्रति स्मृतिस्तेषां नामानि वदति । येषां विनयाभावेन नाशो ह्यभवत् । ते सन्त्येते - वेनः नहुषः सुदा सुमुखः निमिः ।
एतेषां राज्ञां विषये विशिष्ट्वृत्तान्तो नैव प्राप्तः । केवलं नामान्येव गणितानि। अन्यत्र येषां उत्तमा गुणा आसन् ते तु सफलाः अभवन् । ते भवन्ति पृथुः मनुः कुबेरादयः ।

त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम् ।
आन्वीक्षिकीं आत्मविद्यां वार्तारं भांश्च लोकतः ।।७-४३।

ये च त्रयीं विद्यां जानन्ति विद्वांसः राजा तेभ्यः वेदविद्यां अध्यैत। सः शासनविधिं तर्कविद्यां ब्रह्मविद्यामवश्यमेवाध्ययनं कुर्यात्।सः पृथक् पृथगुद्योगान् कृषिवाणिज्यपशुपालनादि विषयेषु ज्ञानवान्भवेत् ।
रजा सप्त अथवाऽष्टमन्त्रिणः नियोजयेत्। येषां पूर्वजाः राजकीयसेवकाः अवर्तन्त। तथा शास्त्रवेत्तारः भवेयुः ।

इन्द्रियाणां जये योगं समातिष्ठेद्दिविानिशम्।
जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः । ७-४४।

यः अहोरात्रं स्व इन्द्रियाणि वशे स्थापयेत् स राजा राज्यं सुभिक्षं कुर्यात्तथा प्रजाः अपि नियन्त्रणे स्थापयेत् ।

दशकामसमुत्थानि तथाष्टौ क्रोधजानि च ।
व्यसनानि दुरन्तानि प्रयत्नेन विसर्जयेत्। ७- ४५।

सावधानेन मनसा राजा कामजानि दशव्यसनानि त्यजेत् । अन्यानि च क्रोधजन्यानि। तेषां परिणामः अति दुःखदो भवति ।

मृगयाक्षो दिवा स्वप्नः परिवादस्त्रियो मदः।
तौर्यत्रिकं वृथाट्या च कामजो दशको गुणः । ७-४७ ।

मृगयाविहारो द्यूतो दिवायामधिकनिद्रा परनिन्दा स्त्रीव्यामोहो मदिरासेवनं नृत्य-गीतवाद्यादिष्वतिशयासक्तिर्निरर्थकं भ्रमणमेतानि दश व्यसनानि भोगोत्पन्नानीति वदन्ति।

पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् ।
वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गुणोष्टकः । ७ -४८ ।।

पिशुनता विश्वासघातोऽसूया प्रजासम्पित्तिग्रहणं कठोरवचनैः प्रहारः क्रोधेनोत्पद्यमानाः गुणा भवन्ति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

पानमक्षा स्त्रियश्चैव मृगया च यथाक्रमम्।
एतत्कष्ठतमं विद्याच्चतुष्कं कामजे गुणे । ७ -५०।

एषु विभिन्नगुणेषु सुरापानं द्यूतस्त्रीसम्बन्धो मृगया एते चत्वारोऽधिकापयकारिव्यसनेषु अन्तर्गताः । ये गुणाः कामजाः स्मृताः ।अतो राजाऽतिदुःखदैरेतैर्गुणैः परे भवेत् ।

दण्डस्य पातनं चैव वाक्पारुष्यार्थदूषणे ।
क्रोधजोऽपि गणे विद्यात्कष्टमेतत्त्रिकं सदा । ७-५१।

अन्येभ्यः शारीरिकहिंसा, कटुवचनकथनं निर्दोषिणः सम्पत्तावधिकारः एते कष्टप्रदानि व्यसनानि । यानि क्रोधेन समुत्पन्नानि भवन्ति ।राजा एतादृशैः कार्यैः दूरे एव तिष्ठेत् ।

व्यसनंस्य च मृत्योश्च व्यसनं कष्टमुच्यते ।
व्यसन्यधोऽधो व्रजति स्वर्गात्यव्यसनी मृतः । ७-५३।

व्यसनमृत्योस्तुलनया मरणापेक्षया व्यसनमेव हानिकाकारकम् ।व्यसनी मानवः महारौरवादि नरकं व्रजति । निर्व्यसनी मृत्योरनन्तरं स्वर्गं याति ।
एतच्छाश्वतं सत्यम् । अक्षम्यापराधः इत्येव मन्तव्यम् । तादृशव्यवहारेण समाजेऽनादरः वर्धते । अतः अपराधोऽयं मृत्योरप्यधिकः कथितः । अतः ईदृशो भुत्वा जीवनापेक्षया मरणमेव वरमिति स्मृतिकारः । एतत्सर्वेषां मानवानामत्यन्तमावश्यकम् । शासकानां कृते तु ततोऽप्यधिकं महत्त्वम् । उपरि कथिताः सर्वेऽपि नियमाः राष्ट्रे ये शासनं कुर्वन्ति तेषां कृ ते अतीव प्रधानाः कथिताः । सर्वेषां मन्त्रिणामधिकारिणां समानरूपेण सम्बद्धाः भवन्ति । सत्तायाः वर्तमानपद्धतौ ये च अधिकाराः पूर्वं राजस्वासन्साम्प्रतं प्रधानमन्त्री मुख्यमन्त्री नाम्ना ये शासनं कुर्वन्ति तेषु समाहिताः भवन्ति । अतः उक्तव्यसनैर्विनाऽधिकारः प्रशासनं च वर्तमानशासकेषु शोभाप्रदम् । विशेषतः मादकवस्तूनामुपयोगः स्त्रीसम्बन्धोऽनुचितधनसंचयोऽकारणं विदेशादियात्रा इत्यादयः शासकेषु वर्ज्यगुणा भवन्ति । एतच्चिन्ताकारकमस्त्येते सिद्धान्ता हिन्दूविचारधाराया इति कृत्वा पन्थनिरपेक्षतानाम्नि नादृताः सन्ति । यावच्छिक्षायामेते विषयाः संलग्ना न भवन्ति तदनुसारं युवानचरित्रनिर्माणार्थं प्रेरिता न भवन्ति तावद्वर्तमानं नैतिकाधःपतनं जीवदेव भवति । तस्य निधानं नास्ति।

मन्त्रिपरिषद् ।

मौलाञ्छास्त्रविदः शूरांलब्धलक्षान्कुलोद्भवान् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

सचिवान्सप्तचाष्टौ वा प्रकुर्वीत परीक्षीतान् । ७-५४।

राजा सप्त अथवा अष्टमन्त्रिणो नियुक्तिं कुर्यात् ।येषां पूर्वजाः राजकीयसेवकाः सर्वे विद्वंसो भवेयुः । तेच शास्त्रज्ञानेन सहैव उत्तमकुलसम्पन्नाःस्युः । ते राज्ञः परीक्षामुत्तीर्य स्वकार्येषु नियुक्तैर्भाव्यम् । अतः राज्ये यदि कुशलशासनेन भवितव्यं तर्हि कुशालाः मन्त्रिणः एव स्युः। तेषां सहयोगेनैव राजसत्ता सम्यक्सञ्चालिता स्यात्, मन्त्रिणः अपि समये समये स्वस्व परामर्शं दद्युः ।

अपि यत्सुकरं कर्म तदप्येकेन दुष्करम् ।
विशेषतोऽसहायेन किन्तु राज्यं महोदयम् ।।७-५५।

एकस्य सामान्यकर्मणः प्रबन्ध् एव महत्कष्टदायकं, तर्हि सकृदेव राजा समग्रस्य राज्यस्य शासनमेक एव कथं चालयेत् ? स उत्तममन्त्रिणः स्व मन्त्रिपरिषदि नियुक्तिं कुर्यात् - कंचित्सामान्यं कार्यक्रमं संघटयितुं महतः प्रयत्नस्यावश्यकता भवति । तदा चिन्तयन्तु यदि राजा सकृदेव राजशासनं चालयेत्तर्हि कियत्कष्टं स्यादिति । अतः कस्यचनान्यस्य सहयोगं विना कुशलशासनं नाम मरीचिकेवासंभावम् एव। तेन कारणेनैव राजा मन्त्रिगणान्नियोजयेत् ।

तैः सार्धं चिन्तयेन्नित्यं सामान्यं सन्धिविग्रहम् ।
स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च ।। ७-५६।

राजा सामान्य शासकीयव्यवस्थाविषयेऽपि मन्त्रिभिः सह समालोचनां कुर्यात्। यथा राज्यस्य वार्षिकायः करादि विषयेऽपि मन्त्रिभिस्सह समालोचनां कुर्यात्।

तेषां स्वं समभिप्रायमुपलभ्य पृथक् पृथक् ।
समस्तानां च कार्येषु विदद्ध्याद्धितमात्मनः । ७-५७।

राजा स्वविषयेषु भिन्नभिन्न जनैः प्ररामर्शं कुर्यात्।तेषामभिप्रायं संगृह्य सभायां प्रस्थापयेत् । तत्पश्चान्निर्णयं च कुर्याद्यद्राज्यस्य हितकारी स्यात् ।
कर्मकुशलाय कार्यं प्रदातव्यम् ।

नित्यं तस्मिन्समाश्वस्तः सर्वकर्माणि निक्षिपेत्।
तेन सार्धं विनित्य ततः कर्म समारभेत्। ७-५९।

राज्ञा विश्वासपात्रायैव राज्यस्य दायित्वं प्रदेयमस्ति । तेन राजा निश्चिन्तो भूत्वा स्व कार्यं साधयितुं प्रभवेत् ।

अन्यानपि प्रकुर्वीत शुचीन्प्रज्ञानवस्थितान्।
सम्यगर्थसमाहर्तृनमात्यान्सुपरिक्षितान् । ७-६०।

ये च सत्यसंकल्पाः बुद्धिमन्तः दृढाः धनसंग्रहे समर्थाः तानेव प्रधानकार्येषु नियोजयेत्।

Digitization by Arya Samaj Charitable Foundation, Chennai

निवर्तेतास्य यावद्भिरितिकर्तव्यता नृभिः।
तावतोऽतन्द्रितान्दक्षान् प्रकुर्वीत विचक्षणान् । ७- ६१।
तेषामर्थे नियुञ्जीत शूरान्दक्षान्कुलोद्भवान्।
शुचीनाकरकर्मान्ते भीरुनन्तर्निवेशने। ७-६२।

अर्थसंग्रहविषये कोशागारविषये धैर्यवतः मन्त्रिणो नियुक्तिरेव ज्यायसी । किन्तु भवनस्यान्ततः कार्यार्थं मृदुस्वभावाः एव भवेयुः ।

राजदूतस्य नियुक्तिः

दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदम् ।
इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्भवम् । ७-६३।

राजनीतिशास्त्रे निपुणः यः वैरिणः सङ्केतभाषां जानाति मुखस्यरेखां दृष्ट्वा यः कार्यं कर्तुं कुशलः तमेव राजा नियुञ्जीत। ये राजकीयव्यवहारेषु कुशलाः प्रथितयशस्काः तेऽपि कार्येषु नियुक्ता भवेयुः । ये प्रजाहितमभिलक्ष्य कार्योन्मुखा भवेयुः ।

अनुरक्तः शुचिर्दक्षः स्मृतिमान्देशकालवित्।
वपुष्मान्वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते। ७-६४।

राजभक्तः प्रामाणिकः कार्यकुशलः स्मृतिमानुत्तमः वाग्मी तथा सुन्दरकायः एतान्सर्वान्विमर्श्य राजदूतस्य नियुक्तिःस्यात् ।

दूत एवहि सन्धत्ते भिनत्येव च संहतान् ।
दूतस्तत्कुरुते कर्म भिद्यन्ते येन मानवाः । ७-६६।

राजदूतस्य योग्यता अतिप्रधाना वर्तते। स च कार्यचतुरो भूत्वा अन्य देशस्य राज्ञां क्रियापलापं सम्यक् संगृह्य तद्राजानं वदेत् । दूत एव सन्धिं विग्रहं वा कर्तुं शक्तः । विग्रहः अपि तादृशः येन परस्परं भेदः स्यात् ।

स विद्यादस्य कृ त्येषु निगूढेङ्गितचेष्टितैः ।
आकारमिङ्गितां चेष्टां भृत्येषु च चिकीर्षितम् ।७-६७।
बुद्ध्वा च सर्वं तत्त्वेन परराजचिकीर्षितम् ।
तथाप्रयत्नमातिष्ठेद्‌यथात्मानं न पीडयेत् । ७-६८।

राजदूतः तादृशो निपुणःस्याद्योऽन्यदेशस्य राज्ञां मुखभावं विज्ञाय तेषां सङ्केतै चेष्ठाभिरवगच्छेत्।

तेषां सर्वेपामपि प्रतिवेदनं सम्पाद्य स्वदेशस्य राज्ञे दद्यात् । यज्ज्ञात्वा राजा राज्यस्य सुरक्षाविषये आवश्यकमुपायं चिन्तयेत्।

Digitization by Arya Samaj Charitable Foundation, Chennai

देशस्य सुरक्षा परमोच्चं कर्तव्यम् ।

धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा ।
नृदुर्गं गिरिदुर्गं वा समाश्रित्यवसेत्पुरम् । ७-७०।
सर्वेणतु प्रयत्नेन गिरिदुर्गं समाश्रयेत् ।
एषां हि बहुगुण्येन गिरिदुर्गं विशिष्यते । ७-७१।
त्रीण्याद्यान्याश्रितास्त्वेषां मृगगर्ताश्रया ऽप्सराः ।
त्रीण्युत्तराणि क्रमशः प्लपङ्गैर्मनमराः ।। ७-७२।

नृपतिः स्वराज्यदुर्गाणां रक्षां कुर्यात् । देशस्य सर्वोत्तमसुरक्षार्थं तादृशस्थानां चयनं कुर्याद्यन्मरुभूमेः कारणेन सुरक्षितं स्यात् । जलवनपर्वतानामौन्नत्यकारणेन-सुरक्षितं स्यात् । एतेषु सर्वेषु स्थानेष्वपि गिरिप्रान्ते निर्मितः दुर्गः सर्वोत्तमः कथितः । अतो राजा पर्वतप्रान्तीयं दुर्गमेव चिनुयात् ।

एकशतं योधपतिः प्राकारस्थो धनुर्धरः ।
शतं दशसहस्राणि तस्माुर्गं विधीयते । ७ -७४।

प्राकारस्य भित्तौ स्थितः धनिर्धारी युद्धे शतेन सैनिकैः समः स्यात्। भित्तेरुपरिस्थिताः एकशतं धनुर्धारिणः सहस्रेण सैनिकैः समानाः स्युः । अतः एतावदावश्यकमस्ति दुर्गरक्षार्थं धनुर्धारिणः दुर्गेषु विनियुक्ताः स्युः ।

तत्स्यादायुधसम्पन्नः धनधान्येन वाहनैः ।
ब्राह्मणैश्शिल्पिभिर्यन्त्रैर्यवसेनोदकेन च ।। ७- ७५।

दुर्गे तु धनं खाद्यपदार्थाःशस्त्रं सर्वविधानिवाहनानिकर्मकराः ब्राह्मणाः जलव्यवस्थेति सर्वोपकरणानि तत्र भवेयुः ।

द्वयोस्त्रयाणां पञ्चानां मध्ये गुल्ममधिष्ठितम् ।
तथा ग्रामशतानां च कुर्याद्राष्ट्रस्य संग्रहम् । ७-११४।

राजा स्वराज्यस्य सुरक्षार्थं द्वयोः त्रयः पञ्चशतं ग्रामाणां समूहे सैनिकानामेकैकं दलं तथा विश्वासपात्राधिकारिणां नियुक्तिं कुर्यात् ।

ग्रामस्याधिपतिः कुर्याद्दशग्रामपतिं यथा।
विंशतीशं शतेशं च सहस्रपतिमेव च ।७ -११५।

राजा प्रत्येकं ग्रामे दश-विंशतिः शतं सहस्रं वा ग्राम्रेषु च तेषां ग्रामाणां सुरक्षार्थमधिकारिणां नियुक्तिं कुर्यात् ।

ग्रामदोषान्समुत्पन्नान्ग्रामिकैः शनकैः स्वयम् ।
शंसेद्ग्रामदशेशाय दशेशो विंशतीशिने । ७-११६।
विंशतीशस्तु तत्सर्वं शतेशाय निवेदयेत् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

शंशेद्ग्रामशतेशस्तु सहस्रपतये स्वयम् । ७- ११७।

ये च नियुक्ता अधिकारिणस्तेषां ग्रामाणामपराधादिविषये तदुपरि विद्यमानेभ्यः निवेदयेत् । विंशतिग्रामाणां प्रमुखः शतग्रामाधीशाय शताधीशः सहस्राधीशाय निवेदयेत् । एवं परस्परमादानप्रदानैः ग्रामाः सुरक्षिता भवेयुः ।

करसमादानम् ।

सांवत्सरिकमाप्तै राष्ट्रादाहारयेद्बलिम् ।
स्याच्चाम्नायपरो लोके वर्तेत पितृवन्नृषु ।७-८०।

राजा प्रजाभिस्सह पुत्रवद्व्यवहारं कुर्यात् । प्रतिवर्षं प्रजाभिर्यावशास्त्रविहितं तावदेव करग्रहणं कुर्यात् । करसमादानसन्दर्भे धर्ममार्गोऽवश्यमेवानुसृतः स्यात्।

दुष्टभ्रष्ठाधिकारिभिःप्रजासंरक्षणम् ।

राज्ञो हि रक्षाधिकृतः परस्वादायिनःशठाः ।
भृत्या भवन्ति प्रायेण तेभ्यो रक्षेदिमाः प्रजाः । ७-१२३।

कदाचिद्राज्ञा नियुक्ता अधिकारिणः भ्राष्टा भवन्ति । धूर्ततया प्रजानां स्वत्वं हरन्ति । तान् भिन्न भिन्न यातनादिभिः पीडयन्ति राजा एतादृशैरधिकारिभिः प्रजाः परिरक्षेत् ।

भ्रष्टानां सम्पत्तिः राज्ञः वशे ।

ये कार्यिकेभ्योऽर्थमेव गृह्णीयुः पापचेतसः।
तेषां सर्वस्वमादाय राजा कुर्यात्प्रवासनम् । ७-१२४।

ये च प्रजाभ्योऽहितं कुर्वन्तोऽन्यायेनार्थसञ्चयं कुर्वन्ति तान् भ्रष्टाधिकारिणः राजा राज्याद्बहिःप्रेषयेत् ।

कराणां नियतं मूल्यम्

यथाल्पाल्पमदन्त्याद्यं वार्यो गो वत्सषट्पदाः।
तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः । ७-१२९।

यथा च जलोकावत्सः मधुमक्षिका किञ्चित्किञ्चिदाहारमेव स्वीकुर्वन्ति स्वकुक्षिं पूरयन्ति तथैव राजाऽपि प्रजासु न्यूनतमं करं निर्धारयेत् ।

नोच्छिन्द्यादात्मनो मूलं परेषां चातितृष्णया।
उच्छिन्दन्ह्यात्मनो मूलमात्मानं तांश्च पीडयेत् । ७-१३९।

अतिन्यूनं करं गृहीत्वा स्व मूलमेव न कर्तयेत् । अधिकं करं समादाय प्रजानामाधारमेव नाशयेत् । एतयोरेकमपि राजा सम्यङ्न पालयेत्तर्हि समूलं नाशं गच्छेत् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

करनिकायः

अन्धो जडः पीठसर्पी सत्पत्या स्थविराश्च यः ।
श्रोत्रियेषूपकुर्वश्च न दाप्याः केनचित्करम् । ८-३९४।

अन्धः तथा शारीरिकमानसिकरीत्या विकलाङ्गः सप्तत्यधिकवर्षीयो येच वेदाचार्यान्सेन्ते अर्थात् वेदविदुषः साहाय्यं आचरन्ति स च नरः करमुक्तःस्यात्।

करेण संग्रहीतधनस्य सदुपयोगः ।

अष्टौ मासान्यथादित्यस्तोयं हरति रश्मिभिः।
तथा हरेत्करं राष्ट्रान्नित्यकर्मव्रतं हि तत् । ९-३०५।

भगवान्सूर्यो यथा अष्टमासान्यावत् स्वकिरणैतोयर्धारयन् एकत्रितं जलं बाष्पीकरोति तद्वदेव रजा प्रजाभ्यः क्रमशः करान्स्वीकुर्यात् ।

वार्षिकांतुरो मासान्यथेन्द्रोऽभिप्रवर्षति ।
तथाऽभिवर्षेत्स्वं राष्ट्रं कामैरिन्द्रव्रतं चरन् । ९- ३०४।

यथा इन्द्रः चतुरः मासानभिवर्षन्समग्रं संसारं तोषयति, तद्वदेवैतद्राज्ञः पूर्णं दायित्वं भवति यत्करेण संग्रहीतधनस्य पूर्णलाभः प्रजाभ्यः मिलेत् तत्कारणेन राजा धनिभ्योऽधिकं करं सम्पाद्य तत्प्रजाभ्यः कल्याणाय उपयुञ्जीत।

राज्ञः दिनचर्या।

उत्थाय पश्चिमे यामे कृतशौचःसमाहितः ।
हुताग्नीन्ब्राह्मणांर्च्य प्रविशेत्स शुभां सभाम् । ७-१४५।

राजा प्रातःकाले निद्रां त्यजेत् चर्चयित्वा राजा सदस्युपविश्य प्रजानां सुखदुःखं नित्यक्रियां परिपूर्य सामान्यान् मिलितुं सभां विशेत्। यत्र सर्वदा शुभचिह्नानि अङ्कितानि भवन्ति ।

तत्र स्थिताः प्रजाःसर्वाः प्रतिनिन्ध्य विसर्जयेत् ।
विसृज्यच प्रजाः सर्वाः मन्त्रयेत्सह मन्त्रिभिः ।। ७-१४६।

रजा सभायामुपविश्योपस्थितप्रजानां सुखदुखं पृष्ट्वा तेषां संकटं दूरीकृ त्य तान्गृहं सम्प्रेष्य प्रजानां विविधसमस्यानां विषये स्वमन्त्रिपरिषदि विषयं सम्स्थाप्य मन्त्रणां कुर्यात् ।

सत्सङ्गः

मध्यन्दिनेऽर्धरात्रौ वा विश्रान्तो विगतक्लमः ।
चिन्तयेद्धर्मकामार्थान्सार्धं तैरेक एव वा।

राजा प्रत्यहं स्वकर्तव्यं सम्पूर्य दिने रात्रौ वा स्वमन्त्रिभिः सह चर्चां कुर्यात्। धर्मेण राज्यं शासितुमेतदावश्यकं भवति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

उपर्युक्तविषयैरेतद् ज्ञातुं शक्यते यत् जनानां सुखशान्त्यर्थं राजाऽधिकं महत्त्वं दद्यात् । राजा सर्वेषां कर्मचारिणां तेषां योग्यतानुसारं वेतनं च नियतं कुर्यात् ।

कोषः जनकल्याणायोपयुक्तः स्यात् ।

अलब्धं चैव लिप्सेत लब्धं रक्षेत्प्रयत्नतः ।
रक्षितं वर्धयेच्चैव वृद्धं पात्रेषु निक्षिपेत् । ७-९९।

राजा प्रत्यहं धनसंग्रहं कुर्वन् कोषमभिवर्धयितुं च चिन्तयेत् । प्राप्तसम्पदः समये परीक्षणमपि कुर्यात् । धनं चाधिकं जनकल्याणायोपयुक्तं स्यात् ।

परामर्शे परियोजना निर्माणे गौप्यं व्यवहारे स्पष्टता।

अमाययैव वर्तेत नकथंचन मायया।
बुद्ध्येतारि प्रयुक्तां च मायां नित्यं स्वसंवृतः । ७-१०४।

रजा सर्वत्र स्व भविष्ययोजनां रहस्यमेव स्थापयेत् । तथाव्यवहारे स्पष्ठता भवेत्। छलेन कपटेन वा राजा सुखं नावाप्नुयात्। सः शत्रूणां कूटनीतिमपि विजानीयात् ।

गिरिपृष्ठं समारुह्य प्रसादं वा रहो गतः ।
अरण्ये निःशलाके वा मन्त्रयेदविभावितः । ७-१४७।

राज स्वमन्त्रिभिः सह अरण्ये वा गिरिगह्वरे वा रहस्यस्थाने समालोचनां कुर्यात्।

सामनीतेः प्रथमिकता स्यात् ।

साम्ना दानेन भेदेन समस्तैरथवा पृथक् ।
विजेतुं प्रयतेतारीन्न युद्धेन कदाचन। ७-१९८।

राजा साम, दान भेद दण्ड इति चतुरः उपायानुपयुज्य विजयं लभेत।विद्यमानेष्वपि चतुर्षूपायेषु सामोपायमेवाधिकमुपयुज्य वैरिणः जेतुं प्रयतेत। स उपायः यदि विफलस्तर्हि दण्डोपयः प्रयोज्यः ।

अनित्यो विजयो यस्माद्दृश्यते युद्ध्यमानयोः ।
पराजयाश्च संग्रामे तदा युद्धं विसर्जयेत् । ७-१९९ ।

युद्धसन्दर्भे कस्य वा जयः स्यादिति नास्त्येव निश्चयः । अतः युद्धं विनैव सङ्घर्षः परिसमाप्यते तर्ह्युत्तमम् ।

शत्रुपराजयः प्रधानः ।

यथोद्धरति निर्दाता कक्षं धान्यं च रक्षति ।
तथा रक्षेन्नृपो राष्ट्रं हन्याच्च परिपन्थिनः । ७-११०।

यथा कृषकः स्व गोधूमधान्यरक्षार्थमन्यान्बाधकान्नाशयति तथैव राजा परिपन्थिनः हत्वा प्रजाक्षेमं वाञ्छेत् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

राष्ट्रस्य संग्रहे नित्यं विधानमिदमाचरेत् ।
सुसंग्रहीत राष्ट्रो हि पार्थिवः सुखमेधते । ७-११३।

उत्तमसाधनान्युपयुज्य राजा राष्ट्रं संरक्षेत् । रज्ये समुचितप्रबन्धं कृत्वैव राजा सुखमेधते ।

प्रधानमन्त्रिणेऽधिकारप्रदानम् ।

अमात्यमुख्यं धर्मज्ञं प्राज्ञं दान्तं कुलोद्भवम् ।
स्थापयेदासने तस्मिन् खिन्नः कार्यक्षणे नृणाम् । १२-१४१।

यदा राजाऽत्मानं दुर्बलं मनुते शारीरिकमानसिकरीत्या कार्यकरणमसाध्यं तदा स्वाधिकारं गौरवान्विताय बुद्धिमतेऽमात्याय प्रदाय विश्रान्तिं कुर्यात् ।

सेनापतिबलाध्यक्षौ सर्वदिक्षु निवेशयेत् ।
यश्च भयमाशङ्केत्प्राचीं तां कल्पयेद्दिशिम् । ७-१८९।

सर्वासु दिक्षु सेनापतीन्नियोज्य, यस्यां दिशि शत्रवो आक्रमन्ति इति शङ्का वर्तते तत्राधिकरक्षा विधेया ।

लेखापर्यवेक्षणदायित्वम् ।

अहन्यन्यवेक्षेत कर्मान्तान्वाहनानि च ।
आयव्ययौ च नियतावाकारान्कोशमेव च। ८-४१९।

राज्ञ इदं कर्तव्यमस्ति निरन्तरं सः स्व कोशस्य पर्यवेक्षणं कुर्यात् तथा राजकोशविषयेऽपि जाग्रतः स्यात् ।

भोजनादि विषये

तत्रात्मभूतेः कालज्ञैरहार्यैः परिचारकैः ।
सुपरीक्षितमन्नाद्यमद्यान्मन्त्रैर्विषापहैः ।। ७-१२७।

राज्ञे प्रदीयमानं भोजनं प्रदानात्पूर्वं पाकशास्त्रज्ञैः परीक्षितं स्यात् । परिवेषाणात्पूर्वं पुनः सम्यक् परीक्षणीयम् । भोजनं विषाक्तपदार्थैः सम्मेलितं न स्यात् ।

राज्ञः सुरक्षाविषयेऽपि सुनिश्चयः स्यात् ।

एवं प्रयत्नं कुर्वीत यानशय्याशनासने।
स्नानेप्रसाधने चैव सर्वालङ्कारकेषु च । ७-२२०।

वाहनशय्यासनभोजनादि विषयेषु स्नानागारशौचालयादिष्वपि सावधानता स्यात्। राज्ञोपयुज्यमानवस्त्रादिष्वपि जागरूकैर्भाव्यं ।

शासननिर्माणे कस्तावत्क्षमः ।

दशावरा वा परिषद्यं धर्मं परिकल्पयेत् ।
त्र्यवरा वापि वृत्तस्थाः तं धर्मं न विचालयेत् । १२-११०।

Digitization by Arya Samaj Charitable Foundation, Chennai

शासनस्य निर्माणस्यावश्यकतायां दशभिरथवा त्रिभिस्तादृशैर्विधिज्ञैः परिषदि सः प्रस्तुतः स्यात् । एवं नित्यव्यवहारे अनुस्त्रुतः नियम एव शासने आनेतव्यः।

त्रैविद्यो हेतुकस्तर्की नैरुक्तो धर्मपाठकः ।

त्रयाश्चाश्रमिणः पूर्वे परिषत्द्दशावरा ।। १२-१११।

ऋग्वेदविद्यजुर्विच्च सामवेदविदेव च।

यवरापरिषज्ज्ञेया धर्मसंशयनिर्णये । १२-११२।

सभाया निर्माणकर्तृषु दशसु तादृशास्त्रयो भवेयुर्ये च वेदसिद्धान्तमुत्तमया जानन्ति। एकोन्याशास्त्रविदपरो मीमांसकोऽन्यो निरुक्तज्ञः । तेष्वन्यतम एवमपिस्याद्यो हि धर्मशास्त्रविषयान्व्याख्यातुं समर्थाः तथा ब्रह्मचारी गृहस्थो वनप्रस्थी शास्त्रज्ञ एव धर्मशास्त्रविषये निर्णयं प्रदातुं शक्नुयात्। ।

एकोऽपि वेदविद्धर्मं यं व्यवस्येद्विजोत्तमः ।

स विज्ञेयः परो धर्मो नाज्ञानामुदितो युतैः ।१२-११३।

उपरि गणितेषु विद्वत्सु योग्येष्वनुपस्थितेषु या वेदज्ञः स्वदैनिकजीवने वेदोक्तधर्माणामनुपालनं करोति, सः तद्विधिं घोषयितुं शक्नोति ।

अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम्।

सहस्त्रशः समेतानां परिषत्त्वं न विद्यते । १२-११४।

ये च ब्राह्मणाः न व्रतनिष्ठा न वेदविदः केवलं ब्राह्मणजातौ समुत्पन्ना विधिशास्त्रनिर्णये परिषदः संघटने ते त्वनर्हा एव।

यथा काष्टमयो हस्ती यथा चर्ममयो मृगः ।

या विप्रोऽनधीयानस्त्रयस्ते नाम बिभ्रति । २-१५७।

जन्मन एव ब्राह्मणाः नाधीतशास्त्रा नियमबाहिराः ते काष्ठनिर्मितहस्ती इव चर्ममयमृग इव निष्प्रयोजकाः । अतः नाममात्रं ब्राह्मणाः नियमनिर्माणे असमर्था अनर्हाः च ।

कुल्लूकः स्व टीकायां एतदुल्लेखयन्नुद्धरति केवलं शास्त्रज्ञानेन नियमनिर्माणं भवितुं न शक्यते । नियमे कृतेऽपि युक्तिर्यदि नष्टा स्यात्तर्हि तेन नियमेन किं वा प्रयोजनम् ?

तस्यायं श्लोकः -

केवलं शास्त्रमाश्रित्य न कर्तव्यो विनिर्णयः ।

युक्तिहीनविचारे तु धर्महानिः प्रजायते ।

ज्ञाने जातिः नावरुद्धा स्यात् ।

श्रद्दधानः शुभां विद्यामाददीतावरादपि ।

Digitization by Arya Samaj Charitable Foundation, Chennai

अन्त्यादपि परं धर्मं स्त्रीरत्नं दुष्कुलादपि । २-२३८।

ज्ञानोपार्जनाय जातिः प्रतिबद्धा नास्ति । निम्नवर्गीय अपि जनः यदि शास्त्रवेत्ता स्यात्तस्मादपि ज्ञानमर्जितव्यमस्ति । श्रद्धया तस्माद्विद्या प्राप्तव्या एव। अन्त्यादपि परं धर्मः अस्यार्थः- चाण्डालोऽपि यदि धर्मपरः तस्मादपि उत्कृष्टः धर्मः ज्ञातुं शक्यते । एवमेव निम्नवर्गीयाऽपि गुणिनी
सुसंस्कृता कन्या विवहार्थं योग्या एव।
एवं मनुस्मृतेरीदृशानि वचनानि अस्माकं सन्मार्गमेवोपदिशन्ति । प्रत्यहं जीवने सदाचारः पालनीयः । केवलजातावेव यः विप्रः स आदरार्थं न योग्य ः ।।

* * *

Digitization by Arya Samaj Charitable Foundation, Chennai

पञ्चदशः अध्यायः

युद्धसमये तत्पाश्च पालनीया नियमाः

स्मृतिशास्त्रे युद्धकाले तथा तत्पाश्चानुपालनीया नियमाः। ते नियमाः इमा भवन्ति ।

न कूटैरायुधैर्हन्याद्युध्यमानो रणे रिपून् ।
न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजसैः । ७-९०
न च हन्यात्स्थलारूढं न क्लीबंन कृताञ्जलिम् ।
न मुक्तकेशं नासीनं न तवास्मीति वादिनम् । ७-९१
न सुप्तं न विसन्नाहं न नग्नं न निरायुधम् ।
नायुध्यमानं पश्यन्तं न परेग समागतम्। ७-९२
नायुधव्यसनप्राप्तं नार्तं नातिपरीक्षितम्।
न भीतं न परावृत्तं सतां धर्ममनुस्मरन् । ७-९३
एषोनुपस्कृतः प्रोक्तो योधधर्मः सनातनः ।
अस्माद्धर्मान्न च्यवेत क्षत्रियो घ्नन्रणे रिपून् । ७-९८

१) राजाऽथवा कोऽपि योद्धा कूटशस्त्रैः विषपूरितास्त्रैरग्नियुक्तशस्त्रैरपि बाधिते सति न वैरिणं प्रहरेत् ।
कुल्लूकः कूटायुधानामुदाहरणं ददाति । बाह्यतः द्रष्टुं काष्ठखण्ड इवान्ततः तीक्ष्णयुधैः लोहनिर्मितैः शस्त्रैरपि पुनः योद्ध्रा न प्रहर्तव्यः ।

२) रथोपविष्टः योद्धा भूमौ स्थित्वा युद्ध्यमानेन सह युद्धं न कुर्यात् । शस्त्राणि विहाय युद्धभूमेः पलायमानमपि शस्त्रधरी न प्रहरेत् ।

३) यस्तु निद्रितः यस्यास्त्रं नष्टं या केवलं दर्शकः अथवा अन्येन सह युद्धं कुर्वन्नपि चेत् आक्रमणं न कर्तव्यम् ।

४) यस्यायुधानि भग्नानि यो दुःखी यो गम्भीरतया वृणितः तथा वैरिसेनां दृष्ट्वाऽपि भयाक्रान्तः तेन सहऽपि युद्धं न कुर्यात् ।

एकः सम्मानितो योद्धा युद्धसमये मृतानां सैनिकानां स्मरणं कुर्यात्। एषः युद्धनियमः वर्तते । यतः सः एतन्नूनं न विस्मरेद्यतः वैरिसेनया सह

Digitization by Arya Samaj Charitable Foundation, Chennai

युद्ध्यमानोऽस्ति । एकाग्रतया यदा राजा युद्धनिरतः स्यात्तदा स कथं सैनिकानां स्मरणं कुर्यात् ।
अतः युद्धधर्ममनुस्मरन्सः युद्धमेव कुर्यात् ।

विजितप्रजाप्रबन्धः ।

सर्वेषां तु विदित्वेषां समासेन चिकीर्षितम् ।
स्थापयेत्तत्र तद्वंश्यं कुर्याच्च समयक्रियाम् । ९-२०२।

राजा विजितप्रजानां पूर्णतयाऽवधानं दद्यात् । पराजितशासकानां बन्धुभ्यः आवश्यकप्रतिज्ञावादैः राजा तेभ्योऽपि उत्तमां व्यवस्थां कुर्यात् ।
अस्यार्थो यद्यन्यदेशः येन राज्ञा जितः स राजा एवं प्रजाभिः सह व्यवहारं कुर्यादिति विवेकः ।

प्रमाणानि च कुर्वीत, तेषां धर्मान्यथोदितम् ।
रत्नैश्च पूजयेदेनं प्रधानपुरुषैः सह । ७-२०३।

यद्राज्यं राज्ञा जितं तद्राज्यस्य पूर्वपरम्परा तथैवाऽनुवर्तिता स्यात् ।
प्रजाः नूतनं नृपं सेवकैः सहोपहारादिकं दत्वा सम्माननं कुर्युः ।

जित्वा सम्पूजयेवान् ब्राह्मणश्चैधार्मिकान् ।
प्रदद्यात्परिहाराश्चस्थापयेदभयानि च। ।। ७-२०१।

येु विजयप्राप्त्यनन्तरं राजा देवालयं गत्वा देवान्समर्चयेत् ।
जितराज्यस्य श्रेष्ठब्राह्मणान्सम्मानयेत् । वर्षयोर्द्वयोः करनियं कृत्वा प्रजापालनं पोषणं च कुर्यात् ।

कात्यायनस्मृतौ एकमतिरिक्तं प्रावधानम् ।

दुष्टस्यापि नरेन्द्रस्य तद्राष्टं न विनाशयेत् ।
न प्रजानुमतो यस्मादन्यायेषु प्रवर्तते ।

यदि पराजितः राजा दुर्व्यवहारं करोति, प्रजासु तस्यानुरागो न स्यात् तथापि तमुद्दिश्य दण्डनं न स्यात् । प्रजाः प्रति दण्डः न भवेत् ।

* * *

Digitization by Arya Samaj Charitable Foundation, Chennai

षोडशः अध्यायः

केवलं धर्म एव शाश्वतः

अन्ये चास्मिन् क्षणिकसंसारे मानवेन सह तेनऽऽचरितः धर्म एव तिष्ठेत् । तद्विना किमपि न। अतः एतदावश्यकमस्ति, सर्वे प्रत्यहं धर्ममार्गस्यानुसरणं कुर्युः । मनुस्मृतावस्मिन्विषये बहूक्तं विद्यते ।

नामुत्र हि सहायार्थं पितामाता च तिष्ठतः ।
न पुत्र दारा न ज्ञातिर्धर्मस्तिष्ठति केवलः । ४-२३९।

कश्चिददप्यस्माल्लोकात्परलोकं प्रस्थास्यति तदा तेन सह न माता न पिता पुत्रः पत्नी कोऽपि नागच्छेत् । केवलं धर्ममार्गेणार्जितं पुण्यफलमेवायाति।

एकः प्रजायते जन्तुरेक एव प्रलीयते ।
एको ऽनु भुङ्क्ते सुकृतमेक एव च दुष्कृतम् । ४-२४०।

नर एक एव जन्म लभते एक एव मरणं याति । सकृदेव सुखमनुभवति । एक एव स्वकर्मणः दुष्फलमपि चानुभवति ।

मृतं शरीरमुस्त्यृज्य काष्ठलोष्ठसमं क्षितौ ।
विमुखा बान्धवा यान्ति धर्मस्तमनुगच्छति । ४-२४१।

मरणानन्तरं बान्धवास्तस्य दाहसंस्कारं कृत्वा गृहमायन्ति । मृतकेन सह स्वजीवितकाले कृतान्युत्तमोत्तमकार्याण्येव तेन सहायान्ति । अतः यावज्जीवं नरः धर्मकार्यमनुतिष्ठेत् ।

अत्र कथितास्वर्वे श्लोकाः सूचयन्त्याजीवनं धर्मानुपालनं न केवलं तन्मानसिक-प्रसन्नताशान्त्यर्थम् । अपित्वन्येषामानन्दार्थम् । तात्पर्यमन्यं शोषयन्नन्यस्मै कष्टं प्रयच्छन्धार्मिकं कार्यमचरेत् । तेनापि तात्कालिकानन्दो लभ्यते । परन्तु तदपेक्षया स्वसकाशे विद्यमानैर्वस्तुभिरुत्तमाचरणैः जीवितं धारयेत्।

अत अनैतिकविधिना संगृहीतसम्पत्तेः परिणामः स्वस्मै स्वबन्धुभ्योऽपि स्यात् । परन्तु तत्परिणामं तत्कर्तैव लभेत। सदैव जीवने सदाचारमनुस्मरन्मृत्योः पादपि तस्य सत्परिणामं स अनुभवेत् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

धर्म एव सदा मानवसहवर्ति मित्रमिव। कदाचिद्धर्ममनुपालयन्नरः काठिन्यमसुविधाया अपि अनुभवं कुर्यात् । तथापि कृतं सत्कर्मणः फलं पादपि तमुद्धरेत् । अनेन सर्व सम्बद्धगीताश्लोकः

उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपिरात्मनः ।।

मानवः स्वोच्चविचारैस्तदाचरणैरेवात्मानमुद्धरेत् । तेनात्मनः संस्कारमुत्तमं कुर्यात्। मन एव मनसः बन्धुस्तदेव स्वस्य शत्रुः । आत्मनः मित्रम् ।

वस्तुतः जीवने आनदं प्राप्तुमयमेकः उत्तमो मार्गः । अतः भारतीयसंस्कृ तौ धर्मः सर्वोत्कृष्ठो वर्णितः । तत्स्यमयस्य राजा अथवा वर्तमानकाले विधानपालिका कार्यपालिका न्यायपालिकाऽपि धार्मिकमर्यादामनुपालयन्नेव शासनं कुर्यात् । सघः विद्यमामनव्यवस्थायां संविधानं शासनधर्मोऽपि सम्मिलितो वर्तते ।

एषा प्राचीना आस्था अस्मिन् अमरसूक्तावेव प्रतिबिम्बितं भवति ।।।

।। यतो धर्मस्ततो जयः ।।

***

Sri Sankaracharya ... Mahavidyalaya ... Bhargava NV
2610

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

माननीयः न्यायमूर्तिः **डा. रामाजोयिस**महोदयः कर्णाटकराज्यस्य शिवमोग्गाजनपदे जनिम् अलभत । १९५९ तमे वर्षे कर्णाटकराज्यस्य उच्चन्यायालयस्य अधिवक्तृरूपेण तेन कार्यम् आरब्धम् । १९७७ तमे वर्षे अस्यैव राज्यस्य उच्चन्यायालयस्य न्यायाधीशत्वेन सः नियुक्तः अभवत् । १९९२ तमे क्रैस्ताब्दे पञ्जाबहरियाणराज्ययोः राज्यपालः भूत्वा कार्यम् अकरोत् । अग्रिमे काले तेन झार्खण्डबिहारराज्ययोः राज्यपालत्वेन अपि कार्यं कृतम् । भारतस्य शासनव्यवस्थासु विभिन्नस्तरेषु अन्यान्यपदेषु च कार्यं कृत्वा उत्तमां ख्यातिं सम्प्राप्तवान् रामाजोयिसवर्यः सम्प्रति राज्यसभायाः सदस्यः अस्ति । लेखनकार्ये अपि कुशलेन तेन अनेकानि पुस्तकानि लिखितानि ।

श्री गङ्गाधर बोडे उत्तरकन्नडजनपदे लब्धजन्मा । व्याकरणशास्त्रे पदवीं प्राप्य शिक्षाशास्त्रम् अपि अधीत्य मैसूरुनगरस्थमानसगङ्गोत्रीतः स्नातकोत्तरपदवीं सम्प्राप्य सः हिन्दीभाषायां विशारदपदवीम् अधिगतवान् । आ गतेभ्यः नवदशभ्यः वर्षेभ्यः सः केन्द्रीयविद्यालये कार्यरतः अस्ति । साम्प्रतं बेङ्गलूरुनगरे विद्यमाने केन्द्रीयविद्यालये अध्यापयति सः ।

ISBN 978-81-87276-74-6
रू. ३५.००